युद्धकां मंत्रिणो येच रामस्य येच सुग्रीवमाश्रिताः॥ येपूर्वमभिवर्तंते येच रूढ रघुनंदहं गमाः॥ ~~मंत्रिणो येचरा~~ रामायण
~~मस्य येच सुग्रीवमाश्रिता~~: सच सेतुर्यथाबद्धः सागरे वरुणालये॥ निवेशश्च यथा तेषां वानराणां
महाबले॥ कश्च सेनापतिस्तेषां वानराणां गतायुषां॥ व्यवसायं च रामस्य वीर्यं प्रहरणानि च
लक्ष्मणस्य च सौमित्रेस्तत्वतो ज्ञातुमर्हथ॥ एवं यथानत्वं शीघ्रमागंतुमर्हथ॥ इत्तिनेन यथा झाला
तत्वं शीघ्रमागंतुमर्हथ॥ इतिनेन समादिष्टो राक्षसो शुक सारणो॥ हरिरूपधरौ घोरौ प्रवि
ष्टौ वानरं बलं॥ ततो वानरसैन्यं अभिंयरोमहर्षणं॥ संख्यातुमभिगच्छेतां ताबुभौ शुक

सारणौ॥ निष्पतंतौ पर्वताग्रे निर्झरेषु गुहासु च॥ समुद्रस्य च तीरेषु वनेषूपवनेषु षु च॥ ददृशु
तेरिपुबलं प्लवमानं सहस्रशः॥ तदक्षयमपारं तद्दुर्ज्ञेयं वानरं बलं॥ सारणश्च शुक श्चैव संख्यातुं
नाभिजग्मतुः॥ एकवर्णं महारण्यं कृतं तैर्हरिपुंगवैः॥ राक्षसौ तौ महावीर्यौ संख्यातुं नैव शक्नुतां॥
च त्वरमाणौ तीर्थं च हरीतश्च संघशः॥ निविष्टं विश्रामानं च भीमनर्दमप्यमव्ययं॥ तौ दद्दर्श महामायौ प्रति
छन्नौ विभीषणः॥ आहाययिथा महातेजा वानरैश्च नगोपमेः॥ आनक्ष च क्षेथ रामाय तावुभौ शु
कसारणौ॥ निगृह्य तौ च हरीरभिः उपनीतौ च राघवे॥ ताउयमानौ महावीर्यौ महावीर्यै तरस्त
दा॥ तौ दृष्ट्वा व्यथितौ वीरौ निराशौ जीवितस्य च॥ अब्रवीत्प्रहसन् रामः सर्वभूतहिते रतः॥

युद्धकांड बलं सर्वमिदं दृष्ट्वा हरिसैन्यं समंततः ॥ संख्याय च पुरीं लंकां यथेष्टं गंतुमर्हथ ॥ वधार्हौ चैव मुंचामि रामाय
क्षणेस्मिन् रजनीचरौ ॥ वक्तव्यो राक्षसेंद्रो वां यथोक्तं वचनं मम ॥ यद्बलं त्वं समाश्रित्य सीतां मम ण
२ जहर्थ से ॥ तद्दर्शय यथाकामं ससैन्यश्च सबांधवः ॥ श्वोभूते नगरीं लंकां सप्राकारां सतो
रणां ॥ सराक्षसबलां पश्य शरैर्विध्वंसितां मया ॥ घोरं कोपं प्रमोक्ष्यामि ससैन्ये त्वयि रावण ॥
श्वः प्रभाते यथा वज्रं दानवेष्विव वासवः ॥ इति प्रति समादिष्टौ राक्षसौ शुकसारणौ ॥ आ
गम्य नगरीं लंकां अब्रूतां राक्षसाधिपं ॥ वीभीषण गृहीतौ तौ वधार्हौ राक्षसेश्वर ॥ दृष्ट्वा धर्मात्म
ना मुक्तौ रामेणामिततेजसा ॥ एकस्थानगतास्तत्र चत्वारः पुरुषर्षभाः ॥ लोकपालो २

ॐ नमः शिवाय ॥ जितं भगवता तेन हरिणा लोकधारिणा ॥ अजेन विश्वरूपेण निर्गुणेन गुणा
त्मना ॥१॥ स सैन्ये सागरं तीर्णे रामे दशरथात्मजे ॥ अमात्यौ रावणः श्रीमानब्रवीत् शुकसा
रणौ ॥ समग्रं दुस्तरं तीर्णं समुद्रं वानरं बलं ॥ अभूतपूर्वो रामेण सेतुबंधश्च सागरे ॥ अश्रद्धेयमि
दं कर्म कृतं रामेण सारण ॥ सागरे सेतुबंधेन संक्षुब्धमिव मे मनः ॥ अवश्यमभिसंख्येयं तन्म
या वानरं बलं ॥ भवंतौ वानरं सैन्यं प्रविश्यानुपलक्षितौ ॥ वानरीं तनुमास्थाय परिसंख्यातुम
र्हथ ॥ बलं पात्रां प्रधानं च योधानां चैव निश्चयं ॥ परिणामं च वीर्यं च ये च मुख्याः प्लवंगमा ॥
॥ प्लवं ॥

३/१

पमावीराः संग्रामाभिनतविक्रमाः ॥ रामो दाशरथिः श्रीमान्लक्ष्मणश्च विभीषणः ॥ सुग्रीवश्च महातेजा महेंद्र ३
समविक्रमाः ॥ एते शक्ताः पुरीं लंकां सप्राकारां सतोरणां ॥ गुप्ताख्य संक्रामयितुं सर्वे तिष्ठंतु वानराः ॥ याह
शीश्रीहिं रामस्य वीर्यं प्रहरणानि च ॥ हनिष्यति पुरीं लंकां एक स्तिष्ठंतु ते त्रयः ॥ राम लक्ष्मण गुप्तासा सु
ग्रीवेण च वाहिनी ॥ मन्यामहे सुदुर्धर्षा सेंद्रैरपि सुरासुरैः ॥ व्यक्तं सेतुस्तथा वध्यः दशयोजनविस्त
तः ॥ शतयोजनमायाम स्तीर्णा सेना च सागरं ॥ निविष्टा दक्षिणे तीरे समुद्रस्य नदीपतेः ॥ तीर्णस्य तरसा
णस्य बलस्यांतो न विद्यते ॥ राजन्नुपुत्रस्य रामेण लोकपालोपमेन हि ॥ प्रहृष्टयोधाध्वजिनी वनौकसां
महात्मनां संप्लवियुद्धमिच्छतां ॥ अलं विरोधेन शमो विधीयतां दाशरथाय मैथिली ॥ आर्षे रामायणे युद्धकां
डे वानरप्रवेशो नाम प्रथमः सर्गः ॥ ॥ तद्वचः पथ्यमक्लीबं सारणेन सुभाषितं ॥ निशम्य रावणो वा

२ प्रदीयतां २

कथं पर्यभाषत सारणं ॥ यदिमामभियुञ्ज्येरन् देवगंधर्वदानवाः ॥ नैव सीतां प्रयच्छेयं सर्वलोकभयादपि ॥ त्वं तु
सौम्य परित्रस्तस्तौ दृष्ट्वा हरिवाहिनीं ॥ प्रतिप्रदानं सीताया मन्यसे साधुनिर्जितः ॥ को हि नाम समर्थो मां सम
रेयोद्धुमुत्सहेत ॥ स्थानुक्षणेंद्यापि चक्रः समर्थं जेतुमुद्यतः ॥ इत्युक्त्वा परमक्रुद्धः उत्थितः परमासनात् ॥ आ
रुरोह ततः श्रीमान् प्रासादं हिमपांडुरं ॥ बहुतालसमुत्सेधं रावणोथ दिदृक्षया ॥ ताभ्यां चराभ्यां सहितः स
ददर्श वलं महत् ॥ पर्वतांश्च समुद्रंश्च संवृतं वानरर्षभैः ॥ तदपारमसंख्येयं वानराणां महद्बलं ॥ निशम्य राव
णो राजा सारणं पर्यपृच्छत ॥ एषां के वानराः शूराः के मुख्या [illegible]गमाः ॥ के पूर्वमभिवर्त्तंते के महोत्साहस फ्र
मताः ॥ देवान्वयाश्च के नाम के । मानुषबलोरस्थिताः ॥ केषां श्रेष्ठतिसुग्रीवः के महायूथयूथपाः ॥ क्षिप्र
माचक्ष्व मे वीर्ये प्रधानात्प्लवंगमाः ॥ श्रुत्वा राक्षसेंद्रस्य वचनं परिपृच्छतः ॥ व्याख्यातुमुपचक्राम

युगे ॥ येनुविष्टभ्यगात्राणि नसंतिचहसंतिच ॥ उत्थायपरिजृंभंति क्रोधेन हरिपुंगवाः ॥ एतेदुःप्रसहाराजन्
घोराः शब्देन वानराः ॥ अष्टौशतसहस्राणि दशकोटिशतानिच ॥ यंपुरस्कृत्यगच्छंति वीराश्च
वनचारिणः ॥ सूतेनुनामयोवीरः सर्ववानरयूथपः ॥ एषोप्याशंसते लंकां स्वेनानीकेनमर्दि
तुं ॥ एषः श्टंगोन्नतं नाम नानाद्रुमयुतं गिरिं ॥ नेत्रराज्यं प्रशास्त्येष कुमुदो नाम यूथपः ॥ ए
बकोटिसहस्राणां सहस्रं संत्रकर्षति ॥ यस्यकेशा दशव्यामाः दीर्घलांगूलमाश्रिताः ॥
ताम्रानीलाःसिताश्वेताः प्रकीर्णा घोरकर्मणः ॥ अदीर्घरोमकर्णश्च संग्राममभिकांक्षति ॥ वेगवा
नामलंकेशसुग्रीवस्यसखाबली ॥ एषेवाशंसते लंकां स्वेनानीकेनमर्दितुं ॥ यस्त्वेषः सिंहसं
काशः कपिलो दीर्घकेसरः ॥ निश्चलः प्रेक्षते लंकां अभिगर्जन्पुनःपुनः ॥ एष कृष्णा

गिरिंसह्यंपर्वतंचसुदर्शनं ॥ राजन्सततमध्यास्ते रंभोनामैषयूथपः ॥ त्रिंशत्छतसहस्रा
णि वानराणां शतानिच ॥ शतंशत सहस्राणां त्रिंशच्चहरियूथपः ॥ परिवार्यानु
गच्छंति लंकांमर्दितुमोजसा ॥ यस्तु कर्णौ विवृणुते जृंभते च पुनः पुनः ॥ नत्रसंहर
तेहर्षं यत्रयूथाद्विधावति ॥ महारावो वीतभयो रम्यं शालूवपर्वतं ॥ राजन्सततमध्यास्ते ह
शोनामैषयूथपः ॥ एतस्यबलिनः सर्वे निर्भया नाम वानराः ॥ राजन्दशसहस्राणि चत्वा
रिंशाच्छतानिच ॥ एषोप्याशंसते लंकां स्वेनानीकेनमर्दितुं ॥ यस्तुमेघइवाकाशं वहुभाव्य सनि
ष्ठति ॥ मध्ये वानरकोटीनां सुराणामिववासवः ॥ एषपर्वतमध्यास्ते पारियात्रमनुत्त
मं ॥ युधेदुष्प्रसहोनाम पनसोनाम यूथपः ॥ यूथपायूथपश्रेष्ठं येषांयूथानि भागशः ॥

युधकांड यस्तुभीमामधिष्ठाय चमूं तिष्ठति शोभयन् ॥ स्थितस्तीरे समुद्रस्य द्वितीय इव सागरः ॥ एषमंदरसंकाशो
विनतो नाम यूथपः ॥ जलं पिबति पर्णासां नदीनामुत्तमां नदीं ॥ षष्टिः शतसहस्राणां बलमस्य वनौक
५ सां ॥ युधायाह्वयति त्वेकः क्रमशो नाम वानरः ॥ यस्तु गैरिकवर्णाभं वपुर्धारयते भृशं ॥ गवयो नाम
तेजस्वी क्रुद्धस्त्वामभिवर्त्तते ॥ एनं शतसहस्राणां सप्तभिः पर्युपासते ॥ यूथपा यूथपश्रेष्ठं मनुयांति महा
बलं ॥ इमे महाराज महापराक्रमाः कपिप्रवीरास्तव चैव कीर्त्तिताः ॥ विरुद्धदर्पी बलिनः सुदुर्जयाः
रणे समग्रैरपि देवदानवैः ॥ तद्वानरं सैन्यमुदीक्ष्य भीमं बलं च वीर्यं च समीक्ष्य तेषां ॥ श्रुत्वा च संख्यां
८ च ततः स सज्जो धार कोपं भृशं रामकपिवृधिः ॥ इत्यार्षे रामायणे युद्धकांडे सैन्यदर्शनो नाम २ सर्गः ॥ ५
हंत ते संप्रवक्ष्यामि प्रेक्षमाणस्य यूथपान् ॥ राघवार्थे पराक्रांता येन रक्षंति जीवितं ॥ दीर्घावस्य ब

प्राधान्यमुख्यान्प्लवंगमान ॥ एष योऽभिमुखो लंकां नर्दंस्तिष्ठति वानरः ॥ यूथपानां सहस्राणां शते
न परिवारितः ॥ यस्य घोषेण महता सप्राकारा सतोरणा ॥ लंका प्रकंपते सर्वा सशैलवनका
नना ॥ सर्वशाखामृगेंद्रस्य सुग्रीवस्य महात्मनः ॥ बलाग्रे चेष्टते वीरो नलो नामैष यूथपः
येनेन सेतुर्बद्धोऽयं विश्वकर्मसुतेन वै ॥ समुद्रेण श्रुतश्चैव महात्मा वानरर्षभः ॥ एष यो वै स्वयं
लंकां प्रार्थयन्निव तिष्ठति ॥ गिरिशृंगप्रतीकाशः पद्मकिंजल्कसन्निभः ॥ यः पुलिंदीं
नदीं रम्यां गिरं पर्येति चारुदं ॥ लंकामभिमुखः कोपादभीक्ष्णं च विजृंभते ॥ स्फोटयन्नपि सं
रब्धो लांगूलाग्रं पदे पदे ॥ यस्य लांगूलशब्देन स्वनंतीव दिशो दश ॥ एष वानरराजेन सुग्री
वेणाभिषेचितः ॥ वीरस्य च सहस्रेण चतः शंकुशतेन च ॥ युवराजोंऽगदो नाम त्वामाह्वयति सं

युधेदृष्टपराक्रमानू॥ नखदंष्ट्रायुधानू वीरानू
हुस्यामावालालांगूलमाश्रिताः॥ ताम्रनीलासिताश्वेत प्रकीर्णा घोरकर्मणां॥ विप्रकीर्णाः प्रकाशंतेसू
र्यसोममरीचयः॥ येपृष्ठतोनुगच्छंतिशतशोहारियूथपाः॥ मानुधान्य सहसा शालतालशिलायुधाः॥ नी
लानिवमहामेघानूयांस्त्वंपश्यसि[illegible]ष्ठतः॥ असितांचलसंकाशानू तीव्रकोपभयावहानू॥ असंख्ये दु
यानर्दिदेश्यानूस्थितानूसागररोधसि॥ पर्वतेषुचकेचित्तू नदीषुविमलासुच॥ एतेत्वामभिवर्त्तंतेराजनू
युधेसुदुर्जयाः॥ एषांमध्येस्थितोराजाभीमाक्षोनामदर्दुरः॥ पर्जन्यइवजीमूतैः समंतात्परिवारि
तः॥ ऋक्षवंतंगिरिश्रेष्ठं अध्यास्तेनर्मदांपिबनू॥ सर्वर्क्षाणामधिपतिर्धूम्रोनामेषयूथपः॥
प्रशांतोगुरुवर्चीचसंग्रामेचापराजितः॥ एतेनसाहाय्यंसुमहत्कृतंशक्रेणधीमता॥ देवासुरे
जांववतारुद्धाश्चराजन्शोवराः॥ आरुह्यपर्वताग्राणिक्षिपंतिविपुलाःशिलाः॥ वृक्षांश्चविवि
विधाकारानू नमृत्योरुद्विजंतिच॥ राक्षसानांचसंदंशाः पिशाचानांचलोमशाः॥ अत्रानी

केपुतिष्ठति वालिनोनामविक्रमाः॥ अस्यसैन्यस्यरक्षांवोविचरंत्यग्निनतेजसः॥ यत्रैकमभिसंरब्धंप्लवमान
मवास्थितं॥ प्रेक्ष्यंतेवानराःसर्वेस्थितंपृथपपृथपं॥ एषराजन्सहस्त्राक्षमुपास्तेत्वमनार्थिने॥ वलवान्
वीर्यवान्भीमोहरिःपद्मनिभाननः॥ यास्थितंयोजनेरोलंगछन्पार्श्वेनसेवते॥ ऊर्ध्वंनथैवकण
येनगछन्~~कत्य~~व्याप्नोतियोजनं॥ यस्मान्नपरमंभूतंचक्षुष्यादिहदृश्यते॥ येनयुधंमहद्दत्तं
पुरावैरान्महायतः॥ पराजयंचनोप्राप्तोमहानेषसपृथपः॥ श्रुतसन्नादनोनामवानराणांपिता
महः॥ याहेनमंवुदाकारंगजेतमिवतोयदं॥ सैन्यंग्निचेशयानेचरटंभंतचप्रपन्नर्यास॥ एषवान
र~~कोटीनां~~मुख्यानांपद्मकोटिंप्रकर्षति॥ इंद्रजेनुरितिरव्यातोयुधेपरमदुर्जयः॥ योराजापि
र्वते~~श्रेष्ठे~~द्रोणेवहुकिन्नरसेविते॥ यस्याविक्रममाणस्यशक्रस्येवपराक्रमः॥ एषगंधर्वक
कन्यायामुत्पन्नःकृष्णवर्त्मना॥ तदादेवासुरेयुधेसाह्यकालेशतक्रतोः॥ यस्यवैश्रवणोराजा

जंबू[struck]मुपञ्जिषेवते ॥ विहार सौख्दो वरदो भ्राता ते राक्षसेश्वर ॥ एष हेमवतो राजा बलवान्व
नरर्षभः ॥ सेनापतिः प्रकंप्यो नी।त्रो नामैष वानरः ॥ षष्टिः कोटि सहस्रेण हरीणां समुपस्थितः ॥
एषोप्याशंसते लंकां स्वेनानीकेन मर्दितुं ॥ योयं मामनुपर्येति त्रासयन्गजयूथपान् ॥ हस्तिनां वानराणांच
पूर्ववैरमनुस्मरन् ॥ एष यूथपतिर्नेता गजो गिरिरुहाश्रयः ॥ हिरण्यवाहिनीं मुख्यां नदीं हैमवती महान् ॥
व्या औशीरबीजमास्थाय पर्वतं मंदरोपमं ॥ रमते वानरश्रेष्ठो दिवि शक्र इव स्वयं ॥ एवं शतसहस्राणां
सहस्रमभिवर्तते ॥ एष दुर्धर्षणो राजा प्रमाथी नाम यूथपः ॥ वातेनैवोद्धतं मेघं यमेनमनुपश्यसि ॥
विवर्तमानं बहुशो यासैतद्बहुलं रजः ॥ एषनेसुमहद्धोरो गोलांगूलो महाबलः ॥ शतं शतसहस्राणां कोटि
कोटि शतं तथा ॥ एनं समुपतिष्ठंति गवाक्षो नाम यूथपः ॥ एषैवाशंसते लंकां स्वेनानीकेन मर्दितुं ॥ वा
हिनीवास्य विपुला लंकामिच्छति मर्दितुं ॥ अमराचरितायत्र सर्वकालफलद्रुमाः ॥ यं सूर्य

युद्धकांड तुल्यवर्णाभं अनुपर्येति पर्वतं ॥ प्रभयायस्य दृश्यंते कांचनामृगपक्षिणः ॥ यस्य प्रस्थं महात्मानो नयजंति रामायण
७ महर्षयः ॥ तत्रैव राजन् रमते कांचने मृगपर्वते ॥ मुख्यो वानरमुख्यानां केसरी नाम यूथपः ॥ राजन् षष्टि
सहस्राणि रम्याः कांचनपर्वताः ॥ तेषां अस्तो गिरिश्रेष्ठो स्वामि वा मेरर क्षसां ॥ तत्रैके कपिलाः श्वेता
ताम्रास्याजेंबुपिंगलाः ॥ निवसंति गिरिश्रेष्ठे तीक्ष्णदंष्ट्रनखायुधाः ॥ सिंहाइवचतुर्दंष्ट्राव्याघ्राइवच
दुःसहाः ॥ आशीविषाइवास्य न्स्याघोररूपाः प्लवंगमाः ॥ तत्रैवनिसमचलेभास्करंमुपतिष्ठति ॥ अ
र्कस्यगतिभान्विछन्नान्धनंचमहाकपिः ॥ योविषाणमुपाग्रण्हान् संग्रामे हस्तिवानरे ॥ नासत्यांत
न्ततोवीरः सुषेणो नामवानरः ॥ निरवर्वेण धृतः श्रीमान् हरीणां वानरहंसां ॥ कामरूपीमहावी
र्यः समर्थःसमरोचितः ॥ राजन् पृथिव्यां विख्यातो नाम्ना शतवालिःसुतः ॥ धृतः कोटिसहस्रैस्तुले ७
कां प्रार्थयते कपिः ॥ उल्कामुखश्च वृषभः शरभो गंधमादनः ॥ एकैकएषां योधानां कोटिभि

ये क्रुद्धः समुद्रमपि तेजसा ॥ एष धर्षितवान् लंकां पूर्वं सीतां च दृष्टवान् ॥ एतं पश्य पुरा दृष्टं कपिं भयागतं पुनः ॥ ज्येष्ठः केसरिणः
पुत्रो वातात्मज इति श्रुतः ॥ हनूमानिति विख्यातो लंघितो येन सागरः ॥ कामरूपी बलश्चैव कामगश्चापि वानरः ॥ अनिवार्यगतिश्चै
व यथानिलगतिस्तथा ॥ उद्यंतं भास्करं बालो दृष्ट्वा च प्यर्थितः किल ॥ अनासाद्य च पतितो भास्करोदयने गिरौ ॥ पतितस्य कपेरस्य ह
नुरेकः शिलातले ॥ किंचिद्भग्नो दृढहनो हनूमानेष तेन च ॥ इत्येवमयमयोगेन नामैषर्विदितो हरिः ॥ नास्य शक्यं बलं रूपं प्रभाव
श्चापि लक्षितुं ॥ आशंसत्येष चैवैको लंकां कामं हि तुमोजसा ॥ यश्चैषोऽनंतरः शूरः श्यामः पद्मनिभेक्षणः ॥ इक्ष्वाकूणामतिर
थो लोके विश्रुतपौरुषः ॥ यस्मिन्न चलतो धर्मो यो धर्मं नातिवर्तते ॥ अस्त्रग्रामः ससंहारः यस्मिन्वीरे प्रतिष्ठितः ॥ यो भिंद्या
द्गगनं बाणैः वसुधां चावदारयेत् ॥ यस्य मृत्योरिव क्रोधो शक्रस्येव पराक्रमः ॥ यस्य भार्या जनस्थानात् सीता चापहृता त्वया ॥
सोऽयं दाशरथी रामो योद्धुं त्वामभिवर्तते ॥ यस्यैव दक्षिणे पार्श्वे शुद्धजांबूनदप्रभः ॥ विशालवक्षास्ताम्राक्षो नील
कुंचितमूर्धजः ॥ एषोऽस्य लक्ष्मणो नाम भ्राता प्राणसमो हितः ॥ नये युद्धे च कुशलः सर्वशस्त्रविधिपारगः ॥ अमर्षी दुर्जयो जे

ता विक्रांतः समरे बली ॥ रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ न ह्येष राघवस्यार्थे जीवितं परिरक्षति ॥ एषोऽप्याशंसते युद्धे निह
न्तुं सर्वराक्षसान् ॥ यस्तु सव्यमसौ पार्श्वे रामस्याश्रित्य तिष्ठति ॥ रक्षोगणयुतो भ्राता तथैव स विभीषणः ॥ श्रीमता राजराजेन लं
कायामभिषेचितः ॥ त्वामेव प्रति संरब्धो रामस्याच्च समागतः ॥ यं तु पश्यसि तिष्ठंतं लक्ष्मणात्समनंतरं ॥ सर्वशाखामृगेंद्राणां
भर्तारमपराजितं ॥ तेजसा यशसा बुद्ध्या बलेनाभिजनेन च ॥ यः कपीनभिसंधत्ते हिमवानिव पर्वतान् ॥ किष्किंधां यः स
मध्यास्ते गुहां वानरसंकुलां ॥ दुर्गां पर्वतदुर्गस्थां कामरूपी महाबलः ॥ यस्यैषा कांचनी माला शोभते शतपुष्करा ॥ कांता देवमनु
ष्याणां यत्र लक्ष्मी प्रतिष्ठिता ॥ एतां मालां च तारां च कपिराज्यं च शाश्वतं ॥ रामेण वालिनं हत्वा सुग्रीवे प्रतिपादितं ॥ शतं शतसहस्राणां
कोटिमाहुर्मनीषिणः ॥ शतं कोटिसहस्राणां वृंदमाहुर्मनीषिणः ॥ शतं वृंदसहस्राणां महावृंदमिहोच्यते ॥ महावृंदसहस्राणां शतप
मि द्ममिहोच्यते ॥ एष कोटिसहस्रेण तथा शंकुशतेन च ॥ एष वृंदसहस्रेण महावृंदशतेन च ॥ एष पद्मसहस्रेण महापद्मशतेन च ॥ एष सैन्ये
न सर्वेण सुसंहर्षेण पार्थिव ॥ सुग्रीवो वानरस्त्वां वै संप्रहारार्थमुद्यतः ॥ इमां महाराज समीक्ष्य वाहिनीं समुत्थितां प्रज्वलिता ग्रहोप

पाल्यर्ण

६ अनुजीविनां हितां आनुजीव्यं ६

युद्धकांड — रामायण

भा॥ तथा शयतः परमोऽविधीयतां यथा जयस्यान्तरणे पराजयः॥ इतिश्रीरामायणे युद्धकांडे शुकवाक्यं नाम सर्गः॥ शुकेनच
८ समाख्यातं दृष्ट्वा हरिवाहिनीं॥ समीपस्थं च रामस्य भ्रातरं स्वं बिभीषणं॥ लक्ष्मणं च महावीर्यं भुजं रामस्य दक्षिणं॥ सर्व
वानरराजानं सुग्रीवं चापराजितं॥ ईषदागतसंत्रासो जातक्रोधश्च रावणः॥ भर्त्सयामास तेजस्वी कथांते शुकसारणौ॥
तावुवाच दृशौ यो मन्युनासंप्रकोपितः॥ रोषगद्गदया वाचा संरब्धपरुषाक्षरं॥ नचैव सदृशौ नाम साधये रूपजीवि
भिः॥ विप्रियं नृपतेर्वक्तुं निग्रहानुग्रहे प्रभुं॥ रिपूणां प्रतिकूलानां युद्धार्थमभिवर्ततां॥ उभाभ्यां सदृशं नाम वक्तुम
प्रस्तवं स्तवं॥ आचार्या गुरवो वृद्धा वृथा तां पर्युपासिताः॥ यत्सारं सर्वशास्त्राणामानुजीव्यं न गृह्यते॥ गृहीतं चापि विज्ञातं सा
रं शास्त्रस्य वा तथा॥ ईदृशैः सचिवैर्युक्तो मूर्खैर्दिष्ट्या ध्रिये ऽहं॥ किं मां मृत्युभयं नास्ति मां शुक्तापरुषं वचः॥ यस्य मे शासने
जिह्वा प्रयच्छति शुभाशुभं॥ अप्येव दहनं स्पृष्ट्वा वने तिष्ठंति पादपाः॥ राजदोषपरामृष्टा नतिष्ठंत्यपराधिनः॥ हन्यामहमिमौ पा ८
पौ शत्रुपक्षप्रशंसकौ॥ यदि पूर्वोपकारैर्मे न क्रोधमुपनाशयेत्॥ ध्वंसयेतां सुदुर्वृत्तौ सन्निकर्षादितो मम॥ उभौ न द्रष्टुमि[illegible]मि

दृशाभिर्वृतः॥ अथान्ये वानरश्रेष्ठा विंध्यपर्वतवासिनः॥ नशक्यं तु बहुत्वात्तु संख्यातुं लघु विक्रमाः॥ एते महारा
जमहानुभावाः महाबलाश्चाऽप्रतिमाश्च युद्धे॥ शाखामृगाः पर्वतसन्निकाशाः प्रकीर्तितास्सुरव्यत्तमाः पृथि
व्यां॥ इतिश्रीरामायणे युद्धकांडे सैन्यवर्णनो नाम सर्गः॥ सारणस्यांतरं दृष्ट्वा राक्षसस्य ९ टिप
महात्मनः॥ वत्समात्रे कथनं सर्वं शुको वचनमब्रवीत्॥ स्थितान्पश्यसि यानेतान्मतंगानिव
हैमवता महाद्रुपान्॥ न्यग्रोधानिव गांगेयान्सालानिव॥ एते दुःप्रसहा राजन्बलिनः कामरूपिणः॥ दैत्यदानवसंकाशा
दरीवक्राश्च वानराः॥ एते कोटिसहस्राणि नवपंचचसप्तच॥ तथा शंकुसहस्राणि तथा बृंदशतानि च॥ यो नु पश्यसि ति
ष्ठंतौ कुमारौ देवरूपिणौ॥ मैंदश्च द्विविदश्चैव तौ नैनयोर्विद्यते समः॥ ब्रह्मणा समनुज्ञातावमृतप्राशनावुभौ॥ आशंसेते पुरीं लं
कां एतौ मर्दितुमोजसा॥ सुमुखो विमुखश्चैव मृत्युपुत्रौ पितुः समौ॥ प्रेक्षंतौ नगरीं लंकां एतौ मर्दितुमोजसा॥ एते सुग्रीवसाचि
व्याकिष्किंधानिलयास्तथा॥ हरयो देवगंधर्वैरुत्पन्नाः पन्नगैस्तथा॥ यं तु पश्यसि तिष्ठंतं प्रभिन्नमिव कुंजरं॥ यो बलात्क्षो

रत्नस्तस्यतांनूद्दर्शविभीषणः॥ नेहिमायाधराहृष्टा राक्षसेंद्रेणराक्षसाः॥ विभीषणेनसंप्राप्तानिगृहीतायहृच्छया॥
वानरैरर्द्दितास्तेतुविक्रांतैर्लघुविक्रमैः॥ दयापरेणरामेणदर्शयित्वाचमूंततः॥ मुक्तास्तेराक्षसास्तेनमहात्मना॥ पुनर्लंका धर्म हीन
मनुप्राप्ताःश्वसंतोनष्टचेतसः॥ ततोदशग्रीवमुपस्थिताःपुनःश्वराःबहिर्निवेद्यचरानिशाचराः॥ गिरेःसुवेलस्यसमीपवासि
नेन्यवेदयन्भीमबलंन्वलद्बलं॥ इतिवाल्मीकीयेयुद्धकांडेचारप्रेषणोनामसर्गः॥७॥ वीक्षमाणंविषण्णंतुशार्दूलंशुक
करिति॥ भयाच्चविकृतैरंगैश्वसंतमिवपन्नगं॥ उवाचप्रहसन्नेवरावणोभीमदर्शनः॥ अयथावत्तेवर्णोदीनश्चासिनिशा
चरः॥ नासिकच्चिदमित्राणांक्रुद्धानांवशमागतः॥ इतितेनानुशिष्टस्तुवचोमंदमुदीरयन्॥ महाराक्षसशार्दूलंशार्दूलोवा
क्यमब्रवीत्॥ नतेवारयितुंशक्याराजन्वानरपुंगवाः॥ विक्रांताबलवंतश्चराघवेणपरिरक्षिताः॥ नापिसंभाषितुंशक्याःसंप्र १०
य श्नोपिनलभ्यते॥ सर्वतोरक्ष्यतेपंथावानरैःपर्वतोपमैः॥ प्रविष्टमात्रोज्ञातोहंबलेस्मिन्नविचारिते॥ नथागृहीतोबलि
भिर्बहुधाविप्रकर्षितः॥ जानुभिर्मुष्टिभिर्दंतैस्तलैश्चापिहतोभृशं॥ विषण्णीतोस्मिहरिभिर्बलवद्भिरमर्षणैः॥ कुरामपरस्त

भ्रामयित्वाचसर्वत्रनीतोहंराजसंसदि॥ रुधिरास्त्रावसर्वांगोविक्लवश्चलितेंद्रियः॥ हरिभिर्वध्यमानश्चयाचमा
नःकृतांजलिः॥ राघवेणपरित्रातोजीवन्नेवयदृच्छया॥ एषशैलैःशिलाभिश्चपूरयित्वामहार्णवं॥
घोरमाश्रित्यलंकायाःरामस्तिष्ठतिसायुधः॥ गारुडंव्यूहमास्थायवानरैर्बहुभिर्वृतः॥ मांविलोक्य
महातेजालंकामेवोपवर्तते॥ पुनःप्राकारमायातेःक्षिप्रमेकतरंकुरु॥ सीतांवासंप्रयच्छाशुयुद्धंवासंप्रदी
यतां॥ मनसाचोत्पपातैवंतच्छ्रुत्वाराक्षसाधिपं॥ शार्दूलंसुमहद्वाक्यमथोवाचसरावणः॥ यदिमांप्रतियो
त्स्यंतेदेवगंधर्वदानवाः॥ नैवसीतांप्रदास्यामिसर्वलोकभयादपि॥ एवमुक्त्वामहातेजारावा
णः पुनरब्रवीत्॥ चारितान्भवतासेनाःशूराःकेतत्रवानराः॥ कीदृशाःकतिवासौम्याःवानरास्तेदु
रासदाः॥ कस्यपुत्राश्चपौत्राश्चतत्त्वमाख्याहिराक्षस॥ तथाचप्रतिपत्स्यामोज्ञात्वातेषांबलाबलं॥

युद्धकांड अवश्यं वलसंख्यानं कर्त्तव्यं जयमिच्छता ॥ अथैवमुक्तः शार्दूलो रावणेनोत्तमेश्वरः ॥ इदं वचनमारेभे वक्तुं रामायण
११ रावणसंसदि ॥ ऋक्षराजस्य पुत्रोस्ति राजन्राज्ञो सुदुर्जयः ॥ पितामहसुतः श्चात्र जांबवानिति विश्रु
तः ॥ सहस्राक्षसुतः श्रीमान् सुग्रीवो वानरेश्वरः ॥ राक्षसानामभावाय सबलः समुपस्थितः ॥ सुषेणश्चै
पि धर्मात्मा पुत्रो धर्मस्य वीर्यवान् ॥ दधिः सोमात्मजः श्चात्र राजन्दधिमुखो हरिः ॥ सुमुखो विमुखश्चै
व वेगदर्शी च वानरः ॥ मृत्युर्वानररूपेण तनुमेवां प्रवेशितः ॥ स्वयंभुवा महाराज मृत्योः पुत्रोश्च तेस्मृताः ॥ पु
२ त्रो हुताशनस्यैव नीलः सेनापतिः स्वयं ॥ अनिलस्य तु पुत्रोत्र हनूमानिति विश्रुतः ॥ नप्ता शक्रस्य दुर्धर्षो वलवान्
गदो युवा ॥ मैंदश्च द्विविदश्चैव वीरौ तावश्विनोः सुतौ ॥ पुत्रा वैवस्वतस्यात्र पंचकालांतकोपमाः ॥ गजो ग
वाक्षः ऋषभो शरभो गंधमादनः ॥ श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मजावुभौ ॥ वरुणस्य च पुत्रोत्र हे ११
मकूटः प्रतापवान् ॥ विश्वकर्मसुतश्चात्र नलो नाम महाकपिः ॥ येन सेतुर्महान् वद्धः सागरे वरुणालये ॥

स्मरंन्नपकृतानि च ॥ हन्तुमेवं च कृतघ्नौ तौ ममसन्निहपराङ्मुखौ ॥ तेनैवमुक्तौ सव्रीडौ तावुभौ शुकसारणौ ॥
रावणं जयशब्देन प्रतिनंद्याभिनंदितौ ॥ अब्रवीत्तु समीपस्थं दशग्रीवो महोदरं ॥ उपस्थापय मे शीघ्रं
चारान्नीतिविचक्षणाः ॥ ततश्चाराः संचरिताः प्राप्ताः पार्थिवशासनात् ॥ उपस्थिताः प्रांजलयो वर्धयि
त्वा जयाशिषः ॥ तानब्रवीत्ततो वाक्यं रावणो राक्षसाधिपः ॥ विनीतान् प्रत्ययितः शूरान् अभकान्विगतसा
ध्वसान् ॥ इतो गच्छत रामस्य व्यवसायं परीक्षथ ॥ मंत्रेष्वभ्यंतरा यस्य प्रीत्या तेन समागताः ॥ कथंस्य सधर अनीकं
तेरेणब्यतपथा ॥ विज्ञाय निपुणं सर्वं आगंतव्यं मशेषतः ॥ चारेण विदितः शत्रुः पंडितैर्वसुधाधिपः ॥ युद्धेवल्पेन यत्नेन युद्धे
क्षिप्यते न समासाद्य निरस्यते ॥ चारास्तु ते तथेत्युक्त्वा प्रहृष्टा राक्षसेश्वरं ॥ कृत्वा प्रदक्षिणं जग्मुर्यत्र रामः सलक्ष्म जग्मुः
णः ॥ ते सुवेलस्य शैलस्य समीपे रामलक्ष्मणौ ॥ आसातेहारसैन्येन संवृत्तौ सविभीषणौ ॥ प्रच्छन्नांश्चै

रिपवो मम ॥ तस्य तत् शासनं श्रुत्वा मंत्रिणो ऽभ्यागमन् द्रुतं ॥ ततः समंत्रयामास सचिवैः सह रावणः ॥ मंत्रयित्वा तु दुर्बु
द्धिः क्षमं तत्समनंतरं ॥ अथ तं प्रेषयामास गमने रावणो बली ॥ अथ तं प्रेक्ष्य तत्रस्थं राक्षसेंद्रं हि राघवः ॥ विभीषण
मुवाचेदं किमेतत् कृतमद्भुतं ॥ सीतापहारको राजन् रावणो राक्षसेश्वरः ॥ तदारोप्य धनुः क्षिप्रं संधयामास सायकं ॥
कार्मणा तेन चिच्छेद छत्रं सूर्यसमप्रभं ॥ तदा ह्रीसयामास राघवं राक्षसेश्वरः ॥ शत्रोरपि गुणा वाच्याः दोषा वाच्या
गुरोरपि ॥ छत्रच्छेदो भयाद् दृष्टो दूरपाती च राघवः ॥ विसर्जयित्वा सचिवानु प्रविवेश स्वमालयं ॥ ततो राक्षसमानीय
विद्युज्जिह्वं महाबलं ॥ मायाविनं महामायं अब्रवीद्राक्षसाधिपः ॥ मोहयिष्यामहे सीतां मायया जनकात्मजां ॥ मा
स यामयं रामशिरो गृहीत्वा राक्षसेंद्र द्रुतं ॥ मां त्वं समनुतिष्ठ तान्महच्च सशरं धनुः ॥ एवमुक्तस्तथेत्याह विद्युज्जिह्वो निशाच रा॰श्रा॰
रः ॥ तस्मै तुष्टो ऽभवद्राजा प्रददौ च स्वभूषणं ॥ अशोकवनिकां चापि सीतादर्शनलालसः ॥ नैर्ऋतानामधिपतिः
प्रविवेश महाबलः ॥ ततो दीनामदैन्याहीं ददर्श धनदानुजः ॥ भर्तारं समनुध्यांतीं अशोकवनिकागतां ॥ उपा

स्यमानां घोराभि राक्षसीभिरदूरतः ॥ उपसृत्य ततः सीतां प्रहसन् तां प्रहर्षयन् ॥ रुषां च वचनं दुष्टं उवाच जनकात्मजां
॥ अधोमुखीं स्थितां बालां उपविष्टां पराङ्मुखीं ॥ सांत्वमानां मया भद्रे यमाश्रित्य प्रजेल्पसि ॥ खरहंता स ते भर्ता राघ
वः समरे हतः ॥ छिन्नं ते सर्वथा मूलं दर्पे स्ते निहतो मया ॥ व्यसनेनात्मनः सीते मम भार्या भविष्यसि ॥ अल्पपुण्ये
निवृत्तार्थे मूढे पंडितमानिनि ॥ श्रृणु भर्तुर्वधं सीते निघोरं वृत्रवधं यथा ॥ उपायातः समुद्रांतं मां हंतुं किल राघवः ॥ वानरेंद्र
प्रणीतेन बलेन महता वृतः ॥ सन्निविष्टः समुद्रस्य तीरमासाद्य दक्षिणं ॥ बलेन महता रामो व्रजत्यस्तं दिवाकरे ॥ अथा
ध्वनापरिश्रांतं अर्धरात्रे स्थितं बलं ॥ सुखसुप्तं समासाद्य चारितं प्रथमं चरैः ॥ तत्प्रहस्तप्रणीतेन बलेन महता मम ॥ ब
लमभ्यागतं रात्रौ यत्र राजा स राघवः ॥ पट्टिशाः परिघाश्चैव गदादंडा महायसाः ॥ बाणजालानि शूलानि भास्वराः ख
ड्गमुद्गराः ॥ शंकुस्युष्टि तोमराश्चात्र चक्राणि मुसलानि च ॥ उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः ॥ अथ सु
प्तस्य रामस्य प्रहस्तेन प्रमाथिना ॥ असक्तं कृतहस्तेन शिरश्छिन्नं महासिना ॥ उत्पतंस्तो ऽङ्गात् पृष्ठे निपतंश्च

यदृच्छया॥ दृष्टो विद्रुतः श्रीमान् पूर्वा लक्ष्मणः सह प्लवगैः सह॥ सुग्रीवो ग्रीवया सीते भग्नश्च प्लवगाधिपः॥ निरस्तहनुराकारो
हनूमान् राक्षसैर्हतः॥ चंद जानुसु जानुभ्यां मुत्पतन्नूपतितो भुवि॥ पट्टिशैर्बहुभिश्छिन्नः पतितः पादपो यथा॥ मैन्दश्च द्विविदश्चैव निहतौ वानरोत्तमौ रणे॥
विदश्चैव निहतो वानरो रणे॥ प्रश्वसंतौ नदंतौ च रुधिरौघपरिप्लुतौ॥ असिनाभ्याहनत् छिन्नः प्रकीर्णः सुमहावलः॥
अधिष्ठानाति मेदिन्यां पनसः पनसो यथा॥ नाराचैर्बहुभिश्छिन्नः शेते दर्यां दरीमुखः॥ कुमुदस्तु महातेजा विक्रुवः सायकैः कृतः॥
यकैः कृतः॥ अंगदो बहुभिर्भिन्नः शूलेरासाद्य राक्षसैः॥ पतितो रुधिरोद्गारी क्षितौ निपतितोंगदः॥ हयैरन्यैस्तथा नागैरथैश्च
कैस्तथा परे॥ शायाना मर्दितास्तत्र मकरा गोगणैरिव॥ प्रस्तुताश्च परे त्रस्ता हन्यमाना जघन्यतः॥ अनुयुक्ता राक्षसैर्भिः सिंहैरिव महाद्विपाः॥
रिव महाद्विपाः॥ सागरे पतिताः केचित् गगनं केचिदाश्रिताः॥ ऋक्षा वृक्षान्समारूढा वानरैर्सह तिमिश्रिताः॥ सागरस्य
तु तीरेषु सागरे पर्वतेषु च॥ पिंगाक्षास्ते विरूपाक्षैर्बहुभिर्बहवो हताः॥ एवं तव हतो भर्ता ससैन्यो मम सेनया॥ क्षतजार्द्रं
क्षतजार्द्रं रजोध्वस्तं इदं तस्याहृतं शिरः॥ ततः परमदुर्धर्षो रावणो राक्षसेश्वरः॥ सीतायास्तत्र वैदेह्या राक्षसीमिदमब्रवीत्॥
राक्षसं घोरकर्माणं विद्युज्जिह्वं प्रवेशय॥ तेन तद्राघवशिरः संग्रामात् स्वयमाहृतं॥ विद्युज्जिह्वस्ततो गृह्य शिरस्तत्सशरा २२

दशवानरकोट्यो वीराणां युद्धकांक्षिणां॥ श्रीमतां देवपुत्राणां शेषं नाख्यातुमुत्सहे॥ पुत्रो दशरथस्यैष सिंहसंहननो युवा॥
हसंहननो युवा॥ दूषणो निहतो येन खरश्च त्रिशिरास्तथा॥ वाली च निहतो येन कबंधश्च महाबलः॥ विराधश्चैव दुर्मर्षो राक्षसोऽनंतविक्रमः॥
धश्चैव दुर्मर्षो राक्षसो नंतविक्रमः॥ नास्ति रामस्य सदृशो विक्रमेण तु कश्चन॥ येनार्जुनेन वधो रामस्य विक्रमे सदृशो भुवि॥
मे सदृशो भुवि॥ जनस्थानगता येन वनस्था राक्षसा हताः॥ सैषत्वां सगणो योद्धुमुद्यतः सगणोऽवली॥ लक्ष्मणश्चापि धर्मात्मा मतंगानामिवर्षभः॥
पि धर्मात्मा मतंगानामिवर्षभः॥ यस्य बाणपथं प्राप्य न जीवेदपि वासवः॥ राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः॥
षणः॥ परिगृह्य पुरीं लंकां राघवस्य हिते रतः॥ इति सर्वं समाख्यातं तवेदं द्विषतां बलं॥ सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान् गतिः॥
षकार्ये भवान्गतिः॥ इत्यार्षे रामायणे युद्धकांडे चारप्रयागमो नाम सर्गः ८॥ ततस्तमक्षोभ्यबलं लंकाधिपतये चराः॥
पतये चराः॥ सुवेले राघवं शैले निविष्टं प्रत्यवेदयन्॥ चारेभ्यो रावणः श्रुत्वा प्राप्तं रामं महाबलं॥ जातोद्वेगोऽभवत् सो
किंचित् सचिवानिदमब्रवीत्॥ मंत्रिणः शीघ्रमायांतु सर्वे वै सुसमाहिताः॥ अयं नो मंत्रकालो हि संप्राप्तः

पमानात पस्विनी ॥ जगाम जगतीं बाला छिन्नेव कदली यथा ॥ सा मुहूर्तात् समुत्थाय प्रतिलभ्य च चेतनां ॥ तच्छिरः
समुपाघ्राय विललापायतेक्षणा ॥ हा हतास्मि महाबाहो वीरव्रतमनुव्रता ॥ इमां ते पश्चिमावस्थां हतास्मि वि
धवा कृता ॥ प्रथमं मरणं नार्याः पत्युः पुण्यामिति श्रुतिः ॥ मयि कस्मादशस्तायां काले नासि निपातितः ॥ दुःखाद्दुःखं प्र
पन्नायां मग्नायां शोकसागरे ॥ राक्षसेन वीरस्य हतो ह नस्त्वं मम कारणात् ॥ योपि मामुद्यतस्त्रातुं सोपित्वं कि लपा
तितः ॥ श्वश्रूर्मम कौशल्या त्वया वत्से न राघव ॥ वत्से नवं चिनाधेनुर्विवत्सा वत्सला कृता ॥ आदिष्टं दीर्घमायुस्ते ये रचिं
त्यपराक्रम ॥ अनृतं वचनं तेषां अल्पायुरसि राघव ॥ अदृष्टं मृत्युमापन्नः कस्मात्त्वं नयशास्त्रवित् ॥ यः सती
नामुपायज्ञः कुशलः परिवर्जने ॥ अथवा नश्यति प्रज्ञा प्राज्ञस्यापि सतस्तव ॥ पचत्येव महाकालो भूता
निप्रभुरव्ययः ॥ दुपशोभे महाबाहो मां विहाय सुदुःखितां ॥ प्रियामिव शुभां नारीं पृथिवीं पृथिवीश्वरः
स ॥ तथा त्वं संपरिष्वज्य रौद्रया सुनृशंसया ॥ कालरात्र्या ममो हृत्य नीतः कमललोचनः ॥ क्व गतस्त्वं म

हाबाहो मां विहाय तपस्विनीं ॥ हतामिव रणे भूमिं वह्निना पार्थिवर्षभ ॥ अर्चितं सततं मंत्रैर्गंधमाल्यानुलेपनैः ॥ यदं
न्त्रापि रज्यंते धनिकीर्णं महीतले ॥ आर्येण ननु पित्रा त्वं आर्य श्चार्येश्च राजभिः ॥ पुण्यवद्भिः क्रियावद्भिः नूनम
ग्रे समागतः ॥ दिवि नक्षत्रभूतेश्च महाक्रतुकृतस्तव ॥ पुण्यं राजर्षिवंशं त्वमात्मनः समवेक्षसे ॥ किं मां न प्रेक्षसे
राजन् किं न मां नाभिभाषसे ॥ बालां नारीं सयसंप्राप्तां सधर्मां सहचारिणीं ॥ संरुतं गृह्णता पाणिं चरि
ष्यामि इति यत्त्वया ॥ स्मर तं मम काकुत्स्थ नय मामपि दुःखितां ॥ कस्मान्मां त्वं विहाय को गतिमतां वर ॥ अ गतो
स्माल्लोकादमुं लोकं त्यक्त्वा मामिह धार्मिक ॥ चंदनागरुदिग्धांगं परिष्वक्तं मया पुरा ॥ क्रव्याद्भिस्तच्छरीरं ते नूनं विपरिकृष्यते ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः ॥ अग्निहोत्रेण संस्कारमर्हस्त्वं नोपलप्स्यसे ॥ प्रव्राजमुपपन्नानां त्रयाणामेक
मागतं ॥ परिप्रक्ष्यति कौशल्या लक्ष्मणं शोकलालसा ॥ तस्याः संपृच्छ्यमानः सा हरणं मम राक्षस ॥ तव चाख्यास्यते वी
रो सुप्तके राक्षसैर्वधं ॥ सा सुप्तं त्वां हतं श्रुत्वा मां तथा राक्षसे हृतां ॥ हृदयेनावदीर्येण कौशल्या न भविष्यति ॥ साधु घात

नयमो शीघ्रं रामस्योपरि रावण ॥ सुग्रियस्य प्रियां भार्यां कुरु कल्याण मुत्तमं ॥ शिरस्य स्मि शिरे देहि कायं
कायेंन वेशय ॥ रावणानुगमिष्यामि गतिं भर्त्तुर्महात्मनः ॥ मुहूर्त्तमपि नेच्छामि जीवितुं पापजीविता ॥ समानयत्वपति
ना कुरु कल्याणमुत्तमं ॥ श्रुतं मया वेदविदां ब्राह्मणानां पितुर्गृहे ॥ यासां स्त्रीणां प्रियो भर्त्ता तासां लोका महोदयाः ॥ क्षमा
यस्मिन् मयासागः सत्सं धर्म कृतज्ञता ॥ अहिंसा चैव भूतानां मम ते कागतिर्मम ॥ इति सादुःखसंतप्ता विललापायतेक्षणा ॥
भर्त्तुः शिरो धनुश्चैव संगेस्य जनकात्मजा ॥ एवं लालप्यमानायां सीतायां तत्र रावणं ॥ अभिचक्राम भर्त्तारं बलाध्यक्षः
कृतांजलिः ॥ एतस्मिन्नंतरे द्वास्थो रावणस्यन्यवेदयत् ॥ कार्यमित्याधिकं घोरं संज्ञया संज्ञया भ्रांत लोचनः ॥ विजयस्वार्यपु
त्रेति सोभिभाष्य प्रसाद्य च ॥ आचचक्षे तदाकृतं राक्षसेंद्राय विस्मितः ॥ अमात्यैः सहितैः सर्वैः प्रहस्तः समुपस्थितः ॥
किंचिदासंतिकं कार्यं आचिरत्वात्सुरिहागतः ॥ एवमुक्तस्तु भगवान् निर्जगाम स रावणः ॥ सहामात्यैः प्रहस्तं तु ददर्शादूर
तः स्थितं ॥ सर्वैः समस्त रक्षोभिः मंत्रिभिः कृतनिश्चयः ॥ सभां प्रविश्य विदधे विदित्वा रामविक्रमं ॥ अंतर्धानं तु तच्छीर्षं तच्च कार्मुक
मुत्तमं ॥ जगाम राक्षसेंद्रस्मिन्निर्गते कांते समनंतरं ॥ राक्षसेंद्रस्तु भगवान् निष्क्रम्य कृतसत्वरः ॥ संमंत्रयामास तदा हितैर्मं

त्रि सत्तमं ॥ प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः ॥ ततो ब्रवीत्तोराजा रावणश्चाग्रतः स्थितं ॥ विद्युज्जिह्वं महाजिह्वं समीपप
रिवर्त्तिनं ॥ अग्रतः कुरु सीताया शीघ्रं दाशरथेः शिरः ॥ अवस्थां पश्चिमां भर्त्तुः कृपणा साध्य पश्यतु ॥ एवमुक्तं तु तद्रक्षः तच्छिर
प्रियदर्शनं ॥ उपनिक्षिप्य सीतायाः क्षिप्रमंतरधीयत ॥ रावणश्चापि चिक्षेप भास्वरं कार्मुकं
दा महत् ॥ त्रिषु लोकेषु विख्यातं रामस्यैतदिति ब्रुवन् ॥ सा विद्युज्जिह्वेन शिरः स कार्मुकं विशीर्यमाणं सशरं महीतले
निवेदितस्याः समरे हतं पतिं ततो ब्रवीत्तां भव मे वशानुगां ॥ इत्यार्षे रामायणे युधकांडे मायाशिरोदर्शनं नाम सर्गः ॥ सी
ता सा तच्छिरो दृष्ट्वा तच्च कार्मुक मुत्तमं ॥ नयने मुखवर्णं च पश्यंस्तत्सदृशं शनैः ॥ मुखमिंदुप्रभं सौम्यं भर्त्तुर्वि
मललोचना ॥ केशान् केशांतदेशांश्च तं च चूडामणिं शुभं ॥ श्लिष्टांच सुषुमां चैव पश्यंती रामदर्शनानंतं
था ॥ सकामा खलु कैकेयी अनार्याभिभविष्यति ॥ कुलमुत्सादितं सर्वं यया कलहशीलया ॥ अनार्यांश्च
कैकेय्याः कृतं रामेण विप्रियं ॥ यद्दत्ता दारसंयुक्तो राघवो वनवासिनः ॥ एवमुक्त्वा तु वैदेही वे

रा हरिव्याघ्रा वानराः पादपायुधाः॥ सुग्रीवेश्वरेणैव रामेण परिपालिताः॥ पीनवृत्तभुजः श्रीमान् महोरस्कः प्रतापवान्॥ धन्वी संहननो
रूपवान् भुवि विश्रुतः॥ रक्षितारक्षिता नित्यं आत्मनश्च परस्य च॥ लक्ष्मणेन सह भ्रात्रा कुशली नीतिशास्त्रवित्॥ हंता परबलौघा
नां कुशली हि स लक्ष्मणः॥ हतो राघवः सीते श्रीमान् शत्रुनिबर्हणः॥ अयुक्तबुद्धिहीनेन सर्वभूतविरोधिना॥ इयं तेन नृशंसे
न मायया मायाविना कृता॥ शोकस्ते विहितः सद्यः कल्याणं समुपस्थितं॥ ध्रुवं त्वां भजते लक्ष्मीः प्रियं प्रीतिकरं शृणु॥ संतीर्य सा
गरं रामः सह वानरसेनया॥ सन्निविष्टः समुद्रस्य तीरमासाद्य दक्षिणं॥ सहृष्टः परिपूर्णार्थः काकुत्स्थः समहाबलः॥ प्रे
षिताः सागरांतेषु राक्षसै रूपरूपलक्षिताः॥ तैस्तत्र प्रेषिता गुप्ता हरादूताः सदक्षिणाः॥ प्रवृत्तिस्तैः समानीता रा
भिसारः पुरस्सह॥ एतां श्रुत्वा पृथुश्रोणि प्रवृत्तिं राक्षसाधिपः॥ एष मंत्रयते सर्वैः सचिवैः सह रावणः॥ इति ब्रुवाणा सरमा मैथिलीं
नष्टचेतसं॥ सर्वोद्योगेन योधानां शब्दं शुश्राव दारुणं॥ ताडितायास्तथा भेर्याः श्रुत्वा प्रतिभयं स्वनं॥ उवाच सरमा सीतां इदं म
धुरवादिनी॥ सन्नाहजननी ह्येषा भैरवा भीमवादिनी॥ एनां नदंतीं गंभीरां शृणु तोयदनिस्वनां॥ कल्प्यंते मत्तनागाश्च युज्यंते रथ

वाजिनः॥ तत्र तत्र च सन्नद्धाः संपतंति पदातयः॥ अनीकैः पूर्यते सर्वे राजमार्गः समंततः॥ वेगवद्भिर्महावेगैर्महोर्मिभिरिव साग
रः॥ शस्त्राणीव प्रसन्नानां चर्मणां वर्मणां तथा॥ रथानां भूषितानां च भूषितानां च रक्षसां॥ प्रभां विसृजतां पश्य नाना
समुत्थितां॥ वनं निर्दहते वह्निः यथारूपं विभावसुः॥ घंटानां शृणु निर्घोषं रथानां शृणु निःस्वनं॥ हयानां हेषमाणानां
शृणु तूर्यस्वनं तथा॥ उद्यतायुधहस्तानां राक्षसेंद्रानुयायिनां॥ रक्षसां संभ्रमो ह्येष तुमुलो रोमहर्षणः॥ श्रीस्त्वां भजतु
शोकघ्नी रक्षसामागतं भयं॥ रामात्कमलपत्राक्षाद्दैत्यानामिव वासवात्॥ अवजित्य जितक्रोधस्त्वामचिंत्यपराक्रमः॥ आचि
राद्धि पूर्वेण त्वं कामधिगमिष्यति॥ विक्रमिष्यति रक्षस्सु भर्ता ते सहलक्ष्मणः॥ यथा शत्रुषु शत्रुघ्नो विष्णुना
सह वासवः॥ आगतस्येह रामस्य क्षिप्रमंकगतां सखि॥ अहं द्रक्ष्यामि सिद्धार्थां त्वां शत्रौ विनिपातिते॥ अश्रूण्यानं
दजानि त्वं वर्तयिष्यसि शोभने॥ समागम्य परिष्वक्ता तस्योरसि महात्मनः॥ अचिरान्मोक्ष्यसे सीते विपुलां जघनं
गतां॥ धृतामेकां बहुमासान् वेणीं रामः प्रभाननः॥ तस्य दृष्ट्वा मुखं देवि पूर्णचंद्रमिवोदितं॥ मोक्ष्यसे त्वं हसा

युद्धकांड शोकं निर्मोकमिव पन्नगी ॥ रावणं समरे हत्वा न चिरादेव मैथिली ॥ त्वया समेतः प्रियया राघवोऽधिप्राप्स्यते सुखं ॥ समागता रामायण
त्वं रामेण शोभिष्यसि वरानने ॥ अवर्षं तु सेवम् मही पुनर्वर्षेण मैथिलि ॥ गिरिवरमभितोऽनुवर्तमानो हय इव मण्डलमाशु यः क
१८ रोति ॥ तमिह शरणमभ्युपेहि देवि दिवसकरं प्रभवाव्ययं प्रजानां ॥ इत्यार्षे रामायणे सरमावाक्यं नाम सर्गः ॥ अथ तां
श्री ज्वलितसंतापां तेन वाक्येन मोहितां ॥ सरमा ह्लादयांचक्रे पृथिवीं द्यौरिवांभसा ॥ ततस्तस्या हितं कर्तुं चिकीर्षन्ती हितं
वचः ॥ उवाच काले कालज्ञा स्मितपूर्वाभिभाषिणी ॥ उत्सहेयमहं गत्वा त्वद्वाक्यमसितेक्षणे ॥ निवेद्य सकुशलं रामे प्रतिछ
न्ना निवर्तितुं ॥ न हि मे क्रममाणाया निरालंबे विहायसि ॥ समर्थो गतिमन्वेतुं वायुरप्यति शीघ्रगः ॥ एवं ब्रुवाणां तां सी
ता सरमामब्रवीत्ततः ॥ मधुरं श्लक्ष्णया वाचा स्मितपूर्वमिदं वचः ॥ समर्था गगने गन्तुं अथ वा सुरसातले ॥ अव
गच्छामि कर्तव्यं सर्वं त्वत्स्यादनंतरं ॥ मत्प्रियं यदि कर्तव्यं यदि मे त्वास्थिता तव ॥ वचोऽहं ज्ञातुमि १८
च्छामि किं करोतीति रावणः ॥ राक्षसीभिः सुघोराभिः यो मां रक्षति संनियतः ॥ उद्विग्ना शंकया चास्मि

समयप्राप्तो

त्रिभिः सह ॥ अविदूरस्थिता ह्यस्य बलाध्यक्षा हितैषिणः ॥ अब्रवीत्तानि शम्येव रावणो राक्षसेश्वरः ॥ शीघ्रं भेरीनिनादेन स्फुट
कोणाहतेन मे ॥ समानयध्वं सैन्यानि विमर्शो नास्तु मोऽहिवः ॥ ततस्तथेति प्रतिगृह्य तद्वचः समास्थिता भर्तृहिताय ते
र्न्वताः ॥ बलाधिपास्ते बलयोगमात्मनो जयाय योधाः परिगृह्य धिष्ठिताः ॥ इति आर्षे युद्धकांडे सीतासंमोहनं नाम सर्गः ॥ सी
तेयं मोहितां ज्ञात्वा सरमा नाम राक्षसी ॥ आससाद अथ वैदेहीं प्रियां समयतां सखीं ॥ सा हि तत्र कृता मित्रं सीतया रक्षमा
णया ॥ राक्षसी रावणादिष्टा सानुक्रोशा दृढव्रता ॥ साददर्श सखीं सीतां सरमा नष्टचेतसं ॥ उपवृत्त्योत्थितां
ध्वस्तां वडवामिव पांसुषु ॥ तामुवाच तदा दृष्ट्वा सरमा प्रियवादिनी ॥ मा विषादं वृथा गा अक्षिकुरुष्व जनकात्मजे ॥ उक्ता यद्रा
वणेन त्वं प्रत्युक्तोऽथ त्वया सखि ॥ सखिस्नेहेन तद्भीरु मया सर्वं स्वयं श्रुतं ॥ लीनया गहने शून्ये भयमुत्सृज्य रावणा
त् ॥ तव हेतोर्विशालाक्षि न हि मे जीवितं प्रियं ॥ संभ्रांतश्च प्रतिनिष्क्रान्तो यत् स्माद्राक्षसेश्वरः ॥ तच्च मे विदितं सर्वं
उपनिःक्रम्य मैथिलि ॥ न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः ॥ वधश्च पुरुषव्याघ्रे तस्मिन्नैवोपपद्यते ॥ ते च ब्र

नूनं त्वत्स्वस्थं मनो मम ॥ यद्रूपं मा मनुप्राप्तं मत्शोकवनिकागतां ॥ नांदेच्छामि कथं तस्या निश्चयो वास्य यो भवेत् ॥ निवेदये
था: सर्वं मे परो मे स्याद्नुग्रह: ॥ तामेवं वादिनीं सीतां सरमा वल्गुभाषिणी ॥ उवाच वचनं तस्या: श्रुत्वा सा वाक्यविक्लवा ॥
एष ते यद्भिप्रायस्तस्माद्गच्छामि जानकि ॥ दृष्ट्वा शत्रोरभिप्रायमुपावर्त्तामि मैथिलि ॥ एवमुक्त्वा ततो गत्वा समीपं तस्य रक्षस: ॥
रुश्राव कथितं सर्वं रावणस्य समंत्रिण: ॥ सा श्रुत्वा निश्चयं तस्य निश्चयं च दुरात्मन: ॥ पुनरेवागमा क्षिप्रं अशोकवनिकां
त्रुभां ॥ सा प्रविष्टा ततस्तत्र ददर्श जनकात्मजां ॥ प्रतीक्षमाणा तामेव पद्म हीनामिव श्रियं ॥ तं तु सीता पुन: प्राप्तां सरमां
प्रियवादिनीं ॥ परिष्वज्य च सुस्निग्धं ददौ च स्वयमासनं ॥ इहासीना सुखं सर्वं आख्याहि मम तत्वत: ॥ क्रूरस्य निश्चयं त
स्य रावणस्य समंत्रिण: ॥ उपविष्टा हि सा तत्र आसने स्वर्णभूषिते ॥ वक्तुं वि निश्चयं तस्य रावणस्या पचक्रमे ॥ नो त्सह
स हर्तो मोक्तुं युध्वेत्वाभि ति मैथिलि ॥ समासस्य न्तत्रांसस्य निश्चयो यं सुनिश्चित: ॥ एषा तस्या स्थिरा बुद्धिर्मृत्युभावादुपास्थि
ता ॥ न तेन शक्या त्वं मोक्तुं मानि रक्तेन संयुगे ॥ मां चिंतां कुरु वैदेहि सर्वथा राघव: शरै: ॥ निहत्य रावणं हीते त्वां प्रियामुप

युद्धकांड

१८

लक्ष्यते॥ एतस्मिन्नंतरे शब्दो भेरीशंख समाकुलः॥ राघवस्याभवत्सैन्ये कंपयन् सर्वराक्षसान्॥ ततो महावात समीरि
तेन घोरेण शब्देन समुत्थितेन॥ विषादमागात्सकला महापुरी वनौकसां शब्दमभिध्यमाणा ॥ ॥ आर्षे रामायणे स
रमावाक्यं नाम सर्गः॥ ॥ तेन भेरीनिनादेन शंखनादेन रावणः॥ मुहूर्तं ध्यानमास्थाय सचिवानभ्यवैक्षत॥ अथ
तान्सचिवांस्तत्र सर्वानाभाष्य रावणः॥ जगत्संनादयन्सद्यो नभ्रवीद्राक्षसेश्वरः॥ तरणं सागरस्यास्य विक्रमं बल
संचयं॥ यदुक्तवंतो रामस्य भवंतस्तन्मया श्रुतं॥ तीर्णश्च सागरं रामः सेतुना वानरैः सह॥ अमर्षी सगणः सोयं सा
मान्योन साधीष्यति॥ निर्यांतु राक्षसाः सर्वे निशितायुधपाणयः॥ निहंतु वानरबलं तोचोभौ रामलक्ष्मणौ॥
ततः प्राज्ञो सुहृत्तस्य स्निग्धः माल्यवान्नाम राक्षसः॥ उवाच रावणं मंत्री दक्षो मातो बहुश्रुतः॥ विद्यास्वभिवि
नीतो यो राजा राजनयानुगः॥ स शास्ति परमैश्वर्यं भेरीश्च कुरुते वशे॥ संदधानो हि कालेषु विग्रहं चारिभिः
सह॥ स्वपक्षवर्धनं कुर्वन् महदैश्वर्यमश्नुते॥ हीयमानेन पर्यैष्यो राज्ञा संधिः समेन च॥ न शत्रुरवमंत

रामायण

१८

ध्यं त्वयं कुर्वीत विग्रहं ॥ न च मह्यं रोचते संधिस्त्वया रामेण रावण ॥ यस्य धर्मभयं कारस्य सा सैव सीता प्रदीयतां ॥ न स्याद्देवर्षयः सर्वे
गंधर्वाश्च जयैषिणः ॥ विरोधमागमस्तेन संधिस्ते तेन रोचतां ॥ असृजत् भगवान् पक्षौ द्वावेव हि पितामहः ॥ सुराणां अ
सुराणां च धर्माधर्मान् तदात्मने ॥ धर्मो वै ग्रसते धर्मं ततः कृतमभूद्युगं ॥ अधर्मो ग्रसते धर्मं तत्र त्रेता प्रवर्त्तते ॥ स त्वया
चरता लोके धर्मो निरस्तः पुरा ॥ अधर्मः प्रगृहीतश्च तेनास्मत्तमसा वृतः ॥ संप्रमादाद्विवृद्धस्ते धर्मो रामव्यपाश्रय ॥
विवर्धयति पक्षं स सुराणां सुरभावतः ॥ विषयेषु प्रसक्तेन यत्किंचित्कारिणा त्वया ॥ ऋक्षाणामग्निकल्पानां उद्वेगो
जनितो महान् ॥ ते सं प्रतिदुराधर्षाः प्रदीप्ता इव पावकाः ॥ तपसा भावितात्मानो धर्मस्यानुग्रहे रताः ॥ अविघ्नेन यजन्ते
च यज्ञैस्तैस्तैर्हि जातयः ॥ जुह्वत्यग्नींश्च विधिवद्वेदांश्चोच्चैरधीयते ॥ अभिभूय च रक्षांसि ब्रह्मघोषान्निनादयन् ॥
दिशो विप्रथते सर्वाः स्तनयित्नुरिवोष्णगे ॥ ऋषीणामग्निकल्पानामग्निहोत्रसमुत्थितं ॥ आदत्ते रक्षसां तेजो
धूमो व्याप्नुवन् जगत् ॥ तेषु तेषु च देशेषु पुण्येषु सुदृढव्रतैः ॥ चर्यमाणं तपस्तीव्रं संतापयति राक्षसान् ॥ उत्पाता

न् उधतान् दृष्ट्वा घोरान् बहुविधान् बहून् ॥ विनाशमनुपश्यामि सर्वेषां राक्षसानां प्रभूतू ॥ खराभस्तनिता घोरा मेघाः प्र
तिभयंकराः ॥ शोणितेनाभिवर्षंति लंकामुष्णेन सर्वदा ॥ बलतां वाहनानां च प्रपतंत्यश्रुबिंदवः ॥ ध्वस्ता व्यस्तो विव
१८ र्णाश्च न प्रभांति यथापुरा ॥ सर्वं नष्टप्रियं मन्ये सैन्यं ते राक्षसेश्वर ॥ विष्णुं रामं अहं मन्ये मानुषं देहमाश्रितं ॥ नसमानुषमात्रो वै
राघवो दृढविक्रमः ॥ येन बद्धः समुद्रस्य ससेतुः समहाद्भुतः ॥ कुरुष्व नरराजेन संधिं रामेण रावण ॥ पत्व प्रातर्निविष्टास्ति ह
नुमुक्तोग्निशाकर ॥ सीता कृते महाप्राज्ञ महद्भयमुपस्थितं ॥ नयेमानि निमित्तानि लक्ष्मसे राक्षसेश्वर ॥ बिडालागामायवो गृ
ध्राः वासंति च सुभैरवं ॥ प्रविश्य लंकां समये समवायश्च वर्तते ॥ कालश्चास्त्री पांडुरैर्दंतैः प्रहसंत्यग्रतः स्थिता ॥ रथ्यासु वाजके
र्निसि बहुशः परिक्रमेत ॥ गृहेषु बलिकर्माणि श्वेताः पर्य्युपभुंजते ॥ खरा गोषु प्रजायंते मूषिका नकुलेषु च ॥ मार्जाराः
द्वीपिभिः सार्धं सूकराः श्वभिः समं ॥ किंनरा राक्षसैश्चैव समेताश्चारणैः सह ॥ पांडुरा रक्तपादाश्च विहगाः काल १८
चोदिताः ॥ राक्षसानां विनाशाय कपोतारूढचारिणः ॥ चीचीकूची वासंति सारिका वेश्मसुस्थिताः ॥ पतंतिव्यथि

नाश्चैव निर्जिताः कच्चिहैषिणः ॥ कराळो विकटो मुंडः पुरुषः कृष्णपिंगलः ॥ रक्षोगृहाणि सर्वाणि काले काले न्ववेक्षते ॥ अ
सुग्रीवं हि प्रपश्यामि युध्यमानं द्विजोर्हृजाः ॥ क्रव्यादा भक्षयिष्यंति मां सानुगं जयार्जितं ॥ इदं यच सत्त्रं निवेद्य माल्येवान्
परीक्ष्य रक्षोधिपतेः स्थितो यतः ॥ अनुत्तमे पूतम पूरुषावळी बभूव तूष्णीं समवेक्ष्य रावणं ॥ स तद्वचो माल्यवतोभिभाषि
तं दशाननो न प्रशशंस मोरर्थ्यतः ॥ भृशं जगर्हे च सदुष्टमानसो मुमूर्षुरन्यच्च वचोभ्युदीयत ॥ इत्यार्षे रामायणे युद्धकां
डे माल्यवद्वाक्यं नाम सर्गः ॥ न तन्माल्यवतो वाक्यं हितमुक्तं दशाननः ॥ नामर्षवशं तं दुष्टात्मा कालस्य वशमागतः ॥
स बद्ध्वा भ्रुकुटीं वक्त्रे क्रोधस्य प्रतिलक्षण ॥ अमर्षात्परिवृत्ताक्षो माल्यवंतमथाब्रवीत् ॥ हितबुध्या तु यद्दिंत
न पौरुषमुच्यते ॥ परपक्षं प्रशास्यैवं न नतु श्रोत्रसुखं मम ॥ मानुषं कृपणं रामं एकं शाखामृगाश्रयं ॥ समर्थं मन्यसे
केन सक्तं पित्रावनाश्रयं ॥ रक्षसामीश्वरं मां च देवतानां भयंकरं ॥ अहीनं मन्यसे येन हीनं मां सत्त्वविक्रमैः ॥ वीरद्वेषेण
नात्रोंकेपक्षपातेन वा रिपोः ॥ त्वयाहं परुषाण्युक्तः परप्रोत्साहनेन वा ॥ प्रभवंतं पदस्थं हि परुषं कोभिधास्यति ॥ पंडि

युधकाड

वा॰रामाय
ण

त॰ रास्यत्वज्ञोधिनाशो सानादुरु ॥ आदायलुवना स्तीतांपद्महीनामिव श्रियं ॥ किमर्थं प्रतिदास्यामि राघवाय भयादिह ॥ वृतं वान

रकोटीभिः ससुग्रीवं सलक्ष्मणं ॥ पश्यके श्चिदहोभिस्त्वं निहतं राघवं मया ॥ द्वंद्वे यस्य न तिष्ठंति दैवता अपि संयुगे ॥ रा

२० वणो मानुषं प्राप्य भयमाहारयेत्कथं ॥ द्विधाभज्येयमप्येवं न नमेयं तु कस्यचित् ॥ एष मे सहजो दोष स्वभावो दुरतिक्र

मः ॥ यदि तावत्समुद्रस्य सेतुर्बद्धो यदृच्छया ॥ रामेण विस्मयः कोत्र येन ते भयमागतं ॥ कामं रामद्रु हो तीर्णं सहवानरसे

नया ॥ प्रतिजानामि ते सर्वं न जीवन् प्रतियास्यति ॥ एवं तं संरब्धं क्रुद्धं विज्ञाय रावणं ॥ व्रीडितो माल्यवान् तूर्णं त बुबं

स्मादेशादपाक्रमत् ॥ जयाशिषाच्च राजानं वर्धयित्वा यथोचितं ॥ माल्यवानभ्यनुज्ञातो जगाम स्वं निवेशनं ॥ रावणस्तु

सहामात्यैर्मंत्रयित्वा विमृश्य च ॥ लंकायामतुलां गुप्तिं कारयामास राक्षसः ॥ प्रहस्तं व्यादिदेशाथ पूर्वद्वारे ऽरिसूदनं ॥

दक्षिणे तु महावीर्यौ महापार्श्वमहोदरौ ॥ पश्चिमे तु तथा द्वारे पुत्रमिंद्रजितं स्वयं ॥ व्यादिदेश महामायं राक्षसैर्बहुभिर्वृतं ॥ २०

[illegible]२ उत्तरे चापि च द्वारे व्यादिश्य शुकसारणौ ॥ स्वयमत्र भविष्येहमिति तान्मंत्रिणोब्रवीत् ॥ एवं विधानं लंकायां कृत्वा राक्ष

सपुंगवः॥ कृतार्थंमन्यते सानं ष्कृ कृतांतवशमागतः॥ राक्षसं तु चिरूपाक्षं महाबलपराक्रमं॥ मध्येयं संस्थापयामास ब
हुभिः सह राक्षसैः॥ विसर्जयामास ततः समंत्रिणो विधानमाज्ञाप्य पुरस्य पुष्कलं॥ जयाशिषामंत्रिजनेन पूजितो
जगाम सोंऽतःपुरमृद्धिमत्तदा॥ इति श्रीरामायणे युद्धकांडे लंकाविधानं नाम सर्गः॥ ॥ नरवानरराजो तु सनु वा
लिः युसुगः कपिः॥ जांबुवान् ऋक्षराजश्च रावणावरजस्तथा॥ अंगदो द्विविदो मैंदो लक्ष्मणो नील एव च॥ अभित्र
चिषये प्राप्ता समवेता अमंत्रयन्॥ इयं सा लक्ष्यते लंका पुरी रावणपालिता॥ मानुषासुरसंघर्षैः रसोंश्चापि दुर्जया॥ पूर्या रै
मे वांविधायां तु मंत्रयित्वा विनिर्जये॥ नित्यं संनिहितो ह्यत्र रावणो राचयन्त्रिजोः॥ तथा तेषु ब्रुवाणेषु रावणावरजो ब्रवीत्॥
वाक्यं हेत्वर्थसंयुक्तं पुष्कलार्थो विभीषणः॥ अनलश्च हरश्चैव संपातिः प्रघसस्तथा॥ गत्वा लंकाममा साम पुरीं पुनरिहागा
ताः॥ भूत्वा शकुनयः सर्वे प्रविष्टास्ते महापुरीं॥ विधानं विहितं यत्तु दृष्ट्वा तत्समुपास्थिताः॥ संविधानं यदाहुस्ते रावण
स्य दुरात्मनः॥ राजंस्तैः कथितं सर्वैः यथातथ्यं च तत्छृणु॥ पूर्वं प्रहस्तो बलवान् द्वारमाश्रित्य तिष्ठति॥ दक्षिणं तु महा
वीर्यौ महापार्श्वमहोदरौ॥ इंद्रजित् पश्चिमद्वारं राक्षसैर्बहुभिर्वृतः॥ ~~उत्तरमद्वारं~~ पट्टिसासि धनुष्माणि शरासिनोर

युद्धकांड बणाय लजः॥ राक्षसानां सहस्रैस्तु सहस्रैर्बहुभिर्वृतः॥ उत्तरं नगरद्वारं रावणः स्वयमास्थितः॥ विरूपाक्षस्तु महता शूलशक्ति वा० रामाय ण
धनुष्मता॥ बलेन राक्षसैः सार्धं मध्यमं गुल्ममाश्रितः॥ एतामेवंविधां गुप्तिं लंकायां समुदीक्ष्यते॥ मामकाः सचिवाः सर्वे शी
२१ घ्रं पुनरुपागताः॥ सहस्रं कुंजराणां तु रथानामयुतं तथा॥ हयानां चायुतं तत्र समग्रा कोटिरक्षसां॥ विक्रांता बलवंतश्च
संग्रामेष्वभिवर्त्तिनः॥ इष्टा राक्षसराजस्य नित्यमेव निशाचराः॥ एकैकस्यत्रु युद्धार्थे राक्षसस्य विशांपते॥ परिवारस ल
हस्राणां सहस्रमुपतिष्ठते॥ एता प्रवृत्तिं लंकायां मंत्रिप्रोच्य विभीषणः॥ रामं कमलपत्राक्षमिदं पुनरुवाच ह॥ कु
बेरं तु यदा राम रावणः प्रत्ययुध्यत॥ षष्टिःशतसहस्राणि तदा निर्यांति राक्षसां॥ पराक्रमेण वीर्येण तेजसा सत्वगौरवात्॥
सदृशान्यस्य सर्वाणि रावणस्य दुरात्मनः॥ अत्र मन्युर्न कर्त्तव्यो रोषायत्वां विभीषये॥ समर्थो ह्यसि वीर्येण सुराणामपि
साधये॥ तद्भवान्हरिवीराणां बलेन महता वृतः॥ विक्षोभ्य राक्षसीं सेनां निर्वधिष्यति रावणं॥ रावणावरजे वाक्यमे
वं कुर्वति राघवः॥ शत्रूणां प्रतिबेधार्थे इदं वचनमब्रवीत्॥ कपीनामुग्रवीर्याणां सहस्रैर्बहुभिर्वृतः॥ नीलः प्रहस्तं
प्लवगो राक्षसं प्रति बाधतां॥ अंगदो वालिनः पुत्रो बलेन महता वृतः॥ दक्षिणे बाधतां द्वारे महापार्श्वमहोदरौ॥ २१

चरं ॥ मंत्रज्ञानरूपं च मधुरश्लक्ष्णया गिरा ॥ सुवेलं साधु शैलेंद्रमिमं धातुशतैश्चितं ॥ अधिरोहामहे सर्वे वत्स्यामोत्र
निशामिमां ॥ लंकां चालोकयिष्यामि निलयं रावणस्य च ॥ येन मे जीवितांताय हृता भार्या यशस्विनी ॥ येन धर्मो न विज्ञातो
न कुलं कुलशालिना ॥ राक्षस्या नीचया बुद्ध्या येन तद्गर्हितं कृतं ॥ तस्मान्मे वर्धते रोषः स्मृत्वा तं पापराक्षसं ॥ यस्यापचा
रान्नीचस्य सर्वान्धक्ष्यामि राक्षसान् ॥ बाणैर्वज्राशनिप्रख्यैस्तुरगानिव वासवः ॥ एकस्तु कुरुते पापं कालपाशवशंग
तः ॥ नचात्म्यात्मापचारेण कुलं येन विनश्यति ॥ एवं संवर्णयन्नेव संक्रुद्धो रावणं प्रति ॥ रामः सुवेलमारुह्य हृष्टः सार्धं
कृतभावनः ॥ पृष्ठतो लक्ष्मणश्चैनमन्वगच्छत्समाहितः ॥ सशरं धनुरुद्यम्य सुमहद्विक्रमे रतः ॥ अन्वारोहत सुग्री
वः सामात्यः सविभीषणः ॥ हनुमानंगदो नीलो मैंदो द्विविद एव च ॥ गजो गवाक्षो गवयः शरभो गंधमादनः ॥ पनसो
कुमुदश्चैव रंभश्च हरियूथपः ॥ एते चान्ये च बहवो वानराः शीघ्रविक्रमाः ॥ अन्वारोहन् जवोदग्राः शतशो

महाशिलाः ॥ ततः सुवेलमारुह्य समासीनः सह वानरैः ॥ निषसाद गिरेस्तस्य शृंगे समे शिलातले ॥ ततः कपिग
णाः सर्वे समारुह्य त्रियोजनं ॥ आरोहत सुवेलं तु प्लवंता दक्षिणामुखाः ॥ ते वायुवेगप्रवणाः तं गिरिं गिरिचारिणः ॥
अध्यारोहंत शतशः सुवेलं यत्र राघवः ॥ ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः ॥ ददृशुः शिखरात्तस्माद्वि
ग्नामिव तां पुरीं ॥ तां शुभ्रप्रामिव द्वारां प्राकारवरशोभितां ॥ लंकां राक्षससंपूर्णां ददृशुः हरियूथपाः ॥ प्राकार
चयसंस्थैश्च तथा नीलैर्निशाचरैः ॥ ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतं ॥ ते दृष्ट्वा वानराः सर्वे राक्षसान्यु सा
द्धकांक्षिणः ॥ मुमुचुर्विपुलान्नादान् तत्र रामस्य पश्यतः ॥ ततोस्तमगमत्सूर्यः संध्यया प्रतिरंजितः ॥ पू
र्णचंद्रप्रदीपा सा क्षपा समभिवर्तत ॥ सचंद्रग्रहनक्षत्रं नभो दृश्यत सागरे ॥ द्वितीयमिव चाकाशं सचंद्रग्रहमा

रामायण
२२

रक्तं ॥ ततः स रामो हरिवाहिनीपतिः विभीषणश्चर्क्षपतिश्च जांबुवान् ॥ सलक्ष्मणो यूथपयूथसंवृतः सुवेलपृष्ठेन्यव युधकांड
सद्यथासुखं ॥ इत्यार्षे श्रीरामायणे युद्धकांडे सुवेलारोहणं नाम सर्गः ॥ ॥ तां रात्रिमुषितास्तत्र सुवेले हरियूथपाः ॥
लंकायां ददृशुर्दूरात् द्वाराण्युपवनानि च ॥ समसौम्यानि रम्याणि विशालान्यायतानि च ॥ दृष्टिरम्याणि ते दृ
ष्ट्वा बभूवुर्जातविस्मयाः ॥ चंपकाशोकबहुलां शालतालवनाश्रयां ॥ तमालवनसंछन्नां नागमालिकसंयुतां ॥ हिं
तालैरर्जुनैः सर्जैः सप्तपर्णैश्च पुष्पितैः ॥ तिलकैः कर्णिकारैश्च तथा पाटलिविद्रुमैः ॥ शुशुभे पुष्पिताग्रैश्च लता
परिगतैर्द्रुमैः ॥ लंका काननकैः पुष्पैः यथेंद्रस्यामरावती ॥ विचित्रकुसुमोपेतैः रक्तपल्लवकोमलैः ॥ शाद्वला
नि च नीलानि विचित्रा वनराजयः ॥ जालकं मंजरीपुष्पं फलं किसलयानि च ॥ धारयंति नगास्तत्र नानाह
वविभूषणं ॥ तच्चैत्ररथसंकाशं मनोज्ञं नंदनोपमं ॥ वनं सर्वर्तुकं रम्यं शुशुभे षट्पदाकुलं ॥ दात्यूहकेय २२

हनूमान् पश्चिमं द्वारं संपीड्य पवनात्मजः ॥ निविशतु अप्रमेयात्मा कपिभिर्बहुभिर्वृतः ॥ दैत्यदानवसंघानां ऋषीणां च म
हात्मनां ॥ विप्रकारप्रियः क्षुद्रो वरदानबलान्वितः ॥ परिक्रामति यः सर्वान् लोकान् संतापयन् प्रजाः ॥ तस्याहं राक्षसरा
जस्य रावणस्य वधे धृतः ॥ उत्तरं नगरद्वारं अहं सौमित्रिणा सह ॥ निपीड्योपगमिष्यामि रावणो यत्र राक्षसः ॥ वानरेंद्र
श्च बलवान् ऋक्षराजश्च जांबवान् ॥ राक्षसेंद्रानुजश्चैव गुल्मो भवतु मध्यमः ॥ न चैवं मानुषं रूपं कपिभिः कार्यमाहवे
इरयंतु युधेतु संज्ञावै वानरे बले ॥ वानराश्चैव चिह्नं नः स्वजनेस्मिन् भविष्यति ॥ वयं तु राक्षसां मध्ये समयाल्स्यामहे जनाः ॥
अहं चैव सह भ्रात्रा लक्ष्मणेनामितौजसा ॥ आत्मना पंचमश्चायं सखा मम विभीषणः ॥ सर्वकार्यसमृद्ध्यर्थं एवमुक्त्वा
विभीषणं ॥ सुवेलारोहणे बुद्धिं चकार मतिमांस्तदा ॥ ततः स रामो हतबलेन प्रबाध्य सर्वां पृथिवीं महात्मा ॥ प्रहृष्टरू म
पो जगाम लंकां विभीषणं चाग्रतो नियुज्य ॥ इत्यार्षे श्रीरामायणे युद्धकांडे सैन्यप्रविभागचिंता नाम सर्गः ॥ श्रीर
स कृत्वा तु सुवेलस्य बुद्धिमारोहणं प्रति ॥ लक्ष्मणानुमतो रामः सुग्रीवमिदमब्रवीत् ॥ विभीषणं च धर्मज्ञमनुरक्तं निशा पिद

राहांश्चमहिषाः साभमृगाः ॥ तेनशब्देनवित्रस्ताः जग्मुर्भीताः दिशोदश ॥ शिखरंसंनिकृष्टस्तु श्रीकृष्टकाननस्य
गः ॥ समंताद्द्रुमसंछन्नः महाजलदसंनिभः ॥ श्वेतश्चार्धेसुविस्तीर्णोविभ आदिसंगश्रमः ॥ श्लक्ष्णः श्रीमान्महां
श्चैवदुष्प्रापः शकुनेरपि ॥ मनसापिदुरारोहः सचालः किमुकर्मणा ॥ निविष्टायस्यपुरीरवरलंकारावणपालिता ॥
सापुरगोपुरैश्चित्रैर्विविधाकारतोरणैः ॥ कांचनेनचजालेन राजतेनच शोभिता ॥ प्रासादैश्चविमाने
श्चलंकापरमशोभिता ॥ घनैरिवातपापायेमध्यमंवैष्णवंपदं ॥ यस्यास्तंभसहस्रेण प्रासादः सर्वकाञ्चनः ॥ कै
लाससिखराकारोदृश्यतेखमिवोल्लिखन् ॥ चैत्यः सराक्षसेंद्रस्य रावणस्यदुरात्मनः ॥ शतेनरक्षसांनि
त्यः समग्रेणलक्ष्यते ॥ तांसमृद्धांसमृद्धार्थी लक्ष्मीवान्लक्ष्मणाग्रजः ॥ रावणस्यपुरींरामोदद्दर्शसहवानरैः
तांरत्नपूर्णांबहुसंविधानांप्रासादमालाभिरलंकृतांच ॥ पुरींमहायंत्रकपाटमुख्यांददर्शरामः सहितोबले

न ॥ इतिश्रीरामायणेयुद्धकांडेलंकावलोकनोनामसर्गः ॥ अथतत्रनिमित्तानिदृष्ट्वालक्ष्मणपूर्वजः ॥ ल
क्ष्मणंसंपरिष्वज्यवचोवदद्दरक्षितः ॥ प्राधिगाद्योदकंतूर्णंवनानिफलवंतिच ॥ बलंचविभज्येदंव्यूह्यति
ष्ठेमलक्ष्मण ॥ लोकक्षयकरंभीमंभयंपश्याम्युपस्थितं ॥ निबर्हणंप्रवीराणामृक्षवानररक्षसां ॥ वा
ताश्चपरुषावांतिकंपतेचवसुंधरा ॥ पर्वताग्राणिवेपंतेनर्दंतिधरणीधराः ॥ मेघाः क्रव्यादसंकाशाः
परुषाः परुषस्वनाः ॥ आदित्यपथमाश्रित्य जनयंतोमहद्भयं ॥ क्रूराः क्रूरंप्रवर्षंतिमिश्रंरुधिरबिंदुभिः ॥
रक्तचंदनसंकाशासंध्यापरमदारुणा ॥ ज्वलच्चनिपतत्येतदादित्यादग्निमंडलं ॥ दीनादीनस्वराघोराश्च
प्रशस्तामृगद्विजाः ॥ रजन्यामप्रशस्ताश्चसंतापयंतिचद्रुमाः ॥ कृष्णारक्तांतपर्यंतोयथालोकस्य

यु॰ कांड
२५

पर्ययौ ॥ रूक्षो रूक्षः प्रतापश्च परिवेषः सुलोहितः ॥ आदित्यमंडले नीलः पश्य लक्ष्मण दृश्यते ॥ चंद्रमा नयथा
वर्त्तिनि नक्षत्राण्यभिपद्यते ॥ युगांत इव लोकानां पश्य लक्ष्मण दृश्यते ॥ कंकाः श्येनास्तथा गृध्राः नी
चैः परिचरंति च ॥ शिवाश्चाप्यशिवा वाचः प्रवदंति महास्वनाः ॥ तूर्णमद्य दुराधर्षां पुरीं रावणपालितां ॥ अभि
यामो जवेनैव सर्वतो हरिभिर्वृताः ॥ इत्येवं तु वदन्वीरो लक्ष्मणं लक्ष्मणाग्रजः ॥ तस्मादवततारासु पर्वताग्रान्महा
बलः ॥ अवतीर्य तु धर्मात्मा तस्माच्छैलात्स राघवः ॥ परैरधृष्यमक्षोभ्यं ददर्श बलमात्मनः ॥ संनह्य तु ससु
ग्रीवं रामो मुहूर्त्ते ॥ प्रतस्थे पुरतो धन्वी लंकामभिमुखं पुरीं ॥ तं विभीषणसुग्रीवौ हनूमान् जांबुवा
न्नलः ॥ ऋक्षराजो गदो नीलो लक्ष्मणश्चान्वयुस्तदा ॥ ततः पश्चात्सुमहती पृतनर्क्षवनौकसां ॥ प्रच्छाद्य
महतीं भूमिमनुयाति स्म राघवं ॥ शैलशृंगाणि शतशो प्रवृद्धांश्च महीरुहान् ॥ जगृहुः कुंजरप्रख्याः वा

हरि
भि

व

र्षट्पदैर्नदद्भिः समेतेष्व बर्हिणः ॥ तथा परभृतेश्चैव रुतरुतैर्महन्महत् ॥ तानि मत्तविहंगानि भ्रमराचरितानि
च ॥ भृंगराजाभिलीनानि कुररोपसेवितानि च ॥ कोकिलाक्रोचविघुष्टानि सारसाभिरुतानि च ॥ विविक्तस्थलवृत
सानि वनान्युपवनानि च ॥ प्रहृष्टा मुदिता वीरा हरयः कामरूपिणः ॥ तेषां निवसतां तत्र वानराणां महौजसां ॥
पुष्पसंसर्गसुरभिर्ववौ घ्राणसुखोऽनिलः ॥ तेषां निवेशस्तत्र सीत्वधिभागे रत्नेकरा ॥ अंकं पर्यस्तलंकाः तानि
नादैर्नदंतां करः ॥ सम्पाद्रिश्च तथा यूथैर्महीश्चरणपीडिता ॥ उत्पपात रजश्चोर्ध्वं कपोतारुणसन्निभं ॥ अन्ये
तु हरिवीराणां विक्रांता हरियूथपाः ॥ सुग्रीवेणाभ्यनुज्ञाताः लंकां जग्मुः वनौकसः ॥ वित्रासयंतो विहगां
स्त्रासयंतो मृगाद्विपान् ॥ आस्फोटयंतो लांगूलं सर्वे रणसमुत्सुकाः ॥ कल्पयंतश्च फलकायावनान्युपव
नानि च ॥ ते गच्छंतो महायूथैर्महीं चरणपीडितां ॥ सत्वनं चरणोत्क्षिप्ता चकंपे च समंततः ॥ ऋक्षाः सिंहाव

रामायण

२५

नरा वाहनशालिनः ॥ नेतदीर्घेण कालेन रामः सुग्रीवलक्ष्मणाः ॥ रावणस्य पुरीं लंकां आसेदुः सुदुरासदां ॥ पताका
मालिनीं रम्यां उद्यानशतशोभितां ॥ चित्रवप्रां सुदुःप्रायां उच्चप्राकारतोरणां ॥ तां सुरैरपि दुःप्रधर्ष्यां दृष्ट्वा रामप्र
प्रचोदितां ॥ यथानिवेशं संपीड्य न्यवसंत वनौकसः ॥ द्वितीये योजनमाक्रम्य मंडलं वानरबलं ॥ परिक्षिप्य त
दा लंकां युद्धायाभिससार ह ॥ लंकायास्तु न संहारं शैलशृंगमिवोन्नतं ॥ रामः सहानुजो धन्वी जुगोप च रुरो
ध च ॥ लंकामुपनिविष्टे तु रामे दशरथात्मजे ॥ लक्ष्मणानुचरे वीरे व्यथिताः सर्वराक्षसाः ॥ नान्यो रामा
धिलक्ष्यं समर्थः परिरक्षितुं ॥ रावणाधिष्ठितं ताधि वरुणेनैव सागरं ॥ राक्षसैः सायुधैः स्वग्रैरभिगुप्तसमं
ततः ॥ वीर्यविक्रमसंपन्नैः पातालमिव दानवैः ॥ राक्षसैर्विविधाकारैः रूक्ष रूक्षमे साम हीच मूः ॥ समंताद्बहु
भिगुप्तासपैर्भोगवतीयथा ॥ चिरास्तानि च योधानां बहूनि विविधानि च ॥ नस्यामावुधजातानि चित्रा

णिदश्रोतस॥ पूर्वद्वारं आररक्ष नीलोहरिचमूपतिः॥ मैंदश्च द्विविदश्चोभो श्च॥ ग्निमिवारुणं॥ अंगदोदक्षि
क्षिणंद्वारं जग्राह ष्ठलनावलः॥ ऋषभेणगवाक्षेण गजेनपनसेनच॥ हनूमान्पश्चिपश्चिमंद्वारं ररक्षबलवान्
कपिः॥ प्रघसश्चप्रमाथीचयत्रास्यसचिवाकुमौ॥ मध्यमेच स्वयंगुल्मे सुग्रीवः समतिष्ठत॥ सहसर्वैकपि
श्रेष्ठैः सुवर्णचसनोपमैः॥ वानराणांच षट्त्रिंशत् कोट्यः स्ताः सहयूथपैः॥ निष्पीड्योपनिविष्टाश्च सु
ग्रीवोयत्रवानरः॥ शासनात्तस्थरामस्य सुग्रीवःसविभीषणः॥ द्वारे द्वारेप्लवंगानां कोटिकोटिंनिवेशयत्॥ पश्चिमे
नतुरामस्यसुग्रीवःसजांबुवान्॥ अदूरमध्यमेगुल्मे तस्थोबहुबलानुगः॥ तेतुवानरशार्दूला शार्दूलाइवदं
ष्ट्रिणः॥ गृहीत्वाद्रुमशैलांश्च प्रहृष्टायोद्धुमुद्यताः॥ सर्वेविकृतलांगूलाः सर्वेदंतनखायुधाः॥ सर्वेविकृतविवर्णा

तेनशब्देनमहतासप्राकारासतोरणा॥ लंकाप्रमथितासर्वारक्षसांचागतंभयं॥ रामलक्ष्मणगुप्तासासुग्रीवेणचवाहिनी॥
बभूवदुर्धर्षतमासर्वैरपिसुरासुरैः॥ राघवस्तुनिवेश्यैवसैन्यंस्वंरक्षसांवधे॥ संमंत्र्यमंत्रिभिःसार्धंनिश्चित्यचपुनः
पुनः॥ आनंतर्यमभिप्रेप्सुः क्रमयोगार्थतत्ववित्॥ विभीषणस्यानुमतेराजधर्ममनुस्मरन्॥ अंगदंवालितनयंसमाहूयाब्रवी
द्वचः॥ गच्छसौम्यदशग्रीवंब्रूहिमद्वचनादिदं॥ लंघयित्वापुरींलंकांभयंत्यक्त्वागतव्यथः॥ भ्रष्टैश्वर्यगतश्रीकमुमूर्षेनष्टचे
तस॥ ऋषीणांदेवतानांचगंधर्वाप्सरसांतथा॥ नागानामथयक्षाणांराज्ञांचरजनीचर॥ यच्चपापकृतंमोहादवलिप्ते
नराक्षस॥ नूनंतेव्यपगतोदर्पः स्वयंभूवरदानजः॥ तस्यदंडधरस्तेहंभार्याहरणकर्शितः॥ दंडंधारयमाणस्तुलंकाद्वारेव्यवस्थि
तः॥ पदवींदेवतानांचमहर्षीणांचराक्षस॥ राजर्षीणांचसर्वेषां॥ गमिष्यसियुधिस्थिर॥ बलेनयेनमेसीतांमायया
राक्षसाधम॥ मामतिक्रामयित्वात्वंहृतवांस्तद्विदर्शय॥ अराक्षसमिमंलोकंकर्तास्मिनिशितैःशरैः॥ नचेच्छरणमभ्ये

षिमामुपादायमैथिलीं॥ लंकैश्वर्यंपरित्यज्यहत्वाराज्योहृताशनः॥ रक्षस्वजीवितंमूढममनिर्यासमैथिलीं॥ ध
र्मात्मारक्षसांश्रेष्ठः संप्राप्तोयंविभीषणः॥ लंकैश्वर्यमहद्धीमान्मत्कृतःपालयिष्यति॥ नहिराज्यमधर्मेणभोक्तुं
क्षणमपित्वया॥ शक्यंमूर्खसहायेनपापेनाविजितात्मना॥ युध्यस्ववाधृतिंकृत्वाशौर्यमालंब्यराक्षस॥ म
च्छरैस्त्वंरणेशांतस्ततःपूतोभविष्यसि॥ यद्याविशसिलोकांस्त्रीन्पक्षीभूत्वामनोजवः॥ ममचक्षुःपथं
प्राप्यनमेजीवन्विमोक्ष्यसे॥ ब्रवीमित्वांहितंवाक्यंक्रियतामौर्ध्वदैहिकं॥ सुदृष्टःक्रियतांलोकोजीवितंमयिसं
स्थितं॥ इत्युक्तःसतुतारेयोरामेणाक्लिष्टकर्मणा॥ जगामाकाशमाविश्यमूर्तिमानिवहव्यवाट्॥ सोभिपत्यमु
हूर्तेनश्रीमद्रावणमंदिरं॥ ददर्शासीनमस्वस्थंरावणंसचिवैःसह॥ ततस्तस्याविदूरेसन्निपत्यहरिपुंगवः॥
दीप्ताग्निसदृशस्तस्थावंगदःकनकांगदः॥ तद्रामवचनंसर्वमन्यूनाधिकमुत्तमं॥ सामात्यंश्रावयामासनिवेद्या

क्रमात्मना ॥ दूतोहं कोसलेंद्रस्य रामस्याक्लिष्टकर्मणः ॥ वालिपुत्रोंगदोनाम यदि ते श्रोत्रमागतः ॥ आह त्वां राघवो रा
मः कोसल्यानंदवर्धनः ॥ निःसृत्य युध्यस्व नृशंस पुरुषो भव ॥ हंताहं त्वां सहामात्यं सपुत्रज्ञातिबां
धवं ॥ निरुद्विग्नास्त्रयो लोकाः भविष्यंति हते त्वयि ॥ न चेत् सत्कृत्य वैदेही प्रणिपत्य प्रदास्यसि ॥ इत्येवं परु स
षं वाक्यं ब्रुवाणे हरिपुंगवे ॥ अमर्षवशमापन्नो निशाचरगणेश्वरः ॥ ततो रोषाभिताम्राक्षः शशास सचिवांस्तदा ॥
गृह्यतामेष दुर्मेधा वध्यतामपि वाऽसकृत् ॥ नैरोलेशृंग वचाणं अग्निमिव धूममिवांगदं ॥ आललंबुस्ततो घोराश्च
त्वारो रजनीचराः ॥ ग्राहयामास तारेयः स्वयमात्मानमात्मना ॥ बलं निदर्शयन् वीरो निशाचरगणे तदा ॥ स तान्
बाहुद्वये सक्तान् आदाय पतगानिव ॥ प्रासादं शैलसंकाशं उत्पपातांगदस्तदा ॥ तेंतरिक्षाद्विनिर्धूतास्तस्य वे
गेन राक्षसाः ॥ भूमौ निपतिताः सर्वे तदा निश्चेष्टजीविताः ॥ प्रासादशिखरं श्रीमदंगदस्तु पदाहनत् ॥ उत्पपात
पदाक्रांतं दशग्रीवस्य पश्यतः ॥ भंक्त्वा प्रासादशिखरं दशग्रीवस्य पश्यतः ॥ नाम विश्राव्य चात्मनः ॥ आस्फो २८

णाः सर्वे च विकृताननाः ॥ दशनागबलाः केचित् केचिद्दशगुणोत्तराः ॥ केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ संति
चौघबलास्तत्र ॥ यथा वायुबलोपमाः ॥ अप्रमेयबलाश्चान्ये तत्रासन् हरियूथपाः ॥ अद्भुतश्च विचित्रश्च तेषामासीत्स
मागमः ॥ तत्र वानरसैन्यानां शलभानामिवोद्गमः ॥ प्रतिपूर्णमिवाकाशं संछन्नेव च मेदिनी ॥ लंकां प्रगतैश्चैव भि
संपतद्भिश्च वानरैः ॥ शतं शतसहस्राणां पृथगृक्षवनौकसां ॥ लंकाद्वाराण्युपाजग्मुरन्ये जग्मुः समंततः ॥ अन्ये च
न्ये पुरे शेषु सन्यस्ताः सुमहाबलाः ॥ संक्राम्यत गिरिः सर्वैस्तैः समं वानरौकसैः ॥ अयुतानां सहस्रं तु लंकां समभि
वर्तत ॥ वानरैर्बलवद्भिश्च बभूवद्रुमपाणिभिः ॥ सर्वतः संवृता लंका दुःप्रवेशापि वायुना ॥ राक्षसा विस्मयं जग्मुः
सहसाभिनिपीडिताः ॥ वानरैर्मेघसंकाशैः शक्रवीर्यपराक्रमैः ॥ सहस्रैर्बहुभिश्चैव नीलमेघनिभैस्तदा ॥ गिरिकू
टप्रमाणैश्च वानरैराच्छादिता ॥ लंकायां चाभवच्छब्दो महौघस्येव वर्धतः ॥ सागरस्येव भिन्नस्य यथा स्यात् सलिलस्वनः ॥

कृत्स्ना हि कपिभिर्व्याप्ता लंका रावणपालिता ॥ स्त्रीभिना चार्त्तेघ्राचानिशेव सदुरासदा ॥ तस्मिन्
महाभाविषिणि के प्रवृत्ते कोलाहले राक्षसराजधान्यां ॥ अग्र घोर क्षांसि महा युधानि युगांतकालप्र
तिमानि निर्ययुः ॥ इति श्री रामायणे युद्धकांडे लंकावरोधो नाम सर्गः ॥ ततस्ते राक्षसाः सर्वे गत्वा
रावणमंदिरं ॥ न्यवेदयन् पुरीं रुद्धां रामेण सह वानरैः ॥ रुद्धां च नगरीं श्रुत्वा जातक्रोधो दशाननः ॥
विधानं द्विगुणं कृत्वा प्राकारं चाध्यरोहयत् ॥ स ददर्शावृतां लंकां सशैलवनकाननां ॥ असंख्येयै
र्हरिगणैः सर्वतो युद्धकांक्षिभिः ॥ स दृष्ट्वा वानरैः शूरैः काननं कपिलीकृतं ॥ कथं क्षपयितव्याः स्यादि
ति चिंतापरोभवत् ॥ स चिंतयित्वा सुचिरं धैर्यमालंब्य रावणः ॥ हरियूथानि रामं च ददर्शायतलोचनः ॥
प्रेक्षतो राक्षसेंद्रस्य तान्यनीकानि भागशः ॥ राघवप्रियकामार्थं लंकामारुरुहुस्तदा ॥ ते ताम्रवक्त्राः

हेमाभा रामार्थे त्यक्तजीविताः ॥ लंकामेवाभ्यवर्त्तंत शालतालशिलायुधाः ॥ ते द्रुमैः पुष्पिताग्रैश्च मुष्टिभि
श्च महाबलाः ॥ प्राकाराग्राण्यसंख्यानि ममंथुस्तोरणानि च ॥ आप्लवंतः प्लवंतश्च गर्जंतश्च प्लवंगमाः ॥
लंकामेवाभ्यवर्त्तंत महावारणसन्निभाः ॥ कांचनानि प्रगृह्णंत तोरणानि बलीमुखाः ॥ कैलासशिख
राभानि गोपुराट्टालकानि च ॥ परिखाः पूरयंतश्च गंभीरा विपुलोदकाः ॥ पांसुभिस्तृणकाष्ठैश्च पर्वता
ग्रैश्च वानराः ॥ शतसाहस्रयूथैश्च कोटियूथैश्च सर्वशः ॥ कोटीशतयुताश्चान्ये लंकामारुरुहुस्तदा ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणानुपालितः ॥ इत्येवं घोषयंतश्च
गर्जंतश्च प्लवंगमाः ॥ अभ्यधावंत लंकायाः प्राकारं कामरूपिणः ॥ वीरबाहुः सुबाहुश्च नलश्च वनगो

युद्ध चरः॥ पूर्वद्वारमरुंधंतयूथपायूथसंवृताः॥ पश्चिमं कुमुदो द्वारं कोटिभिर्दशभिर्वृतः॥ आवृत्य बलवांस्तस्थौ वा कांडरामायण
नराणां महौजसा॥ दक्षिणं द्वारमागम्य वीरः शतबलीकपिः॥ आवृत्य बलवांस्तस्थौ कोटिभिः संवृतः॥ पुनर्द्वार
३० मावृत्य रामः सौमित्रिणा सह॥ आश्रित बलवांस्तस्थौ सुग्रीवश्च महाबलः॥ गोलांगूलो महाराजो गवाक्षो भी
मदर्शनः॥ वृतः कोटिसहस्रेण तस्थौ रामस्य पार्श्वतः॥ संनद्धस्तु महावीर्यो गदापाणिर्विभीषणः॥ आज्ञा
प्रतीक्षो रामस्य तस्थौ पार्श्वे महाबलः॥ ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिवर्हणः॥ तस्थौ रा
मसमीपे तु कोटिभिर्दशभिर्वृतः॥ गजो गवाक्षो गवयः शरभो गंधमादनः॥ मैंदो दधिमुखो वीरः केस
री पनसस्तथा॥ एते हरिवराश्चक्रुः स्कंधावारं निवेशनं॥ ततः सपरीतां तां रावणो राक्षसाधिपः॥ निर्या को
३०

आस्फोटयामास तदा विनंघाचक्रमे पुनः॥ निःपीड्य चरणौ रुद्धो रामस्यामिततेजसः॥ कथयामास तत्सर्वं यद्वृत्तं ते
राक्षसालये॥ रावणस्तु परं चक्रे क्रोधं प्रासादधर्षणात्॥ विनाद्यमानः शंकानिःस्वनः परमोभवत्॥ रामस्तु ब
हुभिर्हृष्टैर्विनर्दद्भिः प्लवंगमैः॥ दृष्ट्वारिपुवधाकांक्षी युद्धायैव्यवर्त्तयत्॥ सुषेणस्तु महावीर्यो गिरिकूटोपमो हरिः॥
बहुभिः संवृतस्तत्र वानरैः कामरूपिभिः॥ तदा द्वाराणि सर्वाणि सुग्रीववचनात्कपिः॥ पर्यक्रामत दुर्धर्षो नक्ष
त्राणीव चंद्रमाः॥ तथा द्वाराणि सर्वाणि सुग्रीववचनात्कपिः॥ रंभः पर्येति संहृष्टो हर्षयन्स महाचमूं॥ अक्षो
हिणी शतं तेषां समवेक्ष्य वनौकसां॥ लंकामुपनिविष्टानां सागरं चातिवर्त्ततां॥ राक्षसा विस्मयं जग्मुः त्रा
सं जग्मुस्तथापरे॥ तां तु सेनां निरीक्ष्यैव कपीनां युद्धकांक्षिणां॥ लंकामुपनिविष्टानां नेत्रं॥ तानप्र
हर्षिरे॥ कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखांतरं॥ ददृशू राक्षसाः सर्वे प्रासादवलभीगताः॥

हृष्टाभिवसागराभ्यां॥ इत्यार्षे श्रीरामायणे युद्धकांडे प्रथमसंप्रहारो नाम सर्गः॥ युध्यतां च ततस्तेषां वा
नराणां महात्मनां॥ राक्षसाणां च संभूवाथ बलकोपः सुदारुणः॥ ते हयैः कांचनापीडैः खडगैश्चाग्नुद
नि:॥ रथैश्चादित्यसंकाशैः कवचैश्च मनोहरैः॥ नानाशस्त्रधरा घोरा मेघा इव समेघकाः॥ वि
निर्ययुर्महानादैर्नादयंतो महीतलं॥ राक्षसा भीमकर्माणो रावणस्य जयैषिणः॥ वानराणामपि च
मूः रामस्य जयमिच्छतां॥ अभ्यधावत्तदा घोरा राक्षसानां वधं प्रति॥ एतस्मिन्नंतरे तेषां अन्योन्यमभिधा
वतां॥ रक्षसां वानराणां च द्वंद्वयुद्धमवर्त्तत॥ अंगदेनेंद्रजित्सार्धं वालिपुत्रेण राक्षसः॥ अयुध्यत महा
तेजा कान्हमानिव पर्वतः॥ प्रजंघेनापि संपाति र्वीरो दुर्मर्षणेन च॥ जंबुमालिनमायस्तो हनूमानपि
वानरः॥ संगतः सुमहाक्रुद्धो राक्षसो रावणानुजः॥ समरे तीक्ष्णवेगेन मित्रघ्नेन विभीषणः॥

तपनेन नलः सार्धं राक्षसेन महाबलः॥ निकुंभेन महातेजा नीलोपि समयुध्यत॥ सुग्रीवो वानरेंद्रस्तु प्रघस्ते
न समागतः॥ संगतः संयुगे श्रीमान् विरूपाक्षेण लक्ष्मणः॥ अग्निकेतुः सुदुर्धर्षो रश्मिकेतुश्च राक्षसः॥
सुप्तघ्नो यज्ञकेतुश्च रामेण सह संगताः॥ वज्रमुष्टिस्तु मैंदेन द्विविदेनाशनिप्रभः॥ गजेनादित्यसंकाशो
धीरः प्रतपनस्तथा॥ विद्युन्माली सुषेणेन वानरेण समागतः॥ अयुध्यत महातेजाः शक्रेण नमु
चिर्यथा॥ जांबुवान् मकराक्षेण धूम्रः कुंभेन संगतः॥ नरांतकेन पनसः संसक्तो रक्षसा हरिः॥
देवांतकेन वाक्षणांत्रिशिरसः शरभेण च॥ रक्षसाकंपनेनौजो युयुत्सुः कुमुदो हरिः॥ ऋषभो वानर
श्रेष्ठः सागरेण समागतः॥ अतिकायेन विनतो रंभश्चैव समागतः॥ धूम्राक्षेण समासक्तः केसरी

हनुमत्पिता ॥ वेगदर्शी स्फिकेनाजौ संप्रहारमथाकरोत् ॥ संक्रुधं तु महापार्श्वं युयुधे गंधमादनः ॥ वी
रः शतबलौ रक्षो विधुज्जिह्वमयोधयत् ॥ वानराश्चापरे वीरा राक्षसैरपरैः सह ॥ द्वंद्वयुधमकुर्वंस्ते
बहवो बहुभिस्सम ॥ तत्रासीत्सुमहद्युधं तुमुलं लोमहर्षणं ॥ रक्षसां वानराणां च वीराणां जयकां
क्षिणां ॥ हरिराक्षसदेहेभ्यः प्रवृत्ताः केशशाड्वलाः ॥ शरीरसंघातवहाः प्रसस्रुः शोणितापगाः ॥
तस्मिन्प्रवृत्ते संग्रामे रौद्रे भीमभयंकरे ॥ हरिराक्षसयोर्युधं तुमुलं समपद्यत ॥ हरीणां युवराजस्य रा
क्षसानां तथैव च ॥ आजघानेंद्रजित्क्रुधो वज्रेणेव शतक्रतुः ॥ अंगदं गदया घोरः शत्रुसैन्यविदारणः ॥
तस्य कांचनचित्रांगं रथं साश्वं ससारथिं ॥ जघान समरे श्रीमान् अंगदो नलकूबेर ॥ संपातिस्तु प्र

यं सर्वसैन्यानां द्रुतमाज्ञापयत्तदा ॥ निरीक्षंती तदा सेना युक्ता रावणनोदिता ॥ सा सेना पूर्यमाणस्य वेला
इव पयोनिधेः ॥ एतस्मिन्नंतरे रौद्रः संग्रामः समपद्यत ॥ रक्षसां वानराणां च घोराणां कामरूपिणां ॥
ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः ॥ निजघ्नुर्वानरान्सर्वान्कथयंतः स्वकान्रणे ॥ तथा
वृक्षैर्महाकायैः पर्वताग्रैश्च वानराः ॥ निजघ्नुस्तानि रक्षांसि नखैर्दंतैश्च वेगिनः ॥ राक्षसास्त्व
परे घोराः प्राकारस्था महीं गताः ॥ वानरान्भिंडिमालैश्च शक्तिभिश्च व्यदारयन् ॥ वानराश्चा
पि संक्रुधाः राक्षसान्सुमहाबलान् ॥ प्राकारात्पातयामासुरभिजघ्नुश्च मुष्टिभिः ॥ स संप्र
हारस्तुमुलो मांसशोणितकर्दमः ॥ रक्षसां वानराणां च बभूवाद्भुतदर्शनः ॥ वनौकसां तत्र
कुसैन्ये नादो लंकागतानां वनेचराणां ॥ प्रक्ष्वेडितास्फोटितनर्दितानां द्वाभ्यां महद्भ्याम्भि

सायकैः ॥ ततोनिशाचरःक्रुद्धोजांबुवंतंसितैःशरैः ॥ हृदिबाहौललाटेचविव्याधरूपहस्तवत् ॥ सततस्या
भिहतस्तेनक्षिप्रंहस्तेनरक्षसा ॥ निजघानाश्वकर्णेनविद्युज्जिह्वंतमनंतरे ॥ निघ्नंतंराक्षसान्वीरान्
गजंप्रतपनंहरिं ॥ शूलेनजघ्निवान्पार्श्वेनदंश्चमहास्वनं ॥ सतुरोषपरीतांगःशालवृक्षेणराक्षसा
से ॥ निजघानगजोमनोदृष्टंव्याघ्रंयथावने ॥ कुंभकर्णात्मजंकुंभंसमरेसुव्यवस्थितं ॥ ग्रसंतमिवसैन्यानि
दंडहस्तमिवांतकं ॥ आयोधयत्सुसंरब्धोधूम्रोवृक्षशिलायुधः ॥ हरिराक्षसवीरौतौस्वसैन्यपार्श्वगौ
चक्रातेतुमुलंयुद्धंबलशक्रौयथापुरा ॥ देवांतकोगवाक्षंतंहृदिविव्याधमार्गणैः ॥ पंचभिस्तुमहावेगैःआकर्ण
प्रेषितैःशरैः ॥ सतथाताडितस्तेनसंक्रुद्धःप्रज्वलितेंद्रियः ॥ प्रगृह्णात्शालमुद्धम्यतस्यसैन्यंजघानतत् ॥

एवंतौबलिनांश्रेष्ठौयुयुधातेपरस्परं ॥ कृतप्रतिकृतेमत्तावन्योन्यमभिकांक्षिणौ ॥ सारणेनसमाहूतस्त्वृषभो
वानरोत्तमः ॥ सारणंवृक्षमुत्पाट्यनिजघानतदनंतरे ॥ सतेनातिप्रहारेणव्याघूर्णितइवाभवत् ॥ उपासर्प
त्पदान्यष्टौपंचवर्णश्चाभवत्क्षणं ॥ मेघाभंगजमारूढस्त्रिशिरास्त्वरभंहरिं ॥ नेमिर्व्यासमाहूयस्त्रिशिरसिप्र
णुद्भग्नं ॥ सतुरोषपरीतांगःसप्तपर्णेनतंगजं ॥ जघानाभिवलष्टश्चंडःशरभोवागजंवने ॥ नरांतकोथपनसं
नादयामासमार्गणैः ॥ सोपिपादपवर्षेणतंविव्याधप्लवंगमः ॥ अकंपनेनकुमुदःपरिघेनसमाहतः ॥ जा
नुभ्यामवनिंगत्वानिमेषात्पुनरुत्थितः ॥ संक्रुद्धोरोषताम्राक्षोमुष्टिंतस्यन्यपातयत् ॥ मुष्टिप्रहाराभिह
तोविचेताइवसोभवत् ॥ अयोधयत्तंचास्वस्थःपुनरेवप्लवंगमं ॥ धूम्राक्षःशरवर्षेणहनूमंतंपितरंहरिं ॥
ससैन्यंदरयामासधाराभिरवपर्वतं ॥ सोपिक्रुद्धःत्रिशूलाभिश्चससैन्यंतमपोथयत् ॥ महापार्श्वेनसंयुक्तो

यूथपो गंधमादनः ॥ चक्रे सुतुमुलं युद्धं शालतालशिलायुधः ॥ वेगदर्शी निकेनाजौ मर्मण्यभिहतः शरैः ॥ दु
नमं वेगमास्थाय रथं तस्य व्यचूर्णयत् ॥ शैलवर्षं तं शरवर्षाणि राक्षसं भीमदर्शनं ॥ निजघान विरूपा
क्षं शरेणैकेन लक्ष्मणः ॥ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ॥ सुप्तघ्नो यज्ञकेतुश्च रामं संबिभेदुः
शरैः ॥ तेषां चतुर्णां रामस्तु शिरांसि समरे शरैः ॥ क्रुद्धश्चतुर्भिश्चिच्छेद घोरैरग्निशिखोपमैः ॥ वज्रमुष्टिस्तु मैं
देन मुष्टिना निहतो रणे ॥ पपात सरथः साश्वः पुराट्ट इव भूतले ॥ वज्राशनिसमस्पर्शो द्विविदश्चाशनिप्रभं ॥
जघान गिरिशृंगेण पश्यतां सर्वरक्षसां ॥ निकुंभस्समरे नीलं नीलांजनचयोपमं ॥ बिभेद तरसा बाणैः मे
घं सूर्य इवांशुभिः ॥ पुनः शतशरेणैव क्षिप्रहस्तो निशाचरः ॥ बिभेद समरे नीलं निकुंभः प्रहसन्निव ॥ त
स्यैव रथचक्रेण नीलो विष्णुरिवाहवे ॥ शिरश्चिच्छेद समरे सोपनलो चक्रलोमुखे ॥ विद्युन्माली रथे

जंघेन त्रिभिर्बाणैर्विदारितः ॥ निजघानाश्वकर्णेन प्रजंघं तु महाबलः ॥ नर्दश्चलपनो घोरो नलं सम्यग
वर्द्धत ॥ नलेन तुमुलस्तस्य चक्षुषी व्यानिपातयत् ॥ भिन्नगात्रः शरैस्तीक्ष्णैः क्षिप्रहस्तेन रक्षसा ॥ निज
घानेद्रवृक्षेण तपनं राक्षसं नलः ॥ जंबुमाली रथस्थस्तु रथशक्त्या महाबलः ॥ बिभेद समरे क्रुद्धो हनूमं
तं स्तनांतरे ॥ तस्य तं रथमास्थाय हनूमान् कपिकुंजरः ॥ प्रममाथ तलेनवा गिरिशृंगोपमं शिरः ॥ भिन्न
गात्रः शरैस्तीक्ष्णैः मित्रघ्नेन बिभीषणः ॥ मित्रघ्नं गदया वीरो निजघान स्तनांतरे ॥ प्रसंतमिव सैन्या
नि प्रघसं वानराधिपः ॥ सुग्रीवः सप्तपर्णेन निजघान ननाद च ॥ अतिकायोतिबलवान् देवदानवदर्पहा
रं भंजयिनतं चैव ताडयामास मार्गणैः ॥ तौ शिलावृक्षवर्षेण तस्य सैन्यं निजघ्नतुः ॥ जलदार्धवसर ध्वे
वानरः छायागवांगणं ॥ जांबुवान् ऋक्षराज स्तुमकराक्षं रवरात्मजं ॥ प्रगृह्य वृक्षमुत्पाट्य तं सचिच्छेद थ

घोरंगोमायुरवसंकुलं ॥ कबंधानि समुत्तस्थुस्तस्मिन्वानररक्षसां ॥ पिशाचानां च घोराणां हतानां रणमूर्धनि
बभूव तुमुलं घोरं तेषामायोधनं महत् ॥ विदार्यमाणा हरिपुंगवैस्तदा निशाचराः शोणितगंधमोहिताः ॥ पुनः
सुसंरब्धतराश्च वा स्थिताः ॥ दिवाकरस्यास्तमनाभिकांक्षिणः ॥ इतिश्रीयुधकांडे ४३ युधंनामसर्गः ॥
युध्यतामेव तेषां तु तदा वानररक्षसां ॥ रविरस्तंगतो रात्रिः प्रवृत्ता प्राणहारिणी ॥ अन्योन्यं बद्धवैराणां घो
राणां जयमिच्छतां ॥ संप्रवृत्तं निशायुद्धं तदा वानररक्षसां ॥ राक्षसोसीति हरयो वानरोसीति राक्षसाः ॥
अन्योन्यं समरे जघ्नुस्तस्मिन्समसि दारुणे ॥ भिंधि दारय एहीति विद्रावयसि विकर्षसि ॥ एवं सुतुमुलः श
ब्दस्तस्मिंस्तमसि शुश्रुवे ॥ ज्वलत्कांचनसंनाहास्तस्मिंस्तमसि राक्षसाः ॥ समदृश्यंत शैलेंद्राः दीप्तौष
धिधरा इव ॥ रक्षांसि तिमिरसंकाशाः तस्मिंस्तमसि दारुणे ॥ परिपेतुर्भृशं क्रुद्धाः भक्षयंतो निशाचरान् ॥

निन्युर्यमक्षयं क्रुद्धाः मुष्टिभिर्दशनैस्तथा ॥ उत्पतंतश्च हरयो निपतंतश्च राक्षसान् ॥ परिपेतुः कृतांता भा भ
क्षयंतो निशाचरान् ॥ ते हयान् कांचनापीडान् ध्वजांश्चाभरणानि च ॥ आलसद्दशनैस्तीक्ष्णैर्नखै
श्चापि चकर्त्तिरे ॥ कुंजरान्कुंजरारोहान्पताकान्रथिनो रथान् ॥ आलुलुर्विचकर्षुश्च दशनैः
क्रोधमूर्छिताः ॥ लक्ष्मणश्चाथ रामश्च शरैरग्निशिखोपमैः ॥ आदृश्यादृश्यरक्षांसि प्रवराणि
निजघ्नतुः ॥ तुरंगखुरविध्वस्तं रथनेमिसमुद्धतं ॥ कंठानरोसीघोधानां चक्षुःषीव महारजः ॥ वर्तमाने म
हाघोरे संग्रामे लोमहर्षणे ॥ लोहितोदा महारौद्रा नद्यस्तत्र प्रसुस्रुवुः ॥ ततो भेरीमृदंगानां पण
वानां च निस्वनः ॥ शंखवेणुस्वनोन्मिश्रो रक्षसां कामरूपिणां ॥ हतानां स्तनमानानां राक्षसानां
च निस्वनः ॥ शस्त्राणां वानराणां संबभूवसुदारुणः ॥ शस्त्रपुष्पोपहाराणां तदासीत्तत्र मेदि

नी॥ दुर्दर्शा दुर्विगाह्या च शोणितआवकर्दमा॥ हतैर्वानरमुख्यैश्च शक्तिशूलपरश्वधैः॥ निह
तैः पर्वताकारैः राक्षसैः कामरूपिभिः॥ सा बभूव निशा घोरा हरिराक्षसहारिणी॥ कालरात्री
व भूतानां सर्वेषां दुरतिक्रमा॥ ततस्ते राक्षसाः सर्वे तस्मिंस्तमसि दारुणे॥ राममेवाभ्यधावंत
सृजंतः सायकान् बहून्॥ तेषामापततां शब्दः क्रुद्धानामिव गर्जतां॥ उद्वर्त इव सर्वेषां सागरा
णां महास्वनः॥ तेषां रामः शरैः षड्भिः षड् जघान निशाचरान्॥ निमेषांतरमात्रेण शरैरग्नि
शिखोपमैः॥ यमशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ॥ वज्रदंष्ट्रो महाबाहुस्तौ चोभौ शुकसार
णौ॥ ते तु रामेण तैर्बाणैः सर्वमर्मसु ताडिताः॥ युद्धादपसृतास्ते तु अवशेषेण चायुषः॥ ततः
कांचनचित्रांगैः संपतद्भिः सहस्रशः॥ दिशश्चकार विवराः प्रदिशश्च महा बलः॥ यच्चा

छन्नशरैः संनतपर्वभिः॥ सुषेणं ताडयामास सननाद मुहुर्मुहुः॥ तस्यांतरमथो दृष्ट्वा सुषेणो वानरोत्त
मः॥ गिरिशृंगेण महता रथमाशु व्यपोथयत्॥ लाघवेन स संयुक्तो विद्युन्माली निशाचरः॥ अपक्र
म्य रथात्तूर्णं गदापाणिः स्थितः क्षितौ॥ गदामादाय महतीं निशाचरवरस्तदा॥ वक्षस्यभिजघानाशु सु
षेणं हरियूथपं॥ गदाप्रहारं तं घोरं अवचिंत्य प्लवंगमः॥ शिलां संपातयामास तस्योपरि महामृधे॥ शि
लाप्रहाराभिहतो विद्युन्माली निशाचरः॥ निष्पिष्टहृदयो भूमौ गतासुर्निः पपात ह॥ एवं ते वानरैः शू
रैस्ते रजनीचराः॥ द्वंद्वे विनिहताः सर्वे दैत्या इव सुरोत्तमैः॥ भल्लैः खड्गैर्गदाभिश्च शक्तितोम
रसायकैः॥ अपविद्धैश्च भग्नैश्च रथैः सांग्रामिकैर्हयैः॥ निहतैः कुंजरैर्मत्तैस्तथा वानरराक्षसैः॥
चक्राक्षयुगदंडैश्च भग्नैर्धरणिमाश्रितैः॥ तत्र तत्रापविद्धैश्च कवचैश्च स्वर्णहिरण्मयैः॥ बभूवायोधनं

ल

गेनशिखयाकपिकुंजरः ॥ इंद्रजित्तु रथं त्यक्त्वा हताश्वो हतसारथिः ॥ अंगदेन समायस्तस्तत्रैवांतरधी
यत ॥ स यज्ञभूम्यां विधिवत्पावकं जुहुवेस्त्रवित् ॥ जुह्वतः तस्य तत्राग्निं रक्तोष्णीषांबरस्रजः ॥
आजग्मुस्तत्र संभ्रांता राक्षसा यत्र रावणिः ॥ शस्त्राणि शरपर्वाणि समिधोस्य बिभीतकाः ॥ लोहि
तानि च वासांसि स्रुवं कार्ष्णायसस्तथा ॥ सर्वतोग्निं समास्तीर्य शरपात्रैः सतोमरैः ॥ छागस्याप्यचकृ
ष्णस्य कंठं जग्राह जीवतः ॥ शोणितं तेन विधिवत् स जुहाव रणोत्सुकः ॥ सकृदेव समिद्धस्य विधूम
स्य गतार्चिषः ॥ बभूवुस्तानि लिंगानि विजयस्य प्रदक्षिणं ॥ प्रदक्षिणावर्तशिखस्तप्तकांचनसु
प्रभः ॥ हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः ॥ ततोग्निमध्यादुत्तस्थौ कांचनः स्यंदनो महा
चतुर्भिः कांचनापीडैः अश्वयुक्तैः प्रभद्रकैः ॥ अंतर्धानगतः श्रीदीप्तः पावकसंनिभः ॥ हुत्वाग्निं तर्पि
मान् रैः

यित्वा च देवदानवराक्षसान् ॥ वाचयित्वा ततस्सम्यग्युक्ताशीर्भिर्द्विजातिभिः ॥ आरुरोह रथश्रेष्ठमंतर्धा
नचरं शुभं ॥ अवध्यैर्वाजिभिर्युक्तं शस्त्रैश्चापि विधैस्तथा ॥ समारोपितनेपथ्यं रथं शक्तिसमाकुलं ॥ आ
रुह्यमानवपुषा तपनीयविभूषितं ॥ मृगैश्चंद्रार्धचंद्रैश्च स रथः समलंकृतः ॥ जांबूनदमयानागस्तरुण
दीप्तसंनिभः ॥ बभूवेंद्रजितः केतुर्वैडूर्यसमलंकृतः ॥ कृत्वाग्निं राक्षसैर्मंत्रैस्ततो वचनमब्रवीत् ॥ अ
द्य हत्वावधाहौतौ मिथ्याप्रव्रजितौ रणे ॥ जयं पित्रे प्रदास्यामि रावणाय रणाधिकं ॥ अद्य निर्वानरामुर्वीं
हत्वा राघवलक्ष्मणौ ॥ करिष्ये चाप्यसुग्रीवां ततस्त्वंतरधीयत ॥ स ददर्श महावीर्यौ तावुभौ रामलक्ष्मणौ
सृजंतौ शरजालाग्नि कपिमध्ये व्यवस्थितौ ॥ स तु वैहायसं प्राप्य रथं तौ रामलक्ष्मणौ ॥
अचक्षुर्विषयोतिष्ठन् विव्याध निशितैः शरैः ॥ तौ तस्य शरवेगेन परीतौ भ्रातरावुभौ ॥
गृहीत्वा धनुषी व्योम्नि घोरान् मुमुचतुः शरान् ॥ प्रच्छादयंतौ गगनं शरजालैर्महाबलैः

तंमहासुरसंकाशंरौसेन्म नंतोपस्पृशतु शरैः॥ सांचधायांथकारण्येमहाबलसमन्वितः॥
दिशश्चांतर्दधेवीरोनीहारांतेमिराच्छलः॥ नैवज्यातलोऽनघोषोभापि नाभिरवुरस्वनः॥ श्रु
श्रुवेचरतस्तस्य नचरूपंसमदृश्यत॥ घनांधकारतिमिरेशिलावर्षमिवाद्भुतं॥ सचवर्षमहो
ह्यवाहुर्नागचक्रासरहोति॥ राघवोस्यर्यसंकाशोघोरोदीप्तवरैः शरैः॥ बिभेदसमरेक्रुद्धःस
र्वगात्रेषुरावणिः॥ अदृश्यः सर्वभूतानांकूटयोधीनिशाचरः॥ बबंधशरबंधेनतावुभौरा
मलक्ष्मणौ॥ लोहन्यभानोनाराचैर्धाराभिरैरवपर्वतं॥ हेमपुंखान्नरव्याघ्रोतीक्ष्णान्मु
मुचतुः शरान्॥ अंतरिक्षेवनासाद्यतौरिपुंकंकधाससः॥ निपेतुरुर्व्यांविशिरवाः सतीक्ष्णाः
शतसहस्रशः॥ पन्नगैस्तुशरैर्भूतैः रावणिः प्रहसन्निव॥ अंतिमात्रैःशरौघेण ताडयामा २८
राघवौ॥ ताविहन्यपतनौभल्लैः शतकैर्नैचिकर्तनु॥ राघवोपरमायस्तौज्वलंदृज्वलनोपमैः॥

येचान्येराक्षसाः सर्वेरामस्याभिमुखेस्थिताः॥ तेविनष्टाः समासाद्यपतंगाइवपावकं॥ ततः कांचनचि
त्रांगैः शरैरग्निशिखोपमैः॥ ततोमौ राजन्नरामः किंचिदुत्सारयत्तदा॥ तदंधकारमुत्सार्यबाणेबाणपथं
प्रभुः॥ चक्षुर्विषयमासाद्य शरौघानसमवर्जयत॥ सासपताद्रीचशिरवैः रुक्मपुंखैः सहस्रशः॥
बभूवरजनीचित्राखद्योतैरिवशारदी॥ राक्षसानांमहानादैर्वानराणांचगर्जितैः॥ साबभूवनिशाघोरा
भूयोघोततरातदा॥ तेनशब्देनमहताप्रवृद्धेनसमंततः॥ त्रिकूटः कंदरमुखैःप्रत्याहरदिवास्थितः॥ गो
लांगूलमहाकूटास्तमसातुल्यवर्चसः॥ संपरिष्वज्यबाहुभ्यांअखादन्निशाचरान्॥ वर्तमा
नेमहारौद्रेसंग्रामेतिभयंकरे॥ अंगदोपिरथंवीरोरावणिंसमुपाद्रवत्॥ ततः क्रोधसमाविष्टः शरव
र्षेणरावणिः॥ अंगदस्यचमूंघोरांनाशयामासवीर्यणः॥ ततः कोपपरीतात्मायुवराजोंगदोबली॥ शि
लामुत्पाटयामासबाहुभ्यांप्लवगोमुहुः॥ सतामुत्क्षिप्यतेजस्वीछाद्यमानः शरोर्मिभिः॥ रथंबभंजवे

याच्छन्नं सुदुर्मंतर्हितं भृशं ॥ राक्षसोग्निहिनिष्ठ्यं तं दृश्य वानरयूथपाः ॥ सग्रमुख्याय चनमग्रीवधायुरे
दृश्यन्नृशंसेकर्मणः ॥ रघुप्रवीरः प्लवगर्षभैर्वृतस्तदा महात्मा च चारितोनिरैक्षत ॥ इत्यार्षे श्रीरामायणे इंद्रजि
न्मायादर्शनोनामसर्गः ॥ स तस्य मायातिमं विष्य राजपुत्रः प्रतापवान् ॥ रामादिदेश दशबलान्दशवान
रयूथपान् ॥ द्वौ सुषेणस्य दायादौ नीलं च प्लवगर्षभं ॥ अंगदं वालिपुत्रं च मैंदं च शरभं तथा ॥ द्विविदं हनु
मंतं च गवाक्षं सुमहाबलं ॥ ऋषभं ऋषभस्कंधमादिदेश रघुप्रभुः ॥ ते तु संहृष्टाहार्योभीमानु पादपादपान्
आकाशं विविशुः सर्वे चरमाणाय तोभयं ॥ तेषां वेगवतां वेगं इषुभिर्वेगवत्तरैः ॥ अस्त्रवित्पर
मास्त्रेण यूथपांस्तानवारयत् ॥ ते भीमवेगा हरयो नाराचैर्बहुभिः क्षताः ॥ अंधकारेन ददृशुः
मेघैः सूर्यमिवावृतं ॥ ते तु वानरशार्दूला राक्षसेनाभिपाश्रिता ॥ निर्धूताः शरवेगेन न्यपतन्त महीं
तले ॥ ततः स्मोराघवौ वीरौ सर्वमर्मातिगैः शरैः ॥ भृशमावेदयांचक्रे रोचणैः समितिंजयः ॥ न

रंतरशरीरौ तौ तेन च भ्रातरौ क्षितौ ॥ क्रुद्धेनेंद्रजिता वीरौ पन्नगैः शरतां गतैः ॥ तयोस्तु क्षतगात्राभ्यां सुस्राव रुधिरं
बहु ॥ तावुभौ च प्रकाशंतौ पुष्पिताविव किंशुकौ ॥ ततः पर्यंतरक्ताक्षो नीलांजनचयोपमः ॥ रावणिर्भ्रातरौ वा
क्यमंतर्धानगतोऽब्रवीत् ॥ युध्यमानमलक्ष्यं मां शक्रोपि त्रिदशेश्वरः ॥ द्रष्टुमासादितुं वापि न शक्तः किंपुनर्युवां ॥
एवमुक्त्वा च धर्मज्ञौ भ्रातरौ रामलक्ष्मणौ ॥ निर्बिभेद शितैर्बाणैः वज्रैस्पर्शनिभैः पृथक् ॥ २० ॥ उवाच शर
संदीप्तौ भ्रातरौ तौ निशाचरः ॥ एष रोषपरीतात्मा नयामि यमसादनं ॥ भिन्नां जनचयप्रख्यो विस्फार्य विपुलं धनुः
भूय एव शरान्घोरान्विससर्ज तयोर्मृधे ॥ तयोर्मर्मसु मर्मज्ञो मज्जयन्निशितान् शरान् ॥ रामलक्ष्मणयोर्वी
रो ननाद च मुहुर्मुहुः ॥ स रामं लक्ष्मणं चैव घोरैर्दत्तवरैः शरैः ॥ भक्षाद सोत्कुर्ध्वः सर्वगात्रेषु राक्षसः ॥ अदृश्यः स
र्वभूतानां कूटयोधी निशाचरः ॥ बबंध शरबंधेन तावुभौ रामलक्ष्मणौ ॥ बद्धौ तु शरबंधेन तौ तदा प्रकंपवुजौ रुतो ॥
निमेषांतरमात्रेण न शेकतुरुदीक्षितुं ॥ ते तु सर्वांगनिर्भिन्नौ शरशल्याचितौ रणे ॥ ध्वजाविव महेंद्रस्य वज्रमुक्तौ

प्रकंपितो ॥ नोसंभ्रांश्चालितो वीरो अर्दितो मर्मभेदिभिः ॥ निःपेतंतुर्महेष्वासौ जगतां जगतीपती ॥ नद्यां वधं तयोर्गात्रेबु
भूयांतरमण्वपि ॥ नानिर्भिन्नं नवास्वस्तं यत्नसंगमाजिह्मगैः ॥ शरांचितशरीरौतौ क्षितौ नपतितावुभौ ॥ व्यरा जेतां
महाबाहू पुष्पितौ किंशुकाविव ॥ छादितौतौ नारौवधौ रक्षसा कामरूपिणा ॥ रक्तं सुस्त्रुवतुर्गात्रान् जलं प्र
स्रवणादिव ॥ पतितः प्रथमं रामः शरैः शल्यैर्निपीडितः ॥ क्रोधादिंद्रजितायेन पुरा शक्रोपिनिर्जितः ॥ रुक्मपुंखै
रजिह्माग्रैर्मंदोगतिभिराशुगैः ॥ नालीकैरर्धनाराचैः भल्लैर्वत्सदंतैः ॥ नाराचैर्वत्सदंतैश्च सिंहदंष्ट्रैः सितैः
शरैः ॥ निहितो लक्ष्मणः शय्ये दिव्यमादाय कार्मुकं ॥ छिन्नमुष्टिपरीणाहं विनतं रुक्मराजितं ॥ बाणपातांतरे राम
पतितः पुरुषर्षभः ॥ शयानं लक्ष्मणं दृष्ट्वा निराशो जीविते भवन् ॥ बद्धौ तु वीरौ शयने शयानौ तेवानराः संपरिवार्य सर्वे
समागता वायुसुतप्रधाना विषादमार्ताः परमं च जग्मुः ॥ इति श्रीरामायणे युद्धकांडे ...बंधो नाम सर्गः ॥ ॥
ततो द्यां पृथिवीं चैव वीक्षमाणा वनौकसः ॥ ददृशुः सहितौ बद्धौ भ्रातरौ रामलक्ष्मणौ ॥ वर्षित्वोपरते मेघे कृत

यतो यतो दहृशानुः शरानापततः सतान् ॥ ततः स्तत्रो बाणवर्षान् राघवो विससर्ज तु ॥ इंद्रजित्तु
दिशः सर्वाः रथेन विचरन् बली ॥ विव्याध तो दाशरथी लघुहस्तः शितैः शरैः ॥ तौ तु बद्धौ महात्मा
नौ रुक्मपुंखैर्वरैर्जह्मगैः ॥ बभूवतुर्दाशरथी बंधु ज्ञौ बचयोपमौ ॥ नास्य वेदं गतिं कश्चिन्न रूपं न ध
नुः सवनं ॥ न चास्य लक्षणं कंचित् सूर्यस्येवाभ्रसंप्लवे ॥ तेन विद्धाश्च हरयो निहताश्च गतासवः
एवं घार्थे पराक्रांता धरण्या मुपरोरत ॥ लक्ष्मणस्तु सुसंक्रुद्धः क्रोधाद्भ्रातरमब्रवीत् ॥ ब्राह्ममस्त्रं प्रयोक्ष्या
मि वधार्थं सर्वरक्षसां ॥ तमुवाच ततो रामो लक्ष्मणं शुभलक्षणं ॥ एकस्य रक्षसो हेतोः पृथिवीं हंतुमिच्छसि ॥
अयुध्यमानान् प्रच्छन्नान् प्रांजलीन् शरणागतान् ॥ पलायमानान् सुप्तांश्च न त्वं हंतुमिहार्हसि ॥
अस्यैव च वधे यत्नं करिष्यावो वरषभ ॥ आदेक्ष्यावो महावेगान् कामगान् हारयूथपान् ॥ तापनं भाय

मामकैर्बाणैः भ्रातरौ रामलक्ष्मणौ ॥ नैतौ मोक्षयितुं शक्यौ एतस्माच्छरबंधनात् ॥ सर्वैरपि समागम्य स
र्षिसंघैः सुरासुरैः ॥ यत्कृते चिंतयानस्य शोकस्तस्य पितुर्मम ॥ अस्पृष्ट्वा शयनं गात्रैः त्रियामा याम
निः शर्वरी ॥ कृत्स्नेयं द्रवते लंका नदी वर्षास्विवाकुला ॥ सोहं मूलहरोनर्थः सर्वेषां निहतो मया ॥
सलक्ष्मणस्य रामस्य सर्वेषां च वनौकसां ॥ विक्रमा निष्फलाः सर्वे यथा शरदि तोयदाः ॥ एवमु
क्त्वा तु तान् वीरान् राक्षसान् परिपार्श्वतः ॥ यूथपानथ सर्वांस्तान् ताडयामास राक्षसः ॥ मर्मज्ञः स
र्वगात्रेषु घोरैर्दत्तवरैः शरैः ॥ मोहयन् शरबंधेन पातयामास भूतले ॥ तं लाघवं च बाणौघैः न
शाखावनेचरान् ॥ प्रजहास महाहासं ततो वचनमब्रवीत् ॥ शरबंधेन घोरेण मया बद्धौ च
मूमुखे ॥ सहितौ भ्रातरौ वीरौ निशामयत राक्षसाः ॥ एवमुक्तास्तु ते सर्वे राक्षसाः परिपार्श्वतः ॥

परं विस्मयमाजग्मुः कर्मणा तेन तोषिताः ॥ विनेदुश्च महानादान् सर्वे ते जलदोपमाः ॥ हतो राम इति ज्ञात्वा रावणिं च
अपूजयन् ॥ निष्प्रकंपौ ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ॥ वसुधायां हतौ तौ तु हतावित्यभिमन्यत ॥ स तु शीघ्रं पुरीं लंकां
रावणिः समितिंजयः ॥ आविवेश महेष्वासः हर्षयन् सर्वराक्षसान् ॥ रामलक्ष्मणयोर्दृष्ट्वा शरीरे चेषुभिः श्रिते ॥ वानरेंद्र
स्य संजातं सुग्रीवस्य महद्भयं ॥ तमुवाच परित्रस्तं वानरेंद्रं विभीषणः ॥ सबाष्पवदनं दीनं शोकव्याकुललोचनं ॥
अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यतां ॥ एवंप्रायाणि युद्धानि विजयो नास्ति नैष्ठिकः ॥ सशेषभाग्यता
स्माकं यदि वीर भविष्यति ॥ मोहमेतौ विमोक्ष्येते भ्रातरौ रामलक्ष्मणौ ॥ पर्यवस्थापयात्मानं अनाथं मां च वान
रान् ॥ सत्यधर्मानुरक्तानां नास्ति मृत्युः कुतो भयं ॥ मोहसंतापसंयुक्तं रामं प्राप्तं महाकपे ॥ विमुंच भागम त्रासं स
र्वाणामेषां निर्णयः ॥ एवमुक्त्वा ततस्तस्य जलक्लिन्नेन पाणिना ॥ सुग्रीवस्य शुभे नेत्रे प्रममार्ज विभीषणः ॥

प्रमन्यवदंतंतस्यकपिराजेमहात्मनः॥ अब्रवीत्कालसंयुक्तं असंभ्रांतोविभीषणः॥ नकालःकपिराजेंद्र वै
क्लव्यमभिवर्तितुं॥ अतिमोहोह्ययंकालेतुव्यसनायोपपद्यते॥ तस्मादुत्सृज्यवैक्लव्यं सर्वकार्यविनाशनं॥ हितं
रामपुरोगानां सैन्यानामनुचिंतय॥ अथवारक्ष्यतांरामोयावत्संज्ञाविपर्ययः॥ लब्धसंज्ञौतुकाकुत्स्थौभयंनोव्यपनेष्यतः
॥ नैतौकेचिद्धिरामस्य नहिरामोमुमूर्षति॥ नह्येनंहास्यतेलक्ष्मीः दुर्लभायागतायुषं॥ तस्मादाश्वासयात्मानं त्वं
मांचापपरस्यच॥ यावत्सर्वाण्यनीकानिपुनःसंस्थापयाम्यहं॥ एतेह्युत्फुल्लनयनाः त्रासादागतसाध्वसाः
कर्णात्कर्णंकथयंतः हरयोहरिपुंगवाः॥ मांतुदृष्ट्वाप्रधावंतं अनीकेसंप्रहर्षणं॥ त्यजंतुहरयस्त्रासं सर्पजीर्णा
मिवत्वचं॥ एवमुक्त्वातुसुग्रीवंसंधर्त्तोमविभीषणः॥ चतुर्भिःसचिवैःसार्धं अनुसंचरतेबलं॥ इंद्रजि
तुर्महाकायः सर्वसैन्यसमन्वितः॥ प्रविवेशपुरींलंकां जीमूतमिवभास्करः॥ तत्ररावणमासीनं अभिवा

कर्माणिराक्षसे॥ आजगामाथतंदेशं सुग्रीवःसविभीषणः॥ अंगदोद्विविदोमैंदःसुषेणःकुमुदोनलः॥
तूर्णंहनुमतासार्धं आजग्मुर्यत्रराघवौ॥ निश्चेष्टौमंदनिश्वासौ शोणितौघपरिप्लुतौ॥ शरजालचितौध्वस्तौ शया
नौशरतल्पगौ॥ निश्वसंतौयथानागौ निश्चेष्टौसिंहविक्रमौ॥ रुधिरस्रावदिग्धांगौ तपनीयाविवध्वजौ॥ तौवी
रशयनेवीरौ शयानौमंदविक्रमौ॥ यूथपैस्तैःपरिवृतौ बाष्पव्याकुललोचनैः॥ राघवौपतितौदृष्ट्वा बाणजालस
माहितौ॥ वभूवुर्व्यथिताःसर्वेवानराःसविभीषणाः॥ अंतरिक्षमभिवीक्षंतो दिशःसर्वाश्चवानराः॥ नचक्रुर्माय
याछन्नंमायमायाछन्नं रावणिरणे॥ ततोमायापरिछन्नंमा ययेचविभीषणः॥ अंतरिक्षेददर्शाथभ्रातुःपुत्रमव
स्थितं॥ तमप्रतिमकर्माणं मप्रातिद्वंद्वमाहवे॥ ददर्शांतर्हितंवीरं वरदानाद्विभीषणः॥ इंद्रजित्त्वात्मनःकर्म तौश
यानौनिरीक्ष्यच॥ उवाचपरमप्रीतो हर्षयन्सर्वराक्षसान्॥ दूषणस्यचहंतारौ खरस्यैवतुपत्र्यतः॥ सर्दितौ

एतेसर्वेमहात्मानोवानराभीमविक्रमाः॥ प्रहस्तोकाश्वकेसरीश्चहनुमानायसाश्वनः॥ वीक्ष्यमाणादिह
शः सर्वाजितेयत्कृपैवचसर्वशः॥ तृणंब्यापिविचेष्टस्सुराक्षसानिवमानिरे॥ रावणः स्तुतिसंहृष्टोविरराज्ये
इंद्रजितंसुतं॥ प्रीत्यापरमयायुक्तः कृतंकर्माणमुत्तमं॥ गतेतस्मिन् महामाये रावणस्यसुतेतदा॥
स्वगृहेचिंतयामासरावणः शत्रुनाशनं॥ कृतमिंद्रजिताकर्मदुष्करंयत्सुरैरपि॥ सीतांश्चलाभतांनत्रहीं
नासक्ष्यामिजीवितं॥ अथवास्त्रीस्वभावेनचापल्यवशमोहिता॥ यस्याः कामंसमासाद्यविवशावशा
मेष्यति॥ अत्रोपायोमयादृष्टः सीतोपादानकारकः॥ राक्षस्यः सहस्राश्चत्वासी तायाः परिरक्षणे॥
व्यापृतायाः दृ समादेशोसततमेवशानुगाः॥ हर्षेणमहतायुक्ताः भविष्यंतीविशेषतः॥ अस्य
वृधामुपायज्ञां सर्वभावानुदर्शिनी॥ आह्वयामासतांराजा राक्षसींनामनुत्तमां॥ राक्षसींत्रिज

टांनामशासनात्समुपस्थितां॥ अथोवाचतामथोदृष्ट्वा त्रिकूटाराक्षसेश्वरः॥ कृतांविद्ध्जितापश्य वैदेहीरा
मलक्ष्मणौ॥ पुष्पकेचसमारोप्य दर्शयस्वरणाजिरे॥ यमाश्रयमवष्टभ्य सीतामानोपतिष्ठति॥ सचभ
गसिहभ्रात्राशनरस्तोरणभूर्धनि॥ नार्विशंकानिरुद्धिस्ता निरपेक्षाचमैथिली॥ मामुपस्थास्यतेसी
तासर्वाभरणभूषिता॥ अघकालवतीमानांनिरस्तांरामसंभवां॥ समवेक्ष्यवशांसीतामामुपस्थास्य
तेबलात्॥ तस्यतद्वचनंश्रुत्वारावणस्यदुरात्मनः॥ राक्षस्यस्त्रिजटाद्यास्ताः प्रजग्मुर्यत्रपुष्प
कं॥ ततः पुष्पकमादायराक्षस्यस्त्वरितातदा॥ अशोकवनिकासंस्थांमैथिलीसमुपागमन्॥ तामा
मंत्र्यनुराक्षस्याभर्तृशोकपराजितां॥ विमानंपुष्पकंसीतांशनैरारोपयन्शुभं॥ ततः सीतांसमा

रथात्रिजटां चैव राक्षसीं ॥ रावणो कारयल्लंकां पताकाध्वजमालिनीं ॥ घोषयामास चतदा लंकायां राक्षसेश्वरः ॥ ह
तोविंद्रजितासंख्ये ॥ उभौ रामलक्ष्मणौ ॥ विमानेनतु सीतासा नदांत्रिजटया सह ॥ ददर्शवानराणांतु स्कंधा
वारनिवेशनं ॥ प्रहृष्टमनसः श्चैव राक्षसान् भीमदर्शनान् ॥ वानराश्चापि दुःखार्तान् रामलक्ष्मणपार्श्वतः ॥
ततः सीताददर्शोभौ शयानौ शरविक्षतौ ॥ लक्ष्मणं चैव रामं च विसंज्ञौ शरपीडितौ ॥ विध्वस्तकवचौ वीरौ वि
प्रविध्वस्तशरासनौ ॥ सायकैश्छिन्नसर्वांगौ शयानौ धरणीतले ॥ तौ दृष्ट्वा भ्रातरौ तत्र शोकबाष्पसमाकुला ॥
वेपंती दुःखितासीता रूपणं विललाप ह ॥ शोकेन बाष्पपिहितौ निरीक्ष्य तौ भ्रातरौ देवसमप्रभावौ ॥ वि
तर्कयंती निधनं तयोः सा दुःखान्विता वाक्यमिदं जगाद ॥ इत्यार्षे श्रीरामायणे राममदर्शनं नाम सर्गः

ध कृतांजलिः ॥ आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ ॥ उत्पपात ततो हृष्टः पुत्रं च परिष
स्वजे ॥ रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ ॥ मूर्ध्नि चैनमुपाघ्राय परितुष्टेन चेतसा ॥
पृष्टे तु ततः तस्मै पित्रे सर्वं न्यवेदयत् ॥ स हर्षवेगानुगतान्तरात्मा श्रुत्वा गिरस्तस्य महार
थस्य ॥ जहौ भयं दाशरथेः समुत्थितं प्रहृष्टरूपोपि सुतं निरीक्ष्य ॥ इत्यार्षे युधकांडे श्र
रबंधनिवेदनं नाम सर्गः ॥ ॥ प्रतिप्रविष्टे लंकां तु कृतार्थे रावणात्मजे ॥ रक्षःपरिवार्याचौ र
राघवो प्लवगर्षभाः ॥ हनुमानंगदो नीलः सुषेणः कुमुदो नलः ॥ गजो गवाक्षः पनसः सानुप्रस्थो
महाहरिः ॥ जांबुवान् ऋषभश्चैव रभः शतबलिः पृथुः ॥ कथनश्च महातेजाः संपातिश्च महाबलः

यानि किल पद्मानि स्त्रीणाम् रूपाणि लक्षणे। नान्यथा निहतो रामो वृथानि भवंति मे। केशाः सूक्ष्माः
समा नीलाः भ्रुवौ चासंहते मम। ननु वृत्ते न नखाः स्निग्धाः समाश्चांगुलयो मम। स्तनौ चाविरलौ पी
नौ समौ मम मग्नचूचुकौ। मग्ना चोत्संगिनी नाभिः पार्श्वे च सा कुक्षिनी। समौ च वर्णो मृदुस्निग्धो मम
मूर्द्धन्यंगरुहा अपि च। अविरुक्षा च मे वाणी न सम मधुरभाषिणी। अरबी सिला वगाधा चौ निसं चाह
मेवि कृता। प्रतिष्ठिता द्वादशभिर्मामूचुः शुभलक्षणे। समग्र यवम अछिद्रं पाणिपादं च वर्णवत्
अनाकुला विक्लवा च असंभ्रांता च मे मताः। मंदस्मितं मे वचनं कन्यालाक्षणिको विदुः। ननु नाम
भिषेक्ष्यामि ब्राह्मणैः पतिना सह। कृतानकुशले [illegible] रुक्मो ननु तेन्द्रत्वादिनः। एतौ हत्वानु
नरस्थानं प्रवृत्तं नोपलभ्यसे। तीर्त्वा सागरमक्षोभ्यं गोष्पदे भ्रातरौ हतौ। ऐंद्रं वारुणमाग्नेय

ऐंद्रं वायव्यमेव च। अस्त्रं ब्रह्मशिरश्चैव राघवौ प्रत्यपद्यतां। अदृश्यमानेन रणे मायया वासवोपमौ।
मम नाथावनाथाया निहतौ राम लक्ष्मणौ। न च दृष्टिपथं प्राप्य राघवाभ्यां रणे रिपुः। जीवन् प्रतिनि
वर्तेत यद्यपि स्यान्मनोजवः। न कालस्यातिभारोस्ति कृतांतः खलु दुर्जयः। यत्र रामः सह भ्रात्रा श्रे
य ते रयुद्धे निर्जितः। नाहं शोचामि भर्तारं निहतं न च लक्ष्मणं। नात्मानं जननीं वापि तथा श्वश्रूं तप
स्विनीं। सा हि चिंतयते नूनं समाप्तव्रतमागतं। कदा द्रक्ष्यामि काकुत्स्थं ससीतं सहलक्ष्मणं।
सी परिदेवयतीं तां तु राक्षसी त्रिजटाब्रवीत्। मा विषादं कृथा देवि भर्तायं तव जीवति। कारणानि
तु वक्ष्यामि महांति सदृशानि च। यथेमौ भ्रातरौ वीरौ जीवितौ रामलक्ष्मणौ। न हि कोपपरीतानि
हर्षपर्युत्सुकानि च। भवंति युधि योधानां मुखानि निहते पतौ। इदं विरप्रधानाहि हतोत्साहा

कृतोद्यमा ॥ सेनाध्रमतिपु धपुषु हतकर्णेव नौ जले ॥ इयं पुनरसंभ्रांता स्वस्थ पृथा नराधिपेती ॥ सेनारक्षति का
कुत्स्थं श्यानं रणसंसदि ॥ इदं विमानं वैदेहि पुष्पकं नाम नामतः ॥ दिव्यं मे धारयेत्वां हि यदि रामा हतोभ
वत् ॥ सा त्वमेवं सुविस्पष्टैरनुमानैः सुखोदयैः ॥ अक्षतौ पश्य काकुत्स्थौ स्नेहादेतद्ब्रवीमि ते ॥ अनृ
तं नोक्तपूर्वं मे न च वक्ष्यामि मैथिलि ॥ चारित्रसुखशीलत्वात्प्रविष्टासि हि मे मनः ॥ नेतौ शक्यौ रणे जे
तुं आपि जेतुं सुरासुरैः ॥ तादृशं दर्शनं दृष्ट्वा मया चावेदितं च ॥ इदं तु सुमहच्चित्रं तच्च वक्ष्यामि मैथिल्क
नि ॥ संज्ञौ चारुकभावेतौ लक्ष्मीर्नैव विमुंचति ॥ प्रायेण गतसत्वानां पुरुषाणां गतायुषां ॥ दृश्यमानेषु
वक्त्रेषु परं भवति वैकृतं ॥ त्यज शोकं च दैन्यं च दुःखं च जनकात्मजे ॥ रामलक्ष्मणयोरर्थे नाद्येतौ रौ
वजीवितौ ॥ श्रुत्वा तद्वचनं तस्याः सीता सुरसुतोपमा ॥ कृतांजलिरुवाचेदं एवमस्त्विति राक्षसीं ॥

सा तत्कृपातमुखवी दीना तौ दृष्ट्वा रामलक्ष्मणौ ॥ हार्यपुत्रेति रुदंती बहुशो विललाप ह ॥ भर्तारं नि
हतं दृष्ट्वा लक्ष्मणं च महाबलं ॥ विललाप भृशं सीता करुणं जनकात्मजा ॥ निपतंतीव मूर्छिती
क्रोशंती मधुरस्वरा ॥ इदं तं विलापस्य सीतावचनमब्रवीत् ॥ ऊचुर्लक्षणिनो ये मां पुत्रिण्यविध
वेति च ॥ तेद्य सर्वे हते रामे ज्ञानिनो नृतवादिनः ॥ वीरपार्थिवपत्नी त्वं धन्येति मयि ये विदुः ॥
तेद्य ॥ यज्वानो महिषी ये मां ऊचुः पत्नीति सत्रिणः ॥ असंत सुखिनी चेति ये मामूचुर्द्विजा
तयः ॥ इमानि तानि पद्मानि पार्श्वे तायैः किल स्त्रियः ॥ अतिराज्ये भिषिच्यंते नरेंद्रैर्भर्तृभिः सह
वैधव्यं यांति यैर्नार्यो लक्षणैर्भाग्यदुर्लभा ॥ नात्मनस्तानि पश्यंती पश्यामि हतलक्षणा ॥ स

ततो रामो मंदमश्रूणि वर्त्तयन् ॥ लक्ष्मणं पतितं दृष्ट्वा दुःखशोकसमन्वितः ॥ किं मे सी
तया कार्यं पृथिव्या जीवितेन वा ॥ शयानं योद्य पश्यामि लक्ष्मणं शुभलक्षणं ॥ यत्र क्वचि
ल्लभे भार्यां पुत्राननन्यांश्च बांधवान् ॥ तं तु देशं न पश्यामि यत्र सोदर्यमाप्नुयां ॥ पर्जन्यो वर्षति सस्यं
इतीयं वैदिकी श्रुतिः ॥ प्रवादश्चापि सत्योयं भ्रातृजालं न वर्षति ॥ सा स मां बा सुमित्रा च कौश
ल्या जननी च मे ॥ नानयोरंतरं किंचित् मातृगौरवकारितं ॥ किं तु वक्ष्यामि कौसल्यां मातरं कै
तुकेकयीं ॥ कथं वाहं सुमित्राया मुखं द्रक्ष्यामि मातृकं ॥ उपालंभं न शक्यामि सोढुं तस्या भुखा
च्युतं ॥ विवत्सां विलपंतीं च क्रोशंतीं कुररीमिव ॥ कथमाभाषयिष्यामि सुमित्रां लक्ष्मणं विना
अद्य वह्निमवाप्नोति यत्र पतेच्छापि दिवाकरः ॥ सागरश्च क्षयं गच्छेत् लक्ष्मश्चापि सीलतां ॥ अपां प्रलयं च

तथा पवनश्चागतिर्भवेत् ॥ अंबायाम् सुमित्रायाः स्नेहनाशो भवेन्मयि ॥ लक्ष्मणश्चापि परया भक्त्या माम
नुगच्छति ॥ पतनमपि पाताले नैव नानुपतेत मां ॥ धारयेयं कथं प्राणानहं सौमित्रिणा विना ॥ भारार्त्तश्च
भारेणदुःखेनापि परिप्लुतः ॥ लभ्यातीतासमानारी जीवलोके विचिन्वता ॥ न लक्ष्मणसमो भ्राता सचिवः
सांपरायिकः ॥ किं नु वक्ष्यामि शत्रुघ्नं धर्मज्ञं भरतं नु किं ॥ सहयेन वनं यातो वनात्पुनरागतः ॥ उपा
लंभं न शक्ष्यामि सोढुं लक्ष्मणमातृतः ॥ इहैव देहं त्यक्ष्यामि न च जीवितुमुत्सहे ॥ धिङ् मां दुष्कृतक
र्माणं अनार्यं यत्कृते ह्ययं ॥ लक्ष्मणः पतितः शेते शरतल्पे गतासुवत् ॥ यो निर्विषण्णं सुविषण्णमां आश्वा
सयति दुःदुःखितं ॥ परासुर्नाद्य शक्नोति सोयं मामुपसर्पितुं ॥ येनाद्य बहवो युधि राक्षसाः शमिताः शरैः ॥
सोयं वि चेष्टते शूरः शरतल्पे गतासुवत् ॥ शयानः शरतल्पेस्मिन् स्वशोणितपरिप्लुतः ॥ शरजालावृतो

भातिभास्करोऽस्तमिव व्रजन् ॥ बाणैरर्दितसर्वांगो नशक्तोऽतिविचेष्टितुं ॥ रुजास्य बाधते कष्टं दृष्टिरा
गेण सूच्यते ॥ यथैवमां वारयते सोऽनुयातो महाद्युतिः ॥ अहमप्यनुयास्यामि तथैवैनं यमक्षयं ॥
इष्टबंधुजनो नित्यं मां च नित्यमनुव्रतः ॥ इमामवस्थां गमितो ममनार्यस्य दुर्नयैः ॥ सुरुष्टेनापि शू
रेण लक्ष्मणेन न संस्मरे ॥ परुषं विप्रियं वापि श्रावितो वर्जने वने ॥ लक्ष्मणेनतु सर्वं जीवितान्महिस्य न
जीवितात् ॥ नार्यप्रियोदितः कश्चिदुक्तपूर्वोऽपि विप्रियं ॥ विससर्जैकवेगेन पंच बाणशतानि यः ॥
इष्वस्त्रे स हि शूरो राज्ञः कार्त्तवीर्यस्य लक्ष्मणः ॥ अस्त्रैरस्त्राणि यो हन्याच्छक्रस्यापि महात्मनः ॥
सोऽयमुर्व्यां हतः शेते महार्हशयनोचितः ॥ इदं मिथ्या प्रलपितं हत्वा युधि दशाननं ॥ यन्मया न कृ
तो राजा राक्षसानां विभीषणः ॥ अस्मिन्मुहूर्ते सुग्रीवः प्रतिगंतुं त्वमर्हसि ॥ मत्वा हि समहाराज्ये

विमानं पुष्पकं तच्च संनिवर्त्य मनोजवं ॥ लंकां त्रिजटया सीता दीना भूयः प्रवेशिता ॥ ततस्त्रिजटया सार्धं पु
ष्पकादवतीर्य सा ॥ अशोकवनिकामेव जगाम जनकात्मजा ॥ तस्मिन्वने रामनरेंद्रपत्नी तौ राजपु
त्रौ परिचिंतयंती ॥ न शर्म लेभे हृदि ताडितेव दग्धेन बाणेन मृगीव बाला ॥ इत्यार्षे रामायणे सी
तासमाश्वासनो नाम सर्गः ॥ घोरेण शरबंधेन बद्धौ दशरथात्मजौ ॥ निःश्वसंतौ यथा नागौ शयानौ
रुधिरोक्षितौ ॥ सर्वे ते वानरश्रेष्ठाः ससुग्रीवमहाबलाः ॥ परिवार्य महात्मानौ तस्थुः शोकेन पी
डिताः ॥ अथ दीर्घेण कालेन संज्ञां लेभे नरोत्तमः ॥ प्रसमीक्ष्य तदात्मानं शोणितेन परिप्लुतं ॥
अदीनो दीनया वाचा मातृगोत्रमुदाहरन् ॥ अभाषत स्वरश्रेष्ठः हरिभिः परिवारितः ॥ विललाप

रक्तेण नेत्रेः कृष्णेन रेक्षणाः ॥ ततः सर्वाण्यनीकानि स्थापयित्वा समं ततः ॥ आजगाम गदापाणिंस्तत्र
मी बिभीषणः ॥ तं दृष्ट्वा तुलमायांतं नीलांजनचयप्रभं ॥ वानराविद्रुताः सर्वे मन्यमानास्म रावणिं ॥ नि
श्रेष्ठो वेग ॥ हानौ रणरेणुसमन्वितौ ॥ शराभिन्नो शरतल्पस्थो दृष्ट्वा मोयार्द्विभीषणः ॥ तेराप सेंद्रात्मज
नष्टवीर्यो भिपातितौ राजसुतौ च दृष्ट्वा ॥ जघन्यतोपि विव्यथिरे वनौकसो यो यथा इरिता ये शारदीवमेघाः ॥
इति श्रीरामायणे युद्धकांडे रामविलापोनाम सर्गः ॥ ॥ अथोवाच महातेजाः सुग्रीवः प्लवगाधिपः ॥
किमियं व्यथिता सेना भिन्ना नौरिव सागरे ॥ सुग्रीवस्य वचः श्रुत्वा राजपुत्रोंगदोब्रवीत् ॥ इह बाणार्दि
तौ दृष्ट्वा शयानौ रामलक्ष्मणौ ॥ शरजालावृतौ वीरौ उभौ परंदुःखितौ ॥ वरदानेकनेबाणैः निःप्रवं म
पमुऔ कृतौ ॥ तेनैयंदार्यनसे नाहीनातनमहात्मना ॥ स्वभावचपलां जातिंकि न जानासि वानरीं ॥

य अब्रवीद्वानरेंद्रस्तु सुग्रीवस्तारकासुतं ॥ नेवतावदपूर्वेण भावितव्यं भयेनच ॥ विषण्णवदना ह्येते नाना प्रहर
भ णादिशः ॥ प्रपलायंति हरयः त्रासादुत्फुल्लोचनाः ॥ अन्योन्यं नचलज्जंते नानिरीक्षंति पृष्ठतः ॥ प्रमा
थयंति चान्योन्यं पतितान् लंघयंतिच ॥ एतस्मिन्नंतरे वीरो गदापाणिर्बिभीषणः ॥ सुग्रीवं वर्धयामास
राघवौ चाभ्यवीक्षतौ ॥ बिभीषणं तु सुग्रीवो दृष्ट्वा वानरभीषणं ॥ ऋक्षराजं समीपस्थं धूम्रं वचनमब्र
वीत् ॥ बिभीषणोयं संप्राप्तो यं दृष्ट्वा वनचारिणः ॥ द्रवंसागतसंत्रासा रावणात्मजशंकया ॥ शीघ्र
मेतान् सुसंत्रस्तान्बहुधा संप्रधावितान् ॥ समवस्थापयाख्याहि बिभीषणमिहागतं ॥ सुग्रीवेणै
वमुक्तस्तु धूम्रऋक्षपतिस्तदा ॥ वानरान् सांत्वयित्वा हि न्यवर्तयत् प्लवंगमाः ॥ ते निवृत्तास्ततः सर्वे
वानरास्त्यक्तसंभ्रमाः ॥ ऋक्षराजवचः श्रुत्वा बिभीषणं ॥ बिभीषणस्तु रामस्य दृष्ट्वा मात्रं शरैः श्चितं ॥

युद्धकांड लक्ष्मणस्य वधे धर्मात्मा बभूव व्यथितस्तदा ॥ जघान कूजतेनेह हा तेन तयोर्गात्रं ममार्जसः ॥ शोकसं रभाय जया
५० पीडितमनाः रुरोद चिल्लालापह ॥ इमौ तौ सत्वसंपन्नौ विक्रांतौ प्रियदर्शनौ ॥ इमामवस्थां गमितौ
राक्षसा कूटयोधिना ॥ भ्रातुः पुत्रेण ते तेन दुःपुत्रेण दुरात्मना ॥ राक्षस्या जिह्मया बुध्या छलितावृजु
विक्रमौ ॥ शरैरधिरक्तौ विध्वौ रुधिरौघपरिप्लुतौ ॥ वसुधायामिमौ सुप्तौ कुप्ति तावेवाकिंशकौ ॥ य
योर्विक्रममासाद्य प्रतिष्ठाकांक्षिता मया ॥ ता विमौ मोहकौ क्लीव संज्ञौ नायवे जनतः ॥ जीवन्नद्य वि
पन्नोऽस्मि नष्टराज्यमनोरथः ॥ कृतार्थो नष्टश्चाशत्रुः सकामो रावणः कृतः ॥ एवं विलपमानं तं परि
ष्वज्य विभीषणं ॥ सुग्रीवः सांत्वयामास वचनं चेदमब्रवीत् ॥ विभीषण किमार्तस्त्वं किं च मां ना
भिभाषसे ॥ पर्यवस्थापयात्मानमेवं भूः शोकलालसः ॥ राघवस्त्वां च मामेवं समाश्वास्य समुत्थितः ॥ ५०

रावणो माचांहि स महाराजो भद्रयिष्यति ॥ अंगदस्तु पुरस्कृत्य ससैन्यः ससुहृद्गणः ॥ सागांतर सुग्रीव पुनस्तेनै
वसेतुना ॥ विजयोपि हि सुग्रीव लक्ष्मणे निधनं गते ॥ अंधस्येवोदितश्चंद्रः का प्रीतिं जनयिष्यति ॥ कृतं
हनुमता कर्म यदन्यैर्दुष्करं रणे ॥ वल्मीचिक्रमसंपन्ना राक्षसाप्रहितामृधे ॥ ऋक्षराजो च तथा गोलांग
गाधिपेन च ॥ अंगदेन कृतं कर्म मैंदेन द्विविदेन च ॥ सुषेणेन च वीरेण नीलेन च नलेन च ॥ युद्धं केस
रिणा संख्ये घोरं संपातिना कृतं ॥ गवयेन गवाक्षेण गजेन [illegible] पनसेन च ॥ अन्येश्च हरिभिर्युद्धं मदर्थे सक्तजीवि
तैः ॥ न चाति क्रमितुं शक्यं दैवं सुग्रीव मानुषैः ॥ यस्यते संभ्रमो नास्ति रावणं प्रति युध्यते ॥ यत्नत्कार्यं वयस्ये
न सुहृदा हितमिच्छता ॥ तत्कृतं नास्ति संदेहो भवता गम्यतां गृहं ॥ मित्रकार्यं कृतमिदं भवद्भिर्वान
रर्षभाः ॥ अनुज्ञाता मया सर्वे यथेष्टं गंतुमर्हथ ॥ शुश्रुवुश्चापि ये तस्य वानराः परिदेवितं ॥ ते सर्वे चक्रुर

स्माकुमो स्तराक्षसां॥ हरिसैन्येन महता कुंभंग पुनरावृतः॥ अथ कोपमहामोक्ष्ये ससैन्ये राघ
वेहदं॥ सपुत्रबांधवजने रुषितः कालसंभृतं॥ अथ धैर्यंच तेजश्च सौहृदं सत्वगौरवं॥ द्रक्ष्यंति
सर्वभूतानि रामे चद्रढभक्तितां॥ अथ चंदनसाराणां केयूरधरणस्य च॥ पारिष्वंगस्य नारीणां स्पर्शस्य
यावधस्य च॥ परिस्पर्शस्य माल्यानां सूक्ष्माणां चैव वाससां॥ अनुरूपा धर्मो बाहूमेत्र कर्मक
रिष्यतः॥ अथ रावणपुरीं लंकां सप्राकारां सतोरणां॥ नीलजीमूतसंकाशैः शत्रसैर्बहुभिर्वृतां॥
द्दिशोवद्धत्ववर्धयिष्यामि योधुर्मेघा निवोत्थितान्॥ स्वबाहुबलवीर्येण पश्यंतां सर्वरक्षसां॥ रावणं
प्रमाथिष्यामि येननेयद्वो रुगं॥ अथ रो कंचरोषंच दुःखंचेक्ष्वाकुनंदनः॥ वक्ष्यते कपदेरामः

सङ्गतेयुधिरावणः॥ यमशक्रकुबेरस्य वरुणस्येश्वरस्य च॥ वीर्येण राक्षसस्तुल्यो नमे जीवन्
विमोक्ष्यते॥ मुहूर्ताद्द्रिवपश्यध्वं कृतकर्माणमाहवे॥ निर्जित्य सीतां दास्यामि राघवाय महात्म
ने॥ कर्मणा तेन महता तोषयिष्यामि राघवं॥ कृतकृ सोभाविष्यामि यशः प्राप्स्यामि चोत्तमं॥
शांते शाल्ये यदार्येण राघवेण महात्मना॥ विभीषणाय दास्यामि राज्यं निहतकंटकं॥ स क्रो
धादिपुलयशा महानुभावो वाक्यैस्तैरेतैर्वज्रावचैक्र मोपपन्नैः॥ उत्साहं वज्रमाधिकं च
वानराणां संचक्रे द्विवसकरात्मजः कपींद्रः॥ इत्यार्षे श्रीरामायणे सुग्रीवगर्जनो नाम सर्गः
श्रुत्वैतद्धि नरेंद्रस्य सुषेणो वाक्यमब्रवीत्॥ देवासुरं मयायुद्धं अनुभूतं सुदारुणं॥ नदास्मदान
वादेवाः शरसंस्पर्शकोविदान्॥ वीर्ये निजघ्नुः सुबहुशः शातयंतो मुहुर्मुहुः॥ नानानि

नष्टसंज्ञांश्च परासूंश्च हसंति ॥ दिव्याभिमंत्रयुक्ताभिरोषधीभिश्चिकित्सति ॥ नानौषधीनानायितुं
क्षीरोदं यांतु सागरं ॥ जवना वानराः शीघ्रं संपातिपनसादयः ॥ ओषधीर्यश्च जानंति पार्वतीया वनौकसः
सः ॥ सुलेचाकरणेर्दिव्यां विशल्यां देवनिर्मितां ॥ यत्र द्रोणश्च चंद्रश्च पर्वतौ क्षीरतोयधेः ॥ आमृ
तं यत्र मथितं तत्र सा परमौषधी ॥ तत्र तौ निहितौ देवैः पर्वतौ तौ महोदधौ ॥ अयं वायुसुतश्चापि हनूमांस्तत्र
गच्छतु ॥ एवं तयोर्विब्रुवतोः सुखार्तानां महात्मना ॥ रामं प्रांते महात्मानं लक्ष्मणं च महाबलं ॥ सर्वे चमूढा
श्चभवन् ससुग्रीवविभीषणाः ॥ तस्मिंस्तदा वर्तमाने भ्रातृभ्यां व्यसनं महत् ॥ महारावो बलौघानां तस्मि
न्संग्राममूर्धनि ॥ विभीषणं च सुग्रीवः ध्यानमूकत्वमागतः ॥ पार्श्वावेवमहात्मानौ भ्रातरौ रामल

रावणं सहपुत्रेण वधिष्यति स बांधवं ॥ शरसंपीडितावेतौ भ्रातरौ रामलक्ष्मणौ ॥ वरदानकृतौ वीर्योहि
तौ वीरौ तं रक्षितौ ॥ ... ॥ तमेवं सांत्वयित्वा च परिष्वज्य च राक्षसं ॥ सुग्रीवः सत्वसंपन्न इदं वचनम
ब्रवीत् ॥ राज्यं प्राप्स्यसि धर्मज्ञ लंकायां नात्र संशयः ॥ रावणः सहपुत्रेण न स कामो भविष्यति
स्य कुंभोहि वधिष्यते रावणं सगणं रणे ॥ तमेवं परिवस्थाप्य राक्षसं वानराधिपः ॥ अब्रवीद्वानरेंद्र
स्तु सुग्रीवः पुत्रमंगदं ॥ सुषेणं श्वशुरं चैव सन्माहूयेदमब्रवीत् ॥ सह शूरैर्हरिगणैर्लब्धसंज्ञा
वरिकृषौ ॥ उभौ प्रापयतांक्षिप्रं किष्किंधां रामलक्ष्मणौ ॥ अहं तु रावणं हत्वा सगणं राघवप्रियं तथा ॥
मैथिलीमानयिष्यामि शक्रो नष्टामिवाश्रियं ॥ स वै गच्छतु किष्किंधां वर्जयित्वा च मारुतिं ॥ अनेना
हं सहायेन हनिष्ये राक्षसाधिपं ॥ रावणं सगणं हत्वा तोषयिष्यामि राघवौ ॥ एकः एव पुरीं लंकां भ

सुरसानित्यंमणिंकौस्तुभमेवच॥ मथ्यांनिमऽमृतार्थे वराहत्वमुपागतः॥ निहतश्चासुरः पूर्वं हिरण्याक्षो महाबलः॥
हिरण्यकशिपुश्चैव नरसिंहेन सूदितः॥ अदितेर्गर्भमाविश्य चित्रं प्रार्थ्यमानदः॥ इंद्रस्यार्थे महाबाहो बलिर्वैर्बधोम
हासुरः॥ इंद्रस्तु स्थापितो राज्ये देवतानां पुरंदरः॥ मधुश्च कैटभश्चैव निहतौ महासुरौ॥ कपिलत्वमुपागम्य सागरा नि तौ
हताः प्रभो॥ रामरामत्वमागम्य कृतानिःक्षत्रिया मही॥ हतः सहस्रबाहुश्च कार्तवीर्यार्जुनस्त्वया॥ कश्यपाय मही
दत्ता यज्ञेषु बहुदक्षिणा॥ अनंतरूपिणा मूर्ध्ना धृता लोके सकला मही॥ क्षीरोदशायनी यत्ते नागस्योपरि राघव॥ वदन्यो
तपसो नित्ये पवित्रं परमं कृतं तपः॥ आत्मा त्वं देवदेवेश कृष्णो जिष्णुस्तथैव च॥ महेंद्रस्त्वं महाबाहो वसूनामपि चाष्टमः॥
मरुतां पंचमश्चापि वृषभश्च तथा गवां॥ कपाली चैव रुद्राणां पितॄणां च परायणं॥ अश्विनौ चापि ते कर्णौ चंद्रादित्यौ
च चक्षुषी॥ ललाटे तौ स्थितौ ब्रह्मा धर्मो मनसि संस्थितः॥ आकाशं शिरसा व्याप्तं पद्भ्यां तु पृथिवी धृता॥ उदरं तेर्णवा
स्त्वम प्राणास्ते हव्यवाहनाः॥ दिशश्चैव स्थिता श्रोत्रे कक्ष्यां ते वसवः स्थिताः॥ कुबेरस्तो मित्रवरुणौ वक्षे च अर्के पय

स्थिताः॥ जानुनी चाश्विनौ रोमरोमण्योषधयः स्थिताः॥ दंष्ट्रास्ते चैव सर्वासु वेदास्ते संप्रतिष्ठिताः॥ शिरस्त्वात्ते च गायत्री ओंका
रो हृदि संस्थितः॥ ग्रीवाश्चैव संस्थिता गावो जिह्वायां तु सरस्वती॥ सर्वदेवमयश्च त्वं नास्ति किंचित्त्वया विना॥ सनातनस्त्वं
प्रभवं प्रलयोसि युगक्षयं॥ आदित्या वसवो रुद्रा विश्वेदेवास्तथाश्विनौ॥ सेंद्रा मरुद्गणा देवा लोकपालैः समन्विताः॥ देवर्ष
यो महात्मानस्तपसा ब्रह्मर्षयो मलाः॥ ब्रह्माणं वै पुरस्कृत्य विमानैः समुपस्थिताः॥ कांक्षमाणा जयं सर्वे अस्मिंस्त्वमासि दारु
णे॥ त्वं स्रष्टा सर्वलोकस्य स्थावरस्य चरस्य च॥ प्रभवश्चाप्ययश्चैव किमात्मानं न बुध्यसे॥ राक्षसानां विनाशाय प्रविष्टो
मानुषीं तनुं॥ नागपाशेन च बद्धस्त्वं तिष्ठसे किं करणाज्जर॥ लक्ष्मणेन सह भ्रात्रा स्मरस्व गरुडं प्रभो॥ स्मरणायं वैनतेयं तु स्मर्तुमर्ह
सि राघव॥ नान्यस्य शक्तिरस्ती हि वैनतेयादृते प्रभो॥ नागपाशाभिबद्धस्य तव चैव लक्ष्मणस्य च॥ नागमाशी महाभासो का रू
श्यपेयो महाबलः॥ तस्यागतिं हता नित्यं गतिर्वैरस्य सर्वतः॥ यो स्माद्रक्षः प्रयुक्तात्त्वां मोचयेच्छरबंधनात्॥ त्वयाहि ते रू
स्तु गमिष्यामि यथागतमरिंदम॥ एवं प्रसादे वर्षिर्महात्मा प्रबोध्य नारायणमप्रमेयं॥ जगाम लोकान्मनसा मय

त्वंनूपथागतो घृष्टगुणेरुपेतः॥ इत्यार्षे श्रीरामायणे युधकांडे नारदवाक्यं नामसर्गः॥ ॥ नारदस्य वचः श्रुत्वा संज्ञो
लब्धाच राघवः॥ मध्ये वानरसैन्यस्य सस्मार गरुडं तदा॥ अथैनमुपसंगम्य वायुः श्रोत्रे ऽब्रवीद्वचः॥ राम राम महा
बाहो आत्मानं स्मर वैतव॥ नारायणस्त्वं भगवान् राक्षसार्थेवतारितः॥ स्मर सर्पभुजं देवं येन तेयं महाबलं॥ सर्प
बंधनात् राम युवां संमोचयिष्यति॥ सतस्य वचनं श्रुत्वा राघवो रघुनंदनः॥ सस्मार गरुडं देवो भुजगानां भयावहं॥ एत
स्मिन्नंतरे वायुर्मेघाश्चासन् संधुतः॥ पर्यस्तं सागरे तोयं कंपंतश्च पर्वताः॥ महता पक्षवातेन सर्वे तीररुहा द्रुमाः॥ ब
हवः पतिता भग्नाः समूला लवणांभसि॥ सर्वंतः पर्वतास्त्रस्ताः दुद्रुवुस्तत्र वासिनः॥ ततो मुहूर्तात् गरुडं वैनतेयं म
हाबलं॥ वानराद्रदृशुः सर्वे ज्वलंतमिव पावकं॥ तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः॥ यैस्तौ सत्पुरुषौ बद्धौ
शरभूतौ महाबलौ॥ ततः सुपर्णः काकुत्स्थौ दृष्ट्वा प्रत्यभिनंद्य च॥ प्रममार्ज च पाणिभ्यां मुखे चंद्रप्रभे तयोः॥ येन त
येन संस्पृष्टाः सर्वे ते रुरुहुर्व्रणाः॥ सवर्णाश्च तयोर्गात्रे व्रणाः सर्वे तदाभवन्॥ तेनापि समुपाघ्राय सुपर्णं कनककुंभं॥

क्ष्मणौ॥ तानि वानरकोटीनां सहस्राणि शतानि च॥ तौ श्रेष्ठौ तौ नः प्रतिहृष्टौ दृष्ट्वा नरवरात्मजौ॥ वानराः पादपान् गृह्य रौ
द्रं [illegible]गर्जाणि चापरे॥ रामं च लक्ष्मणं चैव परिवार्या वनौकसः॥ एतस्मिन्नेव काले तु महायोगबलान्वितः॥ आजगाम महाते
जा देवर्षिर्नारदस्तथा॥ राघवस्य समीपे तु न्यपतत् सुखासीनः॥ कृत्वा प्रदक्षिणं रामं तेषां मध्ये वनौकसां॥ रुधिरोक्षितं
सर्वांगं पतितं धरणीतले॥ दृष्ट्वा तं च महात्मानं शरबंधेन पीडितं॥ हा कष्टमिति संचिंत्य नारदस्तमुवाच ह॥ रामं धर्मभृतां श्रे
ष्ठं शरबंधेन पीडितं॥ वत्स कोयं किमिदं देवसंप्राप्तोसीह भानद॥ एवमुक्त्वा महात्मा तं नारदो भगवानृषिः॥
अभितुष्टाव काकुत्स्थं स्मारयन् पूर्वजन्मनः॥ राम राम महाबाहो शृणु मद्वचनं वर॥ दिव्य लक्ष्मणस
संयोगात् आत्मानं न च बुध्यसे॥ भवान्नारायणः श्रीमान् सर्वलोकनमस्कृतः॥ शार्ङ्गचक्रायुधः स्र
ग्वी सर्पनागरिपुध्वजः॥ पुनर्महाद्भुतो परः पुरुषः शाश्वतो हरिः॥ वैकुंठस्त्वं महाबाहो देवदेवः प्रधा
नः॥ न परो विद्यते भूतेभ्यस्त्वत्तः पुरुषसत्तम॥ त्वं पद्मनाभः काकुत्स्थः हृषीकेशस्तथैव च॥ धारय

वत्॥ इमं श्रुत्वा तु वचनं त्वरमाणोहमागतः॥ सहसैव कृतस्नेहात्तु सखित्वमनुपालयन्॥ कारणं च वयस्यत्वेन प्रष्टव्यो
सि राघव॥ निहते रावणे पापे सख्यत्वं ज्ञास्यसेऽनघ॥ मोक्षितश्च मया घोरात् एतस्मादिषुबंधनात्॥ नत्वो वस्त्रोस्ति
अंधे राक्षसानां रणाजिरे॥ तेनोपम्येन धर्मज्ञ कृतघ्यो था हि राक्षसाः॥ एवमुक्त्वा ततो रामं सुपर्णः सुमहाबलः॥
परिष्वज्य च सुस्निग्धः भ्रांसष्टमुपचक्रमे॥ सखे राघव धर्मज्ञ रिपूणामपि वत्सल॥ अभ्यनुज्ञातुमिच्छामि गमिष्यामि
यथागतं॥ बालवृद्धावशेषां च कृत्वा लंकां शरोर्मिभिः॥ रावणं च रणे हत्वा सीतां समुपलप्स्यसे॥ इत्येवमुक्त्वा वचनं
सुपर्णः शीघ्रविक्रमः॥ रामं प्रदक्षिणं चक्रे मध्ये तेषां वनौकसां॥ प्रदक्षिणं चैव कृत्वा परिष्वज्याभिवाद्य च॥ जगा
माकाशमार्गं विश्य गरुत्मान् पवनो यथा॥ निरुजौ राघवौ दृष्ट्वा ततो वानरयूथपाः॥ प्रहृष्टाः स्वस्तिजुनोदान् राक्षसा
नां भयावहान्॥ ततो भेरीः समाजघ्नुः मृदंगांश्चाप्यवादयन्॥ दध्मुः शंखांश्च संहृष्टाः क्ष्वेडयंश्च सहस्रशः॥ अंबरं चापि
विक्रांता वानरा नगयोधिनः॥ ते वानरा भीमबला प्रहर्षात् कोपितैर्मुखैः॥ द्रुमानुत्पाट्य तरसा तस्थुः शतसहस्र

शः॥ मुंचमाना महानादं त्रासयंतो निशाचरान्॥ लंकाद्वारमभिक्रांता योद्धुकामाः प्लवंगमाः॥ तेषां सुभीमस्तुमुलो
निकोपात् भयवरा खाभगे पृथपानां॥ क्षये नदाघस्य यथा घनानां नादः सुभीमो नदतां निशीथे॥ इत्यार्षे रामायणे ना
गबंधो नाम सर्गः॥ ॥ तेषां सुतुमुलं शब्दं वानराणां तरस्विनां॥ नदतां राक्षसैः सार्धं तदा शुश्राव रावणः॥ स्निग्धगंभीरया
वाचा श्रुत्वा तत्र निनदं ततः॥ सचिवानां राक्षसानां मध्ये हृदयं च नमब्रवीत्॥ यथा हि संप्रहृष्टानां वानराणां समुत्थितः॥ बहूनां सु
सुमहान्नादो मेघानामिव गर्जतां॥ व्यक्तं सुमहती प्रीतिरेतेषां समुपस्थिता॥ यथा हि विविधैर्नादैः क्षुभ्यते वरुणालयः॥
तौ च बद्धौ शरैस्तीक्ष्णैर्भ्रातरौ रामलक्ष्मणौ॥ अयं च सुमहान्नादः शंकां जनयतीव नः॥ एतत्तु वचनं श्रुत्वा मंत्रिणां राक्षसा
धिपः॥ उवाच राक्षसान् तत्र समीपपरिवर्तिनः॥ ज्ञायतां तूर्णमेतेषां सर्वेषां वनचारिणां॥ शोककाले समुत्पन्ने हर्षकार
णमुत्तमं॥ तेन तथोक्ताः सुसंरब्धाः प्राकारमधिरुह्य च॥ ददृशुः पालितां सेनां सुग्रीवेण महात्मना॥ तौ च मुक्तौ महात्मा
नौ राघवौ पाशबंधनात्॥ समुत्थितौ महाभागौ विषण्णास्तत्र राक्षसाः॥ संत्रस्तमनसः सर्वे प्राकारादवरुह्य च॥ वि
षण्णवदना दीना राक्षसेंद्रमुपस्थिताः॥ भयात् संहृष्टरोमाणो राक्षसास्ते महाबलाः॥ तदप्रियं दीनमुखाः रावणायान्य

शाचराः॥ अवदन् यथातत्त्वं सर्वे वाक्यविशारदाः॥ योताविंद्रजिता युद्धे भ्रातरौ रामलक्ष्मणौ॥ प्रबद्धौ शरबंधेन निःप्रकंपभु
जौ कृतौ॥ विमुक्तौ शरबंधात्तौ दृष्टौ तौ रणमूर्धनि॥ पाशानिव गजौ छित्वा महेंद्रसमविक्रमौ॥ तच्छ्रुत्वा वचनं तेषां राक्ष
१ सेंद्रो महाबलः॥ चिंताशोकसमाक्रांतो विवर्णवदनोऽब्रवीत्॥ घोरैर्दत्तवरैर्बद्धौ शरैराशीविषोपमैः॥ अमोघैः सूर्यसंकाशैः प्र
मथ्येंद्रजिता युधि॥ तमस्त्रबंधमासाद्य यदि मुक्तौ रिपू मम॥ संशयस्थमिदं सर्वं मनुपश्याम्यहं बलं॥ निष्फलाः खलु सं
वृत्ताः शरा वासुकितेजसः॥ येन तेयाभिवासाद्य नागा ने गाक्षदोकसः॥ एवमुक्त्वा तु संक्रुद्धो निश्वसन्नुरगो यथा॥ अब्र
वीद्रक्षसां मध्ये धूम्राक्षं नाम राक्षसं॥ बलेन महता युक्तो रक्षसां भीमकर्मणां॥ निष्क्रम्य स्वबलायाशु राघवं वनौक
सां॥ एवमुक्तस्तु धूम्राक्षो राक्षसेंद्रेण धीमता॥ कृत्वा प्रदक्षिणं हृष्टो निर्जगाम नृपालयात्॥ अभिनिष्क्रम्य तद्द्वारात् बला
ध्यक्षमुवाच ह॥ त्वरयस्व बलं शीघ्रं युद्धकालेयमागतः॥ धूम्राक्षस्य वचः श्रुत्वा बलाध्यक्षो बलानुगः॥ बलमुद्योज
यामास रावणस्याज्ञया त्वरन्॥ ते बद्धघंटा बलिनो घोररूपा निशाचराः॥ विनर्दमानाः संहृष्टाः धूम्राक्षं पर्यवार ५६

बलं वीर्यं च तेजश्च तथैवौजस्सहः एव च॥ प्रदर्शनं च बुद्धिश्च तदा सो द्विगुणं तयोः॥ तावुत्थाय महावीर्यौ गरुडं वासवोपमं॥ उभौ सं
८ स्वजतुर्हृष्टौ रामश्चेदमुवाच ह॥ तव प्रसादाद्व्यसनं रावणिप्रभवं महत्॥ आवां शीघ्रमतिक्रांतौ क्षिप्रं च बलिनौ कृतौ॥ यथा
दशरथं तातं यथा तं च पितामहं॥ तथा भवंतमासाद्य हृदयं मे प्रसीदति॥ को भवानिह संप्राप्तो दिव्यस्रगनुलेपनः॥ व
सानो विरजसी वस्त्रे दिव्याभरणभूषितः॥ इत्युक्तः प्रत्युत्तं वाक्यं राघवेण महात्मना॥ उवाच गरुडो वाक्यं प्रेक्षतां वनौक म
सां॥ प्रीतात्मा संपरिष्वज्य बाष्पपर्याकुलेक्षणः॥ प्रहसन्नाह काकुत्स्थं सुपर्णः खगेश्वरः॥ अहं सखा ते काकुत्स्थ प्रा कु
णो बाह्य इवापरः॥ औरसः कश्यपसुतो विनता संभवो ह्यहं॥ गरुत्मानिह संप्राप्तो युवयोः साह्यकारणात्॥ असुरा
वा महावीर्या दानवाश्च महाबलाः॥ देवताया सगंधर्वाः पुरस्कृत्य शतक्रतुं॥ नेमं मोचयितुं शक्ताः शरबंधं सुदारुणं॥
मायाविना इंद्रजिता निर्मितोः क्रूरकर्मणा॥ एते हि नेत्रे ता नागाः क्षुद्रास्तीक्ष्णविषोल्बणाः॥ रक्षोमायाप्रभावेन
शरास्तीक्ष्णविषा भवन्॥ सभाग्यश्चासि धर्मज्ञ राम सत्यपराक्रम॥ लक्ष्मणेन सह भ्रात्रा संख्येष्वभिनिहतो स

त्

तान्दृष्ट्वा राक्षसानां भयावहान् ॥ प्रादुर्भूतान्महाघोरान्धूम्राक्षो व्यथितोऽभवत् ॥ ततः सुभीमैर्बहुभिर्निशाचरैर्वृतो
ऽभिनिष्क्रम्य रणोत्सुको बली ॥ ददर्श तां राघवबाहुपालितां समुद्रकल्पां बहुवानरां चमूम् ॥ ॥ इत्यार्षे रामायणे धूम्राक्ष
निर्याणं नाम सर्गः ॥ ॥ निर्यान्तं प्रेक्ष्य धूम्राक्षं राक्षसं भीमदर्शनं ॥ व्यनदुर्वानराः सर्वे प्रहृष्टा युद्धकांक्षिणः ॥ ते
षां सुतुमुलं युद्धं संजज्ञे हरिरक्षसां ॥ अन्योन्यं मुसलैर्घोरैः जघ्नतो शूलशक्तिभिः ॥ वानरा राक्षसैर्घोरैः पोथिता
श्च विदारिताः ॥ राक्षसा वानरैश्चापि द्रुमैर्भूमिसमाः कृताः ॥ राक्षसाश्चाभिसंक्रुद्धाः वानरान्निशितैः शरैः ॥ वि
भिदुर्घोररूपैस्तान् कंकपत्रैरजिह्मगैः ॥ ते गदाभिश्च भीमाभिः पट्टिशैः कूटमुद्गरैः ॥ घोरैश्च परिघैश्चित्रैस्त्रि
शूलैश्चापि संयुगे ॥ विदार्यमाणा रक्षोभिर्वानरास्ते महाबलाः ॥ अमर्षजनितोद्धर्षाश्चक्रुः कर्माण्यनेकशः ॥ तान्
निर्भिन्नगात्रास्तु शूलैर्निर्गतलोचनाः ॥ जगृहुस्ते द्रुमांस्तत्र शिलाश्च हरियूथपाः ॥ ते भीमवेगा हरयो नर्दमानाः
सहस्रशः ॥ ममंथू राक्षसान्घोरान्नामानि च वभाषिरे ॥ पुनश्च तुमुलस्तेषां संग्रामः समपद्यत ॥ तद्भूत्वाद्भुतं युद्धं

पु

तेषां संग्रामशालिनां ॥ शिलाभिर्विपुलाभिश्च बहुशाखैश्च पादपैः ॥ वानरा मथिताः केचित्केचित् भल्लैर्विदारिताः ॥ रा
चि क्षसा मथिताः केचिद्वानरैर्जितकर्मभिः ॥ वमंति रुधिरं केचिन्मुखै रुधिरभोजनाः ॥ पार्श्वे विदारिताः केचित्केचिद्रा
शीकृता द्रुमैः ॥ शिलाभिश्चूर्णिताः केचित् नरयः केचिद्विदारिताः ॥ ध्वजैर्विगलितैर्भिन्नैः खरैश्चावनिपातितैः ॥
रथैर्निर्मथितैः केचित् केचिन्मथितवाहनाः ॥ विरूपवदना घोरा विप्रकीर्णशिरोरुहाः ॥ मग्नाः शोणितगन्धे
न निपेतुर्धरणीतले ॥ अन्ये तु परमक्रुद्धा राक्षसा भीमदर्शनाः ॥ दुद्रुवुः शूलपाणेश्च वज्रस्पर्शैश्च वानरान् ॥ त्र
वानरैरापतंतश्च वेगिनां वेगवत्तरैः ॥ मुष्टिभिश्चरणैश्चैव पादपैश्च विपोथिताः ॥ सैन्यं साथ द्रुतं दृष्ट्वा धूम्राक्षो
राक्षसैर्वृतः ॥ कोपेन कदनं चक्रे वानराणां युयुत्सतां ॥ प्रासैः प्रमथिताः केचिदुद्वमुः शोणितं मुखैः ॥
मुद्गरैराहताः केचित्पतिता धरणीतले ॥ परिघैः फलिता भग्ना भिंडिपालैः परश्वधैः ॥ पट्टिशैराहताः केचित्

केचित्तैर्विदलीकृताः॥ केचिद्विमथिताभूमौ रुधिरार्द्रा वनौकसः॥ केचित्तु विद्राविता नष्टाः संक्रुद्धैराक्षसैर्युधि।
विभिन्नहृदयाः केचिदेकपार्श्वेन शायिनः॥ विदारितास्त्रिशूलैश्च केचिद्दंष्ट्राविदारिताः॥ ततोऽभूत्सुमहद्यु
द्धं हरीणां रक्षसां॥ अभयं छस्त्रबहुलं शिलापादपसंकुलं॥ धीवक्ते व्याकुलं चैव प्रसन्नं च बभूव ह॥ धनुर्ज्या ज्यो
तंत्रिमधुरं हिक्कातालसमाकुलं॥ मंदस्तनितसंगीतं युद्धं गांधर्वमाबभौ॥ धूम्राक्षस्तु धनुष्पाणिर्वानरान्
रणमूर्धनि॥ हसन्विद्रावयामास दिशस्तान् शरवृष्टिभिः॥ धूम्राक्षेणार्दितं सैन्यं व्यथितं प्रेक्ष्य मारुतिः॥
उपेत क्रोधसंदृष्टः प्रगृह्य महतीं शिलां॥ क्रोधाद्द्विगुणताम्राक्षः पितुस्तुल्यपराक्रमः॥ शिलां तां पातया
मास धूम्राक्षस्य रथोपरि॥ आपतंतीं शिलां दृष्ट्वा गदामुद्यम्य संभ्रमात्॥ रथादाप्लुत्य वेगेन वसुधायां व्यवस्थि
तः॥ सा प्रमथ्य रथं तस्य निपपात शिला भुवि॥ सचक्रकूबरहयं सध्वजं सशरासनं॥ भित्वा तु स रथं
तस्य हनूमान्मारुतात्मजः॥ क्रोधात्संरक्तनयनः बभूवांतकसन्निभः॥ समाहूतैर्महावीर्यैः सुग्रीवस ५८

थन्॥ विविधायुधहस्तास्ते शूलमुद्गरपाणयः॥ गदाभिः पट्टिशैः खड्गैः आयसैश्चापि मुद्गरैः॥ परिघैर्भिंडिमालैश्च
भल्लैः शूलैः परश्वधैः॥ निर्ययू राक्षसा दिग्भ्यो नर्दंतो युद्धलालसाः॥ रथैः कवचिभिश्चान्ये ध्वजैश्च समलंकृ
तैः॥ सुवर्णजालसंयुक्तैः खरैश्च विकृताननैः॥ हयैः परमशीघ्रैश्च चामरापीडधारिभिः॥ प्रभिन्नकरटैश्चैव ग
जेंद्रैरद्रिसन्निभैः॥ निर्ययुर्नैर्ऋतव्याघ्राः व्याघ्रा इव दुरासदाः॥ वृकसिंहमुखैर्युक्तं खरैः कनकभूषणैः॥ आ
रुरोह रथं दिव्यं धूम्राक्षः खरनिस्वनः॥ स निर्ययौ महातेजा धूम्राक्षो राक्षसैर्वृतः॥ पश्चिमेन तु द्वारेण हनूमान्यत्र यू
थपः॥ प्रयांतं तु महाघोरं राक्षसं भीमविक्रमं॥ अंतरिक्षचराचालायचेरुर्लोमहर्षणाः॥ रथशीर्षे महाभीमो गृध्र
श्च निपपात ह॥ ध्वजाग्रे ग्रथिताश्चास्य निपेतुर्मांसभोजनाः॥ रुधिरार्द्रो महान् श्वेतः छत्रं च निपपात ह॥ ववर्ष रु
धिरं देवः प्रचचाल च मेदिनी॥ प्रतिलोमाकुलो वायुः निर्घातसमनिस्वनः॥ तिमिरौघसमाक्रांता दिशश्च न चका
सिरे॥ धध्वंकंकद्विजाः श्येना येचान्ये रुधिराशनाः॥ विस्वराः ससृजुर्वाचो धूम्राक्षस्य समीपतः॥ उत्पातांश्च

तं॥ शीघ्रं निर्यातु दुर्धर्षा राक्षसा भीमविक्रमाः॥ अकंपनं पुरस्कृत्य सर्वशस्त्रविशारदं॥ एष शास्ता च गोप्ता च
नेता च युधि बुद्धिमान्॥ भूतिकामश्च मे नित्यं नित्यं च समरप्रियः॥ न च कंपयितुं शक्यः सर्वैरपि सुरासुरैः॥ अकं
प्योकंपनः श्रीमानादित्य इव तेजसा॥ एष जेष्यति काकुत्स्थं सुग्रीवं च महाबलं॥ वानरांश्चापि घोरांश्च वधयंने
ष्यति राक्षसः॥ प्रतिगृह्य स तामाज्ञां रावणस्य महाबलः॥ बलं संवर्धयामास तदा लघुपराक्रमः॥ ततो नानाप्रहरणाः
भीमाक्षा भीमदर्शनाः॥ निर्ययो राक्षसा मुख्या बलाध्यक्षप्रणोदिताः॥ रथमास्थाय तु श्रीमान् तप्तकांचनभूषणः॥ स
दश्वैः सबलैर्युक्तो हेमजालविभूषितः॥ राक्षसैः संवृतो भीमैः तप्तकांचनकुंडलैः॥ सरथं दुर्गी कवची बाणी नि
र्ययौ राक्षसैर्वृतः॥ स कंपनोऽरतो घोरै राक्षसैः सुमहाबलः॥ तस्य निर्गच्छतस्तूर्णं अकस्माद्व्यथवाजिनः॥ अश्वनैः
सहसा पेतुर्भुवि विक्लवचेतसः॥ प्रास्यंदत्तो क्षणं चापि सत्सं युद्धाभिकांक्षिणः॥ विभेदमुखवर्णश्च कंठो वैस्वर्यमा
ययौ॥ अकस्माद्दारुणो गृध्रो ध्वजाग्रे समलीयत॥ दुर्भोच वरपोलस्य सव्यो बाहुस्तथैतरः॥ अकंपनमुहुः सघः

तस्मिन्काले तु राक्षसः॥ आकुलं गगनं चासीत् दुर्दिनं रूक्षमारुतं॥ उच्चुक्रुशुर्मृगाश्चास्य वाचः क्रूरा भयावहाः॥ ऊचु
स्वरं च दीप्तं चाविस्वरं च गपक्षिणः॥ स तु संज्ञां च तत्स्कंधः शार्दूलसमविक्रमः॥ तानुत्पातानधः कृत्वा निर्जगाम नि
शाचरः॥ तस्याभिनिष्पतमानस्य नगर्याः सहराक्षसैः॥ बभूव सुमहान्नादः क्षोभयन्निव सागरं॥ तेन नादेन वित्रस्ता
वानराणां महाचमूः॥ द्रुमशैलप्रहरणा युद्धे समवतिष्ठत॥ तेषां युद्धं महाघोरं संजज्ञे कपिरक्षसां॥ रामरावणयो
रर्थे समभित्यक्तजीवितं॥ सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसंनिभाः॥ हरयो राक्षसाश्चैव परस्परजयैषिणः॥ तेषांवि
नर्दतां शब्दः संयुगेषु तरस्विनां॥ शुश्रुवे सुमहान्तस्मिन् अन्योन्यमभिगर्जतां॥ रजश्च सुमहोद्भूतं सुभीमम भवत्तदा॥ सर्वा ९१
नाही रक्षोभिः संरुरोध महाद्भुतः॥ अन्योन्यं रजसा तेन कौशेयोद्धूतपांडुना॥ संवृतं धूमधूम्रेण ददृशुर्न रणा
जिरे॥ न ध्वजो वा पताका वा वर्म वा तुरगोपि वा॥ आयुधं स्यंदनं वापि ददृशुः तेन रेणुना॥ शब्दस्तु तुमुलं तत्र नद
तामभिधावतां॥ श्रूयते चोरविपुलः संख्ये न रूपाणि चकाशिरे॥ हरीनेव सुसंरब्धा हरयो जघ्नुराहवे॥ राक्षसाश्चा
पि रक्षांसि निजघ्नुः समरे तदा॥ ते परांश्चापि निघ्नंतः स्वांश्च वानरराक्षसाः॥ रुधिरार्द्रां तदा चक्रुर्महीं दारुणक

द्रुमैः॥ हतानां रुधिरौघेण शराणां मोहितं रजः॥ शरीरैश्च संस्तीर्णं बभूव च वसुंधरा॥ द्रुमशक्तिशिलाप्रासगदापरिघतो
मरैः॥ राक्षसा हरयश्चैव जघ्नुरन्योन्यमोजसा॥ बहुभिः पर्वताकारैरस्यंतः पर्वतोपमाः॥ वानरान् सूदयामासुः सं
रब्धा रजनीचराः॥ वानराश्चापि रक्षांसि महाद्रुमशिलाश्मभिः॥ अभिजघ्नुरतिक्रम्य शस्त्राण्याच्छिद्य वीर्यतः॥ ए
तस्मिन्नंतरे वीरा हरयः कुमुदो नलः॥ मैंदोथ द्विविदः क्रुद्धाश्चक्रुर्युद्धमनुत्तमं॥ ते मुष्टिभिर्महावेगा राक्षसानां चमूमु
खे॥ कदनं सुमहच्चक्रुर्लीलया हरियूथपाः॥ अभिचेरुः समपुरेतो शिलापादपवर्षणैः॥ उद्धूतगर्जितरवाः मेघा इव
बभुस्तदा॥ तथा तद्रक्षोगणवन्नदंतं रोषात्समानामाश्वरथाद्विपानां॥ महोदधिक्षुब्धमिवानुरूपा निशाचराणां बलमा
बभासे॥ निपातयंतो विबलान्निशाचरान् तलप्रहारैः करजैश्च कोपिताः॥ विचेरुरुद्धैः प्लवगेश्वरा रणे बलानि र
क्षोधिपतेरुदारानीं॥ इत्यार्षे रामायणे अकंपननिर्याणो नाम सर्गः॥ रक्षसां वानरैर्दृष्ट्वा सुमहत्कदनं कृतं॥ क्रोधमाहा
रयामास तेषां तीव्रमकंपनः॥ क्रोधमूर्छितवेगस्तु धुन्वन्परमकार्मुकं॥ दृष्ट्वा तत्कर्म शत्रूणां सारथिं वाक्यमब्रवीत्
॥ अत्रैव तावत्त्वरितं याहि सारथे यत्र वानराः॥ एते हि सहिता घ्नंति राक्षसान् सुबहून्रणे॥ एते हि राक्षसानां किं कदनं ६०

चियो बली॥ रक्षसां कदनं चक्रे सस्कंधविटपैर्द्रुमैः॥ विभिन्नशिरसो भग्ना राक्षसाः शोणितोक्षिताः॥ द्रुमैः प्र
मथिताश्चान्ये निपेतुर्धरणीतले॥ विद्राव्य राक्षसानीकं हनूमान्मारुतात्मजः॥ गिरेः शृंगं तु संगृह्य धूम्राक्षं वि
द्रवन् बली॥ तमापतंतं धूम्राक्षो गदामुद्यम्य वीर्यवान्॥ विनदंतं हनूमंतं मत्वा धावत संयुगे॥ न स चैव क्रुद्धः सरोषेण ग
दां तां बहुकंटकां॥ न्यपातयत धूम्राक्षः स्तनदेशे हनूमतः॥ ताडितः स तया तत्र गदया भीमरूपया॥ स्तनदेशे म
हावीर्यो मारुतिर्गतसाध्वसः॥ स कपिर्मारुतबलः सप्रहारमचिंतयत्॥ धूम्राक्षस्य शिरोमध्ये गिरिशृंगमपा
तयत्॥ स विह्वलितसर्वांगो गिरिशृंगेण ताडितः॥ पपात सहसा भूमौ विशीर्ण इव पर्वतः॥ निहतं राक्षसं दृष्ट्वा
हतशेषा निशाचराः॥ त्रस्ताः प्रतिगता लंकां वध्यमानाः प्लवंगमैः॥ स भग्नजानुर्मथितोरुवक्षाः सुविह्वलः शो
णितलोचनाक्षः॥ अवाक् तथा शोणितमुद्गिरन्मुखात्पपात भूमावथ नष्टचेतनः॥ स तं निहत्य रजनीचरं त्वरा
न्यक्षतजानितांतरं त्वकर्दमां महीतलं॥ रिपुवधजनितश्रमप्रहृष्टः पवनसुतः स सदृशाद्रिराचितस्तु॥ इत्यार्षे रामाय
णे धूम्राक्षवधः सर्गः॥ ॥ धूम्राक्षं निहतं श्रुत्वा रावणः क्रोधमूर्छितः॥ बलाध्यक्षमुवाचेदं कृतांजलिमुपस्थि

सुमहत्कृतं॥ मयितिष्ठतिशत्रुघ्नेनामीवानरपुंगवाः॥ प्रसभंवर्न्नयिष्यंतिसैन्यंयेनभृसुदुःसहे॥ अत्रैवतावत्व
रितःसारथेनयमेरथं॥ एतेहिबलवंतश्चभीमकायाश्चवानराः॥ द्रुमशैलप्रहरणाःतिष्ठंतिप्रमुखेमम॥
एतान्निहंतुमिच्छामिसमरश्लाघिनोरणे॥ एतैर्हिराक्षसानीकंकृतंछिद्रंनिरंतरं॥ ततःप्रव्रजिताश्वेनरथे
नरथिनांवरः॥ हरीन्अभ्यपतन्क्रोधात्किरन्बाणैरकंपनः॥ नस्थातुंवानराःशेकुःकिंपुनर्यो
द्धुमाहवे॥ अकंपनशरैर्भग्नाःसर्वएवप्रदुद्रुवुः॥ तान्मृत्युवशमापन्नान्अकंपनवशानुगान्॥ समी
क्ष्यहनुमान्ज्ञातीसप्रतस्थेमहाबलः॥ तंमहाप्लवगंदृष्ट्वासर्वेतेप्लवगाधिपाः॥ समेतासमरेवीराःस
मग्राःपर्यवारयन्॥ हनूमंतंचतेदृष्ट्वावभूवुर्हरियूथपाः॥ विश्वस्तावालिनःसर्वेबलवंतमुपाश्रिताः
अकंपनस्तुशैलाभंहनूमंतमुपस्थितं॥ महेंद्रमिवधाराभिःशरैरभ्यववर्षत॥ अचिंतयित्वातान्बाणा
न्शरीरेपतितःशिलान्॥ अकंपनवधार्थंचमहाभागोदधेमनः॥ संप्रहस्यमहातेजाःहनूमान्पवना

मज्ञः॥ रक्षसां तोभिदुद्राव कंपयन्निव मेदिनीं॥ तस्यावमर्दमानस्य दीप्यमानस्य तेजसा॥ बभूव रूपं दुर्धर्षं शक्रस्येवाघ
तावाने:॥ आत्मनस्त्वाप्रहरणं बुध्वा क्रोधसमन्वितः॥ शालमुत्पाटयामास गिरिशृंगमिवोच्छ्रितं॥ गृहीत्वा तु महाशालं पा
णिनैकेन मारुतिः॥ विनद्य सुमहानादं त्रासयामास राक्षसान्॥ ततस्तमभिदुद्राव निशाचरमकंपनं॥ निहंतुं नमु
चिं क्रुद्धो वज्रेणेंद्रमिवाहवे॥ आपतंतं च तं दृष्ट्वा शालहस्तं च मारुतिं॥ ताडयामास बाणौघैः शालं चाप्यस्य चिच्छिदे॥
च्छिन्नं च वृक्षं सहसा व्यवधूय महाकपिः॥ समुत्पाट्य गिरेः शृंगमभिदुद्राव राक्षसं॥ अकंपनस्तु तं दृष्ट्वा गिरिशृंगं समुद्य
तं॥ दूरादेव महाबाणैः खंडं खंडमदारयत्॥ तत्पर्वताग्रमाकाशे रक्षो बाणैर्विदारितं॥ विकीर्णं पतितं दृष्ट्वा हनूमान् विस्मि
तोभवत्॥ सोऽश्वकर्णं समासाद्य रोषदर्पान्वितो हरिः॥ तूर्णमुत्पाटयामास महागिरिमिवोच्छ्रितं॥ तं गृहीत्वा महास्कंधं महा
कायो महाद्युतिः॥ प्रहस्य परमप्रीतो भ्रामयामास वीर्यवान्॥ प्रधावन्नुरुवेगेन प्रभंजंस्तरसा द्रुमान्॥ हनूमान् पर
मक्रुद्धश्चरणैः कंपयन्महीं॥ राक्षसान् सगजारोहान् सरथान् सहयद्रुमान्॥ जघान समरे क्रुद्धः पदातींश्चापरान् ब
हून्॥ तदंतकमिव क्रुद्धं समरे प्राणहारिणं॥ हनूमंतमभिप्रेक्ष्य राक्षसा विप्रदुद्रुवुः॥ तमापतंतं संरब्धं राक्षसानां भयाव
हं॥ ददर्शाकंपनो वीरः चुक्रोध च महाबलः॥ स चतुर्दशभिर्बाणैः निशितैर्देहभेदिभिः॥ बिभेद समहावीर्यो हनूम

नुर्योधिभिः ॥ इत्यार्षे रामायणे युद्धकांडे अकंपनवधः ॥ ततस्तु रावणः क्रुद्धः श्रुत्वा हतमकंपनं ॥ पुरीं लंकां सर्वान्गु श्रीयधो
ल्मानवेक्षितुं ॥ तां राक्षसगणैर्गुप्तां गुल्मैश्च बहुभिर्वृतां ॥ ददर्श राजा नगरीं बहुध्वजपताकिनीं ॥ रुद्धां तु न
गरीं दृष्ट्वा रावणो राक्षसेश्वरः ॥ उवाचामर्षितः काले प्रहस्तं युद्धकोविदं ॥ पुरस्योपनिरुद्धस्य सहसा पीडन
स्य च ॥ नान्यं समर्थं पश्यामि युद्धे युद्धविशारद ॥ अहं वा कुंभकर्णो वा त्वं वा सेनापतिर्मम ॥ इंद्रजिद्वा निकुंभो वा वहे
युर्भारमीदृशं ॥ स त्वं बलमितः क्षिप्रमादाय परिगृह्य च ॥ विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥ निर्याणादेव ते न
नं वीरश्चपला हरिवाहिनी ॥ नदतां राक्षसेंद्राणां श्रुत्वा नादं द्रविष्यति ॥ चपला ह्यविनीताश्च चलचित्ताश्च वा
नराः ॥ घोषं तेन सहिष्यंति सिंहनादमिव द्विपाः ॥ विद्रुते च बले तस्मिन्रामः सौमित्रिणा सह ॥ अवशस्ते निरालंबः
प्रहस्तवशमेष्यति ॥ आपत्संशयिता श्रेयो न तु निःसंशयीकृतं ॥ प्रतिलोमानुलोमं च यद्वा न्यन्मन्यसे हितं ॥ रा
वणेनैवमुक्तस्तु प्रहस्तो राक्षसाधिपः ॥ राक्षसेंद्रमुवाचेदमसुरेंद्रमिवोशना ॥ राजन्मंत्रितपूर्वं कुशलैर्मंत्रिभिः सह
विवादश्चापि नो वृत्तः समवेक्ष्य परस्परं ॥ प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया ॥ अप्रदाने पुनर्युद्धं दृष्टमेत

तदेव हि ॥ सोहं दानैश्च मानैश्च सततं पूजितस्त्वया ॥ सांत्वैश्च विविधै राजन्किं न कुर्यां प्रियं तव ॥ मद्बाणाशनिवेगेन हता
नां च रणाजिरे ॥ अद्य तृप्यंतु मांसेन पक्षिणः काननौकसः ॥ न हि मे जीवितं रक्ष्यं पुत्रदारधनानि च ॥ संपश्य मां
जुहूषंतं त्वदर्थं जीवितं रणे ॥ एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः ॥ उवाचेदं बलाध्यक्षं प्रहस्तः पुरतः स्थितान् ॥
समानयत मे क्षिप्रं राक्षसानां महद्बलं ॥ अद्य तानाशयिष्यामि वेगेन हरिवाहिनीं ॥ इत्युक्तास्ते प्रहस्तेन बलाध्य
क्षाः कृतत्वराः ॥ बलमुद्योतयामासुस्तस्मिन्राक्षसमंदिरे ॥ सा बभूव मुहूर्तेन तिग्मनानायुधध्वजाः ॥ [illegible]
लंका राक्षसवीरैस्तैर्गजैरिव समाकुला ॥ हुताशनं तर्पयित्वा ब्राह्मणांश्च नमस्य तान् ॥ हव्यगंधं प्रतिवहन्सुरभि
र्मारुतो ववौ ॥ तर्पयित्वा च तेनाग्निं विधिवज्जातवेदसं ॥ स्रुचश्च विविधाकाराः शिरोभिरभिमंत्रिताः ॥ संग्राम
सज्जाः संहृष्टाः धारयंति महाबलाः ॥ ब्राह्मणान्स्वस्तिवाच्याग्रे संग्रामायाभवन्स्थिताः ॥ धनुर्हस्ताः कवचिनो
वेगेनाप्लुत्य राक्षसाः ॥ रावणं प्रेक्ष्य भर्तारं प्रहस्तं पर्यवारयन् ॥ अथामंत्र्यैव राजानं भेरीमाहत्य भैरवीं ॥ आरुरोह
रथं दिव्यं प्रहस्तः सज्जकार्मुकः ॥ प्रणम्य रावणं चैव प्रहस्तेन कल्पितं ॥ आरुह्य सर्वयंत्राढ्यं कांचनांगदकुंडलः ॥

स्त

सर्वायुधसमोपेतं किंकिणीजालमालिनं ॥ हेमैमहाजवैर्युक्तं सम्यक्सूतसमाचितं ॥ महाजलदनिर्घोषं श्री
मच्चंद्रार्कभास्वरं ॥ उदग्रध्वजनिर्घोषं वरूथोपस्करांचितं ॥ सुवर्णजालसंयुक्तं प्रज्वलंतमिवश्रिया ॥ नरवा
नरनाशाय रावणार्थे च राक्षसः ॥ लंकाया निर्ययौ क्षिप्रं बलेन महतावृतः ॥ ततो दुंदुभिनिर्घोषपर्जन्यनिन
दोपमः ॥ शुश्रुवे शंखशब्दश्च प्रयाते वाहिनीपतौ ॥ व्यूहेनैवाति घोरेण आग्रेण सार्वर्ययौ ॥ गजयूथनिकाशे
न बलेन महतावृतः ॥ विनदंतोऽरवान् घोरान् राक्षसा जग्मुरग्रतः ॥ भीमरूपा महाकायाः प्रहस्तस्य पुरःसराः ॥ सा
गरस्येव निर्घोषे बलेन महतावृतः ॥ प्रहस्तो निर्ययौ क्रुद्धो कालांजनचयोपमः ॥ तस्य निर्याणघोषेण राक्षसानां
च गर्जतां ॥ लंकायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः ॥ विभ्रमाकाशमाविश्य शस्त्रवर्णं स्वरस्वनं ॥ ववर्षरुधिरं दे
वः प्रहस्तस्य रथोपरि ॥ ध्वजेमूर्धनि गृध्रोस्य निलीनो दक्षिणामुखः ॥ वेमसः पार्श्वज्वालाः शिवा घोरा ववाशिरे ॥ क
प्रयातस्य च संग्रामे छाया च विकृताभवत् ॥ अश्रुपूर्णं मुखं चास्य दक्षिणं स्खलितो हयः ॥ सारथिर्बहुधा चास्य
प्रमनाभवगाहतः ॥ ततो दैन्यपतत्तस्मात् धारण्यां हयशालिनः ॥ निर्याणश्रीश्च तस्यासीद्या सुराणां सुदुर्लभा ॥ ६२

नमकंपनः ॥ स तथा तेन विधस्तु बहुभिर्मार्गणैः शरैः ॥ हनुमान्ददृशे वीरो रुधिरेण समुक्षितः ॥ उत्पाट्य सहसा वृक्षं कृ
त्वा वेगमनुत्तमं ॥ शिरस्यभिजघानाशु निशाचरमकंपनं ॥ तेन वृक्षप्रहारेण वज्रेणेव बिडौजसा ॥ राक्षसो वानरें
द्रेण क्रोधनीयमसादनं ॥ तं दृष्ट्वा पतितं भूमौ कंपमानमकंपनं ॥ व्यथिता राक्षसाः सर्वे राक्षसास्ते पराजिताः ॥ लंकां प्र
विविशुस्त्रस्ता हन्यमानाः प्लवंगमैः ॥ ते मुक्तकेशाः संविग्ना भज्यमानाः पराजिताः ॥ भयात्श्रमजलैर्गात्रैः
श्वसंतो विप्रदुद्रुवुः ॥ अन्योन्यमाभिनर्दंतो विविशुर्नगरं तदा ॥ पृष्ठतस्ते ससंमूढाः प्रेक्षमाणा मुहुर्मुहुः ॥ तेषां संप्रज
तां सर्व्यं विशतां च पुरीं भयात् ॥ राक्षसानां जवं दृष्ट्वा विनेदुस्ते वनौकसः ॥ ते पुलंकां प्रविष्टेषु राक्षसेषु प्लवंगमाः ॥ स
मेत्य हरयः सर्वे हनूमंतमपूजयन् ॥ सोपि प्रहृष्टस्तान्सर्वान् वानरान् प्रत्यपूजयत् ॥ हनूमान् स स्वसंपन्नो यथा
हमनुरूपतः ॥ विनेदुश्च यथाकालं हरयो जितकाशिनः ॥ पुनश्च जघ्नुः पोलितान् सप्राणानेव राक्षसान् ॥
एवं स सर्वं न्यहरान् कृत्वा कर्म सुदुष्करं ॥ आजगाम महाबाहुर्यत्र रामः सलक्ष्मणः ॥ स वीरशोभामतुलां महा
कपिर्निहत्य रक्षांसि रसाद्यथावान् ॥ महासुरं भीममिमामित्रहंता पनो यथैवाति न्यूर्वलिनं चमूमुखे ॥ अपूजयन्
न् देवगणास्ततः कपिं स्वयं च रामोतिरथस्तु लक्ष्मणः ॥ तथैव सुग्रीवमुखाः प्लवंगमा विभीषणश्चैव सहा

विधार्दीर्घा योधुकामाः प्लवंगमाः ॥ तेषामन्योन्यमासाद्य संग्रामः सुमहानभूत् ॥ वहूनामश्मवर्षं च शरवर्षं च मुंच हिं
तां ॥ वहवो राक्षसा युद्धे वहून्वानरयूथपान् ॥ वानराश्चापि रक्षांसि निजघ्नुश्च परान्वहून् ॥ शूलैः प्रमथिताः केचित्
वानरा राक्षसैर्युधि ॥ परिघैराहताः केचित्केचिच्छिन्नाः परश्वधैः ॥ निरुच्छ्वासाः पुनः केचित्निपेतुर्धरणीतले ॥ वज्र
स्पर्शैस्तलैश्चान्ये मुष्टिभिश्चाहता भृशं ॥ अवमन्शोणितं वक्त्रात्विकर्णदशनेक्षणाः ॥ आर्तस्वरं च नदतां सिंहनादं च ग
र्जतां ॥ वभूव तुमुलः शब्दो हरीणां रक्षसां तथा ॥ वानरा राक्षसाश्चैव वीरमार्गमनुश्रिताः ॥ विवृत्तनयनाः क्रुद्धाः चक्रुः कर्माण्य
भीतवत् ॥ एतस्मिन्नंतरे शूराः प्रहस्तस्य पदानुगाः ॥ नांधमः कुंभहनुः महानादः समुन्नतः ॥ एते प्रहस्तसचिवा जघ्नुः सर्वान्व
कसः ॥ तेषामापततां वेगं निघ्नतां च वनौकसां ॥ द्विविदो गिरिशृंगेण जघानैकं नरांधमं ॥ दुर्मुखः पुनरादाय वलात्सुविपुलं पु
द्रुमं ॥ अपरोक्षं प्रहस्तस्य समुन्नदमपोथयत् ॥ जांवुवांस्तु सुसंरब्धो गृहीत्वा च विपुलां शिलां ॥ अपातयन्महातेजा महान
दस्य वक्षसि ॥ अथ कुंभहनास्तारः स्तरसा संयुगे वली ॥ वृक्षेण महता प्राणान्कपिस्तस्य समाददे ॥ अमृष्यमाणस्तत्कर्म प्रह
स्तो रथमास्थितः ॥ चकार कदनं घोरं धनुष्पाणिर्वनौकसां ॥ नतस्तस्याप्रमेयस्य सागरस्येव संप्लवः ॥ आवर्त इव संजज्ञे वलस्य र
महतो महान् ॥ महता हि शरौघेण प्रहस्तो युधि कोविदः ॥ अर्दयामास संक्रुद्धो वानरान्परमाहवे ॥ ७०० ॥ वानराणां शरीरैस्तु

प राक्षसानां च मेदिनी ॥ वभूवातिचिता तत्र पर्वतैरिव संवृता ॥ सा मही रुधिरौघेण प्रच्छन्ना संप्रकाशते ॥ प्रसन्ना माधवे मासि पला
शैरिव पुष्पितैः ॥ हतवीरौघवप्रां तु भग्नायुधपरिच्छदां ॥ शोणितौघमहातोयां यमसागरगामिनीं ॥ यकृत्प्लीहमहापंकां
विनिकीर्णांत्रशैवलां ॥ छिन्नकायशिरोमीनां अंगावयवशाद्वलां ॥ गृध्रकंकवकाकीर्णां हंससारसनादितां ॥ मेदः फेन
चयाकीर्णां योधस्तनितनादितां ॥ तां कापुरुषदुस्तारां युद्धभूमिमयीं नदीं ॥ नदीमिव जलापाये हंससारसशोभितां ॥ राक्षस
कपियोधाश्च ते सर्वे दुस्तरां तदा ॥ यथा पद्मरजोध्वस्तां नलिनीं गजयूथपाः ॥ अगाहंत तथा वीरा हरिराक्षसपुंगवाः ॥ त
तः सृजंतं वाणौघान्प्रहस्तं स्यंदने स्थितं ॥ ददर्श तरसा वीरो निघ्नंतं वै प्लवंगमान् ॥ ततः परमदुर्धर्षमापतंतं महाकपिः ॥
प्रहस्तं ताडयामास वृक्षमुत्पाट्य वीर्यवान् ॥ स तेनाभिहतः क्रोधात्नदन्राक्षसपुंगवः ॥ ववर्ष शरवर्षाणि प्लवंगचमूपतौ ॥ च
तद्यथा गोवृषो वर्षं शारदं शीघ्रमागतं ॥ अपार्ये धनुष्पतेः प्रतिगृह्णन्निमीलितः ॥ एवमेव प्रहस्तस्य शरवर्षं प्लवंगमः ॥
निमीलिताक्षः सहसा नीलः सेहे सुदारुणं ॥ रोषितः शरवर्षेण शालेन महता चमूः ॥ ततः ॥ निजघान हयान्नीलः प्रहस्तस्य
महाजवान् ॥ सहस्ता ह्रापमुत्सृज्य प्रहस्तः सशरासनं ॥ प्रगृह्य मुसलं घोरं स्यंदनादवपुप्लुवे ॥ ततस्तौ वाहिनीमु
ख्यौ जातक्रोधौ तरस्विनौ ॥ नस्थतुः क्षतजाक्तांगौ प्रभिन्नाविव कुंजरौ ॥ उल्लिखंतौ सुतीक्ष्णाभिर्दंष्ट्राभिरितरेतरं ॥

 सिंहशार्दूलसदृशौ सिंहशार्दूलविक्रमौ ॥ विक्रांतौ समरे वीरौ संयुगेप्यनिवर्तिनौ ॥ आकांक्षंतौ यशः प्राप्तुं वृत्रेंद्रावि
वसंयुगे ॥ आजघान ततो नीलं ललाटे मुसलेन सः ॥ प्रहस्तः परमायस्तः तस्य स्रश्राव शोणितं ॥ ततः शोणितसंरक्तः प्रगृह्य
 तंमहीतंमहीतलं ॥ प्रहस्तोपरि क्रुद्धो वि ससर्ज महाकपिः ॥ प्रहारमविचिंत्यासौ प्रगृह्य मुशलं महत् ॥ अभिदुद्राव बलिनं
बलीनीलं प्लवंगमं ॥ तमुग्रवेगं संरब्धं आपतंतं महाकपिः ॥ नीलः संप्रेक्ष्य जग्राह महाकायो महाशिलां ॥ तस्य युद्धा
भिकामस्य मृधे मुसलयोधिनः ॥ प्रहस्तस्य शिलां नीलो मूर्ध्नि तूर्णमपातयत् ॥ सा तेन कपिमुख्येन विमुक्ता महती
शिला ॥ बिभेद सुमहाघोरा प्रहस्तस्य शिरो महत् ॥ स गतासुर्गतश्रीको गतसत्वो गतेंद्रियः ॥ पपात सहसा भूमौ
छिन्नमूल इव द्रुमः ॥ विभिन्नशिरसस्तस्य बहु स्राव शोणितं ॥ शरीरादपि संस्रवंतं जलं प्रस्रवणादिव ॥ हते प्रह
स्ते नीलेन तदकंप्यं महद्बलं ॥ रक्षसां गतहर्षाणां लंकामभिपपात ह ॥ अशक्ताः सर्वे ते स्थातुं निहते वा
हिनीपतौ ॥ कुंभं भग्नं समासाद्य विकीर्णं सलिलं यथा ॥ हते तस्मिंश्चमूमुख्ये नकश्चित्पुरतोभवत् ॥ तस्मिं ६५
नरक्षोबलगणे ध्यानमूकत्वमागतः ॥ ततस्तु नीलो विजयी महाबलः प्रशस्यमानः स्वकृतेन कर्मणा प्र

साननारामुहूर्तेन समेच स्वबलिताहयाः ॥ तानूसमीक्ष्य भग्नोसा तान् प्रहस्तो भिशदारुणान् ॥ आत्मवीर्यं विदृष्वानो राक्षसा
न्निसभां वहं ॥ कालो भवेयं कालस्य दहेयमपि पावकं ॥ महेसमरणधर्मे संयोजयितुमुत्सहे ॥ तस्य तद्वचनं श्रुत्वा प्रहस्तस्य र
णाजिरे ॥ सुसंरब्धतरा जग्मुः राक्षसा युद्धकांक्षिणः ॥ ततस्तमभिनिर्यांतं प्रख्यातबलविक्रमं ॥ युधि नाना प्रहरणा कपि
सेनाभ्यवर्तत ॥ अस्य घोषः सुतुमुलः कपीनां समजायत ॥ वृक्षाणां रुजतां चैव गुर्वीश्चाधिचतांशिलां ॥ उभेच
मुदिते सैन्ये रक्षोगणवनौकसां ॥ वेगितानां समर्थानां अन्योन्यवधकांक्षिणां ॥ रक्षसां वानराणां च बभूव तुमुलो ध्वनिः ॥
ततः प्रहस्तः कपिवाहिनीं तां अभिप्रतस्थे निधनाय दुर्मतिः ॥ विवृद्धवेगं वनदाववदारुणं यथा मुमूर्षुः शलभोग्निविभा
वसुं ॥ इत्यार्षे युद्धकांडे प्रहस्तनिर्याणं नाम सर्गः ॥ ॥ ततः प्रहस्तं निर्यांतं भीमं भीमपराक्रमं ॥ गर्जंतं सुमहाका
यं राक्षसैरभिसंवृतं ॥ ददर्श महती सेना वानराणां बलीयसां ॥ अभिसंजातहर्षाणां प्रहस्तमभिगर्जतां ॥ खड्गशक्त्यृष्टि
बाणाश्च शूलानि मुशलानि च ॥ गदाश्च परिघाश्चैव विविधाश्च परश्वधाः ॥ धनूंषि च विचित्राणि राक्षसानां ज
येषिणां ॥ प्रगृहीतान्यशोभंत वानरान्प्रतिधावतां ॥ जगृहुः पुष्पितांश्चैव पादपान्वानरर्षभाः ॥ शिलाश्च वि

धिपः॥ छत्रेण ध्रियमाणेन अतिकायपुरःसराः॥ चामरैर्वैनमरामाभिर्वीज्यमाना स्वलंकृतैः॥ शतार्धमार्गविपुलं श्च
जमालोपशोभितं॥ उत्सारणं प्रकुर्वद्भिर्वेत्रजर्जरपाणिभिः॥ प्रविष्टाच सभां दिव्यां प्रभयाद्योतमानया॥ दृष्ट्वा तु रावणं
सालुमयस्यदुहितातदा॥ प्राप्तांदेवीतितोराजाप्रियांमंदोदरींनृपः॥ दृष्ट्वा ससंभ्रमपूर्णपरिष्वज्य दशाननः॥ मंत्रिणां
तुननसेषां आसनान्यादिदेशह॥ सौवर्णसुर्याचित्राणि सोपधानानि सर्वशः॥ तेष्वासनोपविष्टेषु प्रणामं तेषु मंत्रि
षु॥ पर्यंकस्योपविष्टेषु देवी मंदोदरी ततः॥ अतिकायो महाबाहुः पितरंचाभिवाद्यतं॥ मातरंचाभिवाद्याथ तदासनं गतो
भवत्॥ प्रहस्तश्च धरस्तासौ महाकायावधार्दतः॥ लंकाया श्चावमर्दनकषायकलुलोचनः॥ संग्राममभिकांक्षन् सव्या
कुलेनांतरात्मना॥ अब्रवीद्दिपुलासोथ महागंभीरनिस्वनं॥ किमागमनकृत्यं ते देवि शीघ्रं तदुच्यतां॥ तूर्णं ममसमी
पं तु किमर्थं त्वमिहागता॥ मंत्रिभिः सहिता किंचित् ब्रूहि सा ध्येय यथातथं॥ एवमुक्तेतु वचने देवी वचनमब्रवीत्॥
विज्ञाप्यं शृणु राजेंद्र याचे त्वां च कृतांजलिः॥ नापराधश्च कर्तव्यो वरदसममभानद॥ श्रुता मे नगरी रुद्धा श्रुता मेरा
क्षसा हताः॥ धूम्राक्षसहिता वीराः प्रहस्तेन सहैव तत॥ भवंतं युद्धकामं चानगंतु कृतनिश्चय॥ इति संचिंत्य रा
जेंद्र ममागमन कारणं॥ न च युद्धं प्रमुखतस्तात् तस्य महात्मनः॥ न शमागसमर्थस्य यस्य भार्या लियाहता॥ लक्ष्मणस्य
च सौमित्रे र्यस्य नास्ति समो युधि॥ न च मानुषमात्रोसौ रामोदशरथात्मजः॥ एकेन येन चपूर्वं बहवो राक्षसाहताः॥

चतुर्दशसहस्राणि जनस्थाननिवासिनां॥ खरश्च निहतः संख्ये तदा रामेण मानुषः॥ त्रिशिराश्चक बंधश्च वि
राधो दंडके हतः॥ शरेणैकेन वालीच तदा रामेण मानुषः॥ शंका नैनं महाराज मारीचस्य वदादर्पा॥ पितुश्च व
चनाद्रामः प्रविष्टो दंडके वने॥ लक्ष्मणश्च यैभ्रातेयुक्तो सहभ्रात्रा वनेचरः॥ तस्य भार्या जनस्थानात् किमानीता प
तिव्रता॥ अकारणं कृतं तत्ते दोषायं समुपस्थितः॥ पतिव्रता विरोधस्तु दोषमावहते महान्॥ तन्मह्यं रोचते बुद्ध्या
एतेषामं त्रिणां तथा॥ राम भार्या सती सा ध्वी रामाय प्रतिदीयतां॥ विभीषणेन चो वाक्ये पूर्वमेव महात्मना
ततस्तवक्षोपश्च ते साहाय्यं करिष्यति॥ अश्वयानि च वरक्षाणि प्रेषयाम रघूत्तमे॥ सीतां चैव महाप्राज्ञ सुवर्ण
वाहनानि च॥ मणिमुक्ताप्रवालं च तथा रजतमेव च॥ मात्स्यवान् गृध्रसंयातु यूपाक्षश्चैव तथैव च॥ अतिका
योतथा चायं कार्याकार्यविशारदः॥ विभीषणो गतः पूर्वं रभिस्तत्र गतेध्रुवं॥ संधिं करिष्यते व्यक्तं राघवं भीषणि
सह॥ संमान्य मैथिली चास्मै प्रदास्यति विभीषणः॥ माल्यवांश्च महाकायो राक्षसानां हिते रतः॥ राघवंया
च्य शिरसा संधिं कुर्वन्तु रावणः॥ सामं भेदं तथा दानं राज्ञामेतत्त्रयं स्मृतं॥ कनिष्ठं सर्वतो युद्धं श्रुत्वा भ्रात

वधः स्तथा॥ संशयं चात्मनो गत्वा किं जेतेन कारिष्यसि॥ चंचलायुधि सा धीश्च हन्यते हन्यसे पिच॥ तस्मा
ध धनं रोचेत संधिं कुरु दशानन॥ प्रीणय स महाबाहो राघवं प्रतिनंदनं॥ प्रदीयतां मे यं सीता सुसंधि
स्ते च रोचतां॥ सां प्र। संशयो राजन् पुरस्यातः पुरस्य च॥ आत्मनो राक्षसश्रेष्ठ वर्तते नात्र संशयः॥ तस्मा
द्राजन् ब्रवीम्येषा पुरस्याच्च कुलस्य च॥ रक्षणाय स्वयं चात्मा सर्वमात्मन्यधिष्ठितं॥ क्षमाशील स्तथा रामः
स सदा कुदीनवत्सलः॥ धर्मात्मा स महासत्व शरणागतवत्सलः॥ कुरु तेन यतः संधिं रमेद्याथालजे॥ ल
क्ष्मणे च महाबाहो र्न संभ्रात्य हितेरतौ॥ प्रहस्तेन कृतं किं तु युध्यता राक्षसाबले॥ धूम्राक्षेण तु राजेंद्र निसंसमरगृधि
ना॥ महाकायेन च तथा अतिकायेन रक्षसा॥ अकंपनेन वीरेण युध्यता राक्षसेश्वर॥ तथान्ये र्वालिभिश्चैव कर
तं वानरबले॥ निहतो यूथपः कश्चित् वलोद्दृप्तो न रावणः॥ येषां वीर्याद्विभेतींद्रः कुबेर वरुणावपि॥ यमो
वैवस्वतो येषां तथान्ये देवदानवाः॥ येषां नास्ति समो वीर्ये नेहता वानरै र्युधि॥ नचापि वानराः शक्या हंतु
पादपयोधिनः॥ रक्ष्यमाणा तु रामेण सुग्रीवेण च पालिताः॥ तत्र मेरोचलेसार्धं सह रामेण रावण॥ तया ६८

समे स रामे च लक्ष्मणेन च प्रहृष्टरूपा य बभूव यूथपः॥ तस्मिन् हते राक्षससैन्यनाथे प्लवंगमानां त्र्षभेन युद्धे॥ भीमायुधं
सागरगुल्मरूपं प्रदुद्रुवे राक्षसराजसैन्यं॥ गत्वा तु नीलेन हतं तारांसु: सेनापतिं सानुचरं प्रहस्तं॥ सचापि तेषां वनिशम्य
वाक्यं रक्षोधिपः क्रोधवशं जगाम॥ समान्तु लंकां निहतं निशम्य शोकार्दितः क्रोधवशाभिभूतः॥ महाबलान् युधांवरा
रक्षांश्च उवाच तान् नैर्ऋतयोधमुख्यान्॥ इत्यार्षे रामायणे युद्धकांडे प्रहस्तवधो नाम सर्गः॥ ॥प्रहस्तस्य वधं श्रुत्वा रा
वणो भ्रांतमानसः॥ राक्षसान् आदिदेशासुराससैंद्रो महाबलः॥ कार्यात्तु कनावज्ञा यो रिंद्रबलसूदनः॥ सूदितः सैन्य
पालो मे सानुयात्रः सकुंजरः॥ सोहं रिपुविनाशाय विजयस्य विवृध्दये॥ स्वयमेव गमिष्यामि रणशीर्षमभित्वरन्॥ अ
द्य तद्वानरानीकं सह रामं सलक्ष्मणं॥ निर्दहिष्यामि बाणौघैः रुक्षकं वनमिवानलः॥ अद्याहं तर्पयिष्यामि पृथिवीं कपिशो
णितैः॥ रामं च लक्ष्मणं चैव प्रेषयिष्ये यमक्षयं॥ एवमुक्त्वा महातेजा रावणो लोकरावणः॥ अगच्छत् सहसा क्रुधः सर्वसैन्येन
संवृतः॥ संग्राममभिकांक्षं तं रावणं शुभभाषिनी॥ हतोत्साहाय यो देवी नाम्ना मंदोदरी तदा॥ मायान्यवतां कर गच्छ कृपा
क्षसाहतानाचसा॥ मंत्रिभिर्मंत्रतत्वज्ञैस्तथान्यैर्मंत्रिसत्तमैः॥ राक्षसै रावृतां सर्वैर्धृतंत्र जर्जरपाणिभिः॥ यो वा द्विरदै
र्वक्षाभिस्तथा कन्याभिरावृता॥ आयुधव्यग्रहस्तैश्च राक्षसैश्च समंततः॥ सभां तु प्रार्थिता देवी यत्रासौ राक्षसा

हं संधिमिच्छामि कदाचिदस्मि भामिनि ॥ अद्य त्वं भव विश्रब्धा सर्वमेतत्सुखोदयं । मा कथा हृदि संतापं अहं यास्ये रणा
जिरं ॥ अद्य सर्वान् हनिष्यामि वानरान् रणमूर्धनि ॥ पुत्राश्च मे महावीर्या मेघनादपुरोगमाः ॥ अंतःपुरगता त्वं च सु
खं भव सस्नुषा ॥ एवमुक्त्वा परिष्वज्य भार्यां प्रीतमनाइव ॥ प्रविवेश ततो देवी स्वयं सा भवनोत्तमं ॥ चिंतयामास तद्वी
रो विग्रहं समुपस्थितं ॥ रावणस्तु ततो वाक्यं राक्षसानिदमब्रवीत् ॥ कल्पितो मे रथः शीघ्रं क्षिप्रमानीयतामितः ॥ अ
द्य क्रोधं विमोक्ष्यामि निगूढं हृदये स्थितं ॥ देवासुरे यथा पूर्वं रुद्रेणानेहतोंधकः ॥ चिरकालोक्षितं युद्धं एतन्मे रा
घवेण ह ॥ अद्य तूणीशया बाणा नियुक्ताद्इव पन्नगाः ॥ रामं समभिधावंतु विषाग्निप्रतिमाः शिताः ॥ सु
तेजसे रुक्मपुंखैस्तैलधौतैर्हिरण्मयैः ॥ शरैरादीपयाम्येनमुल्काभिरिव कुंजरं ॥ वानरान् सुबहून् हत्वा
राघवाज्ञाप्रणोदितान् ॥ सरामानुजसक्रांतान् तेन सार्धमुपागतान् ॥ इत्यार्षे रावणवाक्यं नाम सर्गः ॥ ॥
स एवमुक्त्वानुपमानरूपं रथं तुरंगैर्बहुभिभिरभियुक्तं ॥ प्रकाशमानं वपुषा परेण समारुरोहामरराजश
त्रुः ॥ सत्रा स्वभेरीपटहप्रणादै राक्षिव डिंडिमस्फोटितसिंहनादैः ॥ पुण्यैः स्तवैश्चाप्यभिपूज्यमानस्तदा ययौ

राक्षसराजमुख्यः ॥ सशैलजीमूतनिकाशरूपैर्महाद्यनैः पावकदीप्तनेत्रैः ॥ बलैर्वृतो राक्षसयोधवीरैर्भूतैर्वृतो रुद्र
इवामरेशः ॥ ततो नगर्याः सहसा महौजा निराम्य तद्वानरसैन्यमुग्रं ॥ महार्णवाभ्रस्तिमितं ददर्श समुद्यतं पादपशैलहस्तं ॥
तद्राक्षसानीकमतिप्रचंडं आलोक्य रामो भुजगेंद्रबाहुः ॥ विभीषणं शस्त्रभृतां वरिष्ठं उवाच शैलाग्रगतस्तरस्वी ॥
नानापताकाध्वजछत्रजुष्टं प्रासासिशूलाशनिचक्रजुष्टं ॥ कस्येदमक्षोभ्यमभीतसैन्यं नागेंद्रराजोपमनागजुष्टं ॥
ततः स रामस्य वचो निशम्य विभीषणः शक्रसमानवीर्यः ॥ शशंस रामाय बलप्रवेगान् महात्मनां राक्षसपुंगवानां ॥
योसौ गजस्कंधगतो महात्मा नवोदितार्कोपमताम्रवक्त्रः ॥ संकंपयन्नागशिरोभ्युपैति राजन्नवेह्येनमकंपनाख्यं ॥ यो
सौ रथस्थो मृगराजकेतुर्धुन्वन् धनुः शक्रधनुःप्रकाशं ॥ करीव भात्युग्रविवृत्तदंष्ट्रः सइंद्रजित् राक्षसराजपुत्रः ॥ यश्चै न
ष विंध्यास्तमहेंद्रकल्पो धन्वी रथस्थोतिरथोतिवीरः ॥ विस्फारयन्वै धनुरुग्रनादं महातिकायोतिविवृत्तनेत्रः ॥
योसौ नवार्कोपमताम्रचक्षुरारुह्य घंटानिनदप्रणादं ॥ खरं खनं गर्जति वै महात्मा महोदरो नाम स एष वीरः ॥ योसौ
हयं कांचनचित्रभांडं आरुह्य संध्याभ्रघनप्रकाशं ॥ प्रासं समुद्यम्य मरीचिनद्धं देवांतकोसावनितुल्यवेगः ॥
कांचनमयानि विचित्राण्याभरणानि यस्य ॥

रामायणयु
द्धकांड

७९

मद्रजातिं

अश्वनीकुमारजेता

यश्चैष शालैर्नविशतं सध्वजं विद्युत्प्रभं कांचनवज्रसंनिभं॥ गजेंद्रमास्थाय शरोत्सप्रकारं मायाविनो योऽसौऽत्र नराशरराक्षसी॥
असौ च जीमूतनिकाशरूपः कुंभः पृथुव्यूढसुजातवक्षाः॥ समाहितः पन्नगराजकेतुर्विस्फारयन् भाति धनुर्धनुष्मा
न्॥ यश्चैष जांबूनदवज्रजुष्टं दीप्तं सधूमं परिघं प्रगृह्य॥ आयाति रक्षोबलकेतुभूतो योऽसौ निकुंभोऽद्भुतघोरकर्मा॥
यश्चैष चापासिशरौघजुष्टं पताकिनं पावकतुल्यरूपं॥ रथं समास्थाय विभात्युदग्रो नरांतकोऽसौ नगशृंगयोधी॥
यश्चैष कालानलतुल्यरूपः खड्गी धनुष्मान् कवची किरीटी॥ गजेंद्रमास्थाय गिरिप्रकाशं स्वरथस्वरोयमकराक्षनामा॥
यश्चैष नानाविधघोररूपैर्व्याघ्रोष्ट्रनागेंद्रमृगाश्वयुक्तैः॥ भूतैर्वृतो भाति विवृत्तनेत्रैर्योऽसौ सुराणामपि दर्पहंता॥
यत्रैतदिंदुप्रतिमं विभाति छत्रं सितं सूक्ष्मशलाकमग्र्यं॥ अत्रैष रक्षोधिपतिर्महात्मा भूतैर्वृतो रुद्र इवाभ्युपैति॥ यो
ऽसौ किरीटी चलकुंडलास्यो नागेंद्रविंध्योपमभीमकायः॥ महेंद्रवैवस्वतदर्पहंता रक्षोधिपः सोऽयमुपैति दृष्टः॥
विभीषणवचः श्रुत्वा रक्षसां प्रतिभाषितं॥ प्रत्युवाच तदा रामो विभीषणमरिंदमः॥ अहो दीप्तो महातेजा रावणो लो
करावणः॥ आदित्य इव दुःप्रेक्ष्यो राक्षसो भाति रश्मिभिः॥ सुव्यक्तं लक्ष्यते चास्य रूपं तेजः समाचितं॥ देवदानववीरा
णां वपुरेवंविधं कुतः॥ यादृशं राक्षसेंद्रस्य वपुरेतद्विराजते॥ तथैवास्यानुजास्तु त्वया पुत्राः पौत्राः स्तथानुजाः॥ ७९

युद्धकांड पा०

नक्षकनाम

महांतं

य्यश्वराघवयोर्मित्रं कार्तवीर्यार्जुनो यथा॥ माकृथा मोघधर्मं माकृथाः कुलसंक्षयं॥ माकृथाः पुरनाशं च माकृथाः कुल
संक्षयं॥ हितं सर्वं ब्रवीम्येषा कुरुष्व वचनं मम॥ इत्यार्षे रामायणे मंदोदरीवाक्यं॥ ॥ तस्यास्तद्वचनं श्रुत्वा प्रियाया रा
क्षसेश्वरः॥ दुःखं दीर्घं च निःश्वस्य निरीक्ष्य च सभासदः॥ हस्तेन मंदोदरीं अथ चापयमेतदुवाच ह॥ त्वया हि हितकारिण्या
यदयं हितं भाषितं॥ न तन्मनसि मे दृढं प्रवक्ष्याम्यप्रियं प्रिये॥ देवान्जित्वा रणे पूर्वं ससुरासुरमानवान्॥ प्रणामे मानु
षके स्मा भयान रक्षमाचितं॥ प्रणम्य रामं काकुत्स्थं किं वक्ष्ये सर्वदेवताः॥ कीदृशो भावयेन्मध्ये जीवितं हततेजसः॥
हृत्वा तस्य पुरा भार्यां मानं कृत्वा सुदारुणं॥ राक्षसान्घातयित्वा च रत्नं कांपीठमथ सर्वतः॥ राघवं प्रणमे कस्मात् हीन
वीर्य इवाबलः॥ राघवं प्रणमित्वाहं कथं जीवितुमुत्सहे॥ एष मे सहजो भावो निसर्गमनसि स्थितः॥ अपि भज्येत वा हि वि
नमेयं हि कस्यचित्॥ न पुनः संनतो येन शरेश धिविभावुलो॥ अपि विं वलु लभेलो स कथं करुणं वदेत्॥ त्रैलोक्ये स
पुमान्नास्ति यमयानाजितो रणे॥ देवतानां बलं हत्वा देवराजो मया जितः॥ राघवं प्रणमे कस्मान्मूर्ध्नाहं स्यालुदेहिनां॥ न
माकृथा हृदि संतापं शिष्ये हि सुचिस्मिते॥ हनिष्ये लक्ष्मणं चैव राघवं चापि वानरान्॥ सुग्रीवं च हनिष्यामि हनू
मंतं च वानरं॥ न तु संधिं करिष्यामि राघवेण सहैव तु॥ वैदेहीं नार्पयिष्यामि राघवस्य मे या दृढं॥ सांप्रतं न तु संधि
च करिष्यामि सराघवः॥ सागरं च महद्धा रुद्धा लंकां सकानना॥ राक्षसान् च वरान् हत्वा संधिं कुर्यां कथं प्रिये॥ नत

दीप्ताग्निकल्पं ज्वलितं सविस्फुलिंगं ज्वलनप्रकाशं ॥ चिक्षेप राजा हरियूथपाय स सायकोरसि वाहुमूले ॥ शक्त्यास्त्रा-
न्निप्रख्यवपुः शिलाग्र्यः सुग्रीवमासाद्य विभेद वेगात् ॥ गुहां शिलां क्रौंचमिवोग्रशक्तिः ॥ स सायकार्तो विपरीतचेताः
कूजन् व्यथार्तो निपपात भूमौ ॥ तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ॥ ततो गवाक्षो गवयः सुषेणो
मैंदो गजो ज्योतिमुखो नलश्च ॥ शिलाः समुत्पाट्य विवृद्धकायाः समासदन् ते किल राक्षसेंद्रं ॥ तेषां प्रहारान् स चका-
र मोघान् रक्षोधिपो वाणगणैः शितागैः ॥ तान् वानरेंद्रान् अपि वाणजालैः विभेद जांबूनदचित्रपुंखैः ॥ ते वानरेंद्रास्त्रिदशा-
रिवाणैर्भिन्ना निपेतुर्भुवि भिन्नरूपाः ॥ ततश्च तद्वानरसैन्यमुग्रं प्रच्छादयामास स बाणजालैः ॥ ८०० ॥ ते वध्यमानाः पतिता-
श्च शूराः नानद्यमाना भयशल्यविद्धाः ॥ शाखामृगा रावणसायकार्त्ता जग्मुः शरण्यं शरण्यं शरणं च रामं ॥ ततो महात्मा स धनु-
र्धनुष्मान् आदाय रामः सहसा धनुष्मान् ॥ तं लक्ष्मणः प्रांजलिरभ्युपेत्य उवाच वाक्यं परमार्थयुक्तं ॥ अहमार्य सुपर्याप्तो वधा-
यास्य सुदुर्मतेः ॥ हनिष्याम्यहमद्यैव अनुजानीहि मां विभो ॥ ततोब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ गच्छ त्वं वचनं चेदं नि-
बोध मम लक्ष्मण ॥ रावणो हि महावाहुर्बहुमायो महाधनुः ॥ त्रैलोक्येनापि संक्रुद्धो दुःप्रधर्ष्यो न संशयः ॥ तच्छिद्राणि च
मार्गस्व स्वच्छिद्राण्यभिरक्ष्य च ॥ चक्षुषा धनुषा चैव रक्षात्मानं समाहितः ॥ राघवस्य वचः श्रुत्वा संपरिष्वज्य पीडितं ॥ अभि-

वाद्य ततो रामं ययौ सौमित्रिराहवं ॥ स रावणं वारणहस्तबाहुं ददर्श दीप्तोद्यतभीमचापं ॥ प्रच्छादयंतं शरवृष्टिजालैस्तान्वा-
नरान् बाणविकीर्णदेहान् ॥ तमालोक्य महातेजा हनूमान्मारुतात्मजः ॥ भ्रंशयन् शरजालानि प्रययुध्यत रावणं ॥ र-
थं तस्य समासाद्य तोदमाक्षिप्य सारथेः ॥ त्रासयन् रावणं धीमान् हनूमान्वाक्यमब्रवीत् ॥ देवदानवगंधर्वा यक्षाश्च सह पन्न-
गैः ॥ अवध्यत्वात्वया भग्नाः वानरेभ्यस्तु ते भयं ॥ तदद्य देवाः पश्यंतु यक्षा उरग राक्षसाः ॥ त्वां भग्नमद्य पश्यंतु वानरैर्भीमविक्र-
मैः ॥ एष मे दक्षिणो बाहुः पंचशाखः समुद्यतः ॥ निरसिष्यति ते देहात् भूतात्मानं चिरोषितं ॥ क्षिप्रं प्रहर निःशंकं स्थिरां कीर्ति-
मवाप्नुहि ॥ विक्रमं च विदित्वा ते नाशयिष्यामि जीवितं ॥ रावणस्य वचः श्रुत्वा वायुसूनुरभाषत ॥ प्रहृतं मे मया पूर्वं अक्षं स्मर-
यतां सुतं ॥ एवमुक्तो महातेजा रावणो राक्षसाधिपः ॥ आजघानानिलसुतं तलेनोरसि वीर्यवान् ॥ स तथाभिहतस्तेन मुहूर्तं
व्यचलत्कपिः ॥ आजघान च संक्रुद्धः तलेनैवामरद्विषं ॥ तथा स्तेनाभिवानरेण तरस्विना ॥ दशग्रीवः समुद्धूतो यथा भूमि- कलो
तलेचलः ॥ संग्रामे तु तदा दृष्ट्वा रावणं तलताडितं ॥ ऋषयश्चारणाः सिद्धा नेदुर्देवाश्च सासुराः ॥ अथाश्वस्य महातेजा राव-
णो वाक्यमब्रवीत् ॥ साधु वानर वीर्येन श्लाघनीयोसि मे रिपुः ॥ रावणेनैवमुक्तस्तु हनूमान्वाक्यमब्रवीत् ॥ धिगस्तु मम
वीर्यस्य यत्वं जीवसि राक्षस ॥ सकृत्तु प्रहरेदानीं दुर्बुद्धे किं विकत्थया ॥ ततस्त्वां मामको मुष्टिर्नयितुं यमसादनं ॥

एवमुक्तस्तु संक्रोधो रावणः स महाबलः॥ तेन वानरवाक्येन कोपस्तस्य महानभूत्॥ स क्रोधाग्निपरीतात्मा प्रजज्वाल सरा
वणः॥ स रक्तनयनश्चापि समुत्क्षिप्य करोत्तदा॥ समुत्पातयामास च अकल्पं महायन्त्राः॥ हनूमदुरसि व्यूढे स चचाल महाक
पिः॥ विह्वलं तु ततो दृष्ट्वा हनूमंतं तदा महाबलं॥ रथेनानेन तथा क्षिप्रं नीलं प्रति समाद्रवत्॥ सोंतकप्रतिमैर्बाणैः परमर्माति
भेदिभिः॥ क्षिप्रमापूरयामास नीलं हरिचमूपतिं॥ स शरौघसमायस्तो नीलः परमदारुणः॥ गिरिशृंगं शैलाभं रक्षोधि
पतये सृजत्॥ हनूमानपि तेजस्वी समाश्वस्तो महाबलः॥ नीलेन सह संसक्तं रावणं वीक्ष्य वीर्यवान्॥ स रावणव
धार्थं च चकार सुमतिं तदा॥ संवीक्ष्यमाणो युधि प्लुः सरोषः स भाचेतथत॥ नीलेन सह संसक्तो रावणो राक्ष
साधिपः॥ नयान्यं हि मया याचा याभो युद्धं क्षत्रधर्मं विजानता॥ रावणश्च महातेजास्तं नीलं नवभिः शरैः॥ आजघान
सुतीक्ष्णाग्रैस्तदा शीर्णेपपातह॥ विकीर्णं नगं दूरे शृंगं दृष्ट्वा हरिचमूपतिः॥ नीलोऽग्निरिव जज्वाल क्रोधेन
परवीरहा॥ सोऽश्वकर्णान् धवान् तालान् चूतांश्चापि सुपुष्पितान्॥ अन्यांश्च विविधान् वृक्षान् नीलश्चिक्षे
प संयुगे॥ स तानापततः शीघ्रं शरैश्चिच्छेद रावणः॥ नीलं चाप्यहनन् गात्रे दर्शयन् स्वस्त्रलाघवं॥ अभिवृष्टः

सर्वे पर्वतसंकाशाः सर्वे पर्वतयोधिनः॥ सर्वे दीप्तायुधधराः क्रोधाश्चास्य महोजसः॥ भांति राक्षसरा
जस्य ते दीप्तैर्भिर्मिविचित्रमैः॥ शरैः पार्श्वैस्तीक्ष्णैर्देहवद्भिरिवानलैः॥ एवमुक्त्वा ततो रामो
धनुरादाय वीर्यवान्॥ लक्ष्मणानुचरस्तस्थौ समुद्यतशरासनः॥ ततः स रक्षोधिपतिर्महात्मा
रक्षांसि तान्याह महाबलानि॥ द्वारेषु चर्यागृहगोपुरेषु सुनिर्वृतास्तिष्ठत निर्विशंकाः॥ स एव
मुक्त्वा त्वरितो रुरुध्यम्य चापं सशरं च दीप्तं॥ विदारयन् वानरसागरौघं महाम्बुदः पूर्णमिवा
र्णवांभः॥ तमापतंतं सहसा निरीक्ष्य दीप्तेषुचापं युधि राक्षसेंद्रं॥ ततो हरीशः सहसा जगाम तं रावणं यो
द्धुमिच प्रचंडः॥ वल्लीसमुद्यम्य महीधराग्रं दुद्राव रक्षोधिपतिं हरीशः॥ तच्छैलशृंगं बहुवृक्षसानुं
प्रगृह्य चिक्षेप स रावणाय॥ तमापतंतं प्रसमीक्ष्य राजा बिभेद बाणैर्यमदंडकल्पैः॥ तस्मिन् प्रवृद्धोत्तम
वृक्षखंडे शरैर्विकीर्णे सुविचित्रसानौ॥ महाहिकल्पं शरमुग्रधन्वा समासदत् राक्षसयूथपेंद्रः॥ स तं ग्र

प्रतियोद्धुमर्हसि॥ स तस्य वाक्यं प्रतिपूज्य घोरं ज्यां भ्रामयन्(?) दृष्टिपथं च निःशम्य राजा॥ आसाद्य सौमित्रिममित्रसाहं चुको
पकोपाद् विचेदमाह॥ दिष्ट्यासि मे राघव दृष्टिमार्गं प्राप्तो ऽतिकं वै विपरीतबुद्धे॥ यस्मिन् क्षणे यास्यसि जीवलो
कं संसाध्यमानो मम बाणजालैः॥ तमाह सौमित्रिरविस्मयेन गर्जंतमुग्रं शरचापपाणिं॥ राजन्न गर्जंति महाप्रभा
वाः किं कत्थसे प्राकृतवत्त्वमद्य॥ जानामि वीर्यं तव राक्षसेंद्र बलं प्रतापं च पराक्रमं च॥ अयं स्थितो ऽहं शरचाप
पाणिरागच्छ किं मोघविकत्थनेन॥ स एवमुक्तः कुपितः ससर्ज रक्षोऽधिपः सप्त शरान् सुपुंखान्॥ तान् लक्ष्म
णः कांचनचित्रपुंखैश्चिच्छेद बाणैर्निशितैः सुपत्रैः॥ तान् प्रेक्ष्य बाणान् सहसा निकृत्तान्निकृत्तभोगानि
व पन्नगेंद्रान्॥ ववर्ष बाणान् ज्वलिताग्रमौलिर्महेंद्रवज्राशनितुल्यवेगान्॥ स बाणवर्षं स ववर्ष तीव्रं रा च
मानुजः कार्मुकसंप्रणुन्नं॥ क्षुरार्धचंद्रोत्तमकर्णिभल्लैः शरांश्च चिच्छेद न चुक्षुभे च॥ स लक्ष्मणश्चाशु शिला
न् शरान् महेंद्रवज्राशनितुल्यवेगान्॥ संधाय चापे ज्वलनप्रकाशान् ससर्ज रक्षोऽधिपतेर्वधाय॥ स ता
न् प्रचिच्छेद निशाचरेंद्रश्छित्वा च तान् लक्ष्मणमाजघान॥ शरेण कालाग्निसमप्रभेण स्वयंभुदत्तेन ललाटमध्ये॥
स लक्ष्मणो रावणसायकार्तश्चचाल चापं शिथिलं प्रगृह्य॥ पुनश्च संज्ञां प्रतिलभ्य कृच्छ्रात् चिच्छेद चापं त्रिदशेंद्र

शत्रोः॥ तं कृत्तचापं त्रिभिराजघान बाणैस्तथा दाशरथिः शिताग्रैः॥ स सायकार्तो विचचाल राजा कृच्छ्राच्च संज्ञां
पुनराससाद॥ स कृत्तचापः शरताडितांगः स्वेदार्द्रगात्रो रुधिरावसिक्तः॥ जग्राह शक्तिं परमां प्रचंडो स्वयंभुदत्तां
युधि देवशत्रुः॥ स तां सधूमानलसंनिकाशां वित्रासनीं वानरराक्षसानां॥ चिक्षेप शक्तिं सहसा ज्वलंतीं सौमित्र
ये राक्षसराजनाथः॥ प्रदीप्यमानां रघुनंदनस्तां जघान बाणैरमितप्रकाशैः॥ तथापि सा तस्य विवेश शक्तिर्भुजांतरं दाश
रथेर्विशाला॥ शक्त्या तया तु सौमित्रिस्ताडितः स स्तनांतरे॥ विष्णोरचिंत्यं स्वं भागं नात्मानं प्रतिसोऽस्मरत्॥ ततो दानव
दर्पघ्नं सौमित्रिं देवकंटकः॥ तं गृहीत्वा च बाहुभ्यां चिंतयामास रावणः॥ हिमवान् मंदरो मेरुः कैलासो वा महागि
रिः॥ शक्यो भुजाभ्यां संवोढुं न त्वयं रघुनंदनः॥ विष्णोरर्थेन भागस्तु समग्रो देहमाश्रितः॥ एतस्मिन्नंतरे क्रुद्धो रा
वणं पवनात्मजः॥ आजघानोरसि व्यूढे वज्रवेगेन मुष्टिना॥ तेन मुष्टिप्रहारेण रावणो भीमविक्रमः॥ जानुभ्या
मपतद्भूमौ चचाल च पपात च॥ निःसंज्ञं रावणं दृष्ट्वा समरे भीमविक्रमं॥ ऋषयो दानवाश्चैव नेदुर्देवाश्च सासुराः॥
हनूमानपि तेजस्वी लक्ष्मणं रुक्मलक्षणं॥ आनयद्राघवाभ्यासं बाहुभ्यां परिगृह्य वै॥ वायुसूनोः सुहृत्वेन भक्त्या पर

मयाचसः॥ अकंपोह्यसिशत्रूणां उधूलं संनिदर्शयन्॥ सासभूतस्तज्यतं नाकि सौमित्रियुधदुर्मदं॥ रावणस्यरथेतस्मिन्
रचस्थानं प्रसपद्यत॥ रावणोपि महातेजाः प्राप्यसंज्ञां महाहवे॥ आदद निशितान्‌ बाणान्‌ प्रगृह्यविपुलं धनुः॥ आ
श्वस्तश्च चिरात्‌ लक्ष्मणश्च शत्रुसूदनः॥ विष्णोर्भागमचिंसंच आत्मानंनचसोस्मरत्‌॥ एतस्मिन्नंतरे दृष्ट्वा रावणस्यपराक्र
मं॥ लक्ष्मणंचसमाश्वस्तं सैन्यंचमुदितं पुनः॥ निपपातमहावीराः वानराणां महाचमूः॥ दृष्ट्वारामोरणगतं रावणं रास
याधिपं॥ अथेनमुपसंगम्य हनूमान्‌ वाक्यमब्रवीत॥ ममपृष्ठंसमासाद्य जहीमं पापराक्षसं॥ श्रुत्वाहनुमतोवा
क्यंयुक्तं रामोनुर्चिसच॥ एवमुक्तस्तथेसुक्त्वा समारूढः प्लवंगमं॥ राघवः समरेमर्षी हंतुकामोनिशाचरं॥ सरावणमि
वेंद्रस्तु हनूमंतं सुमास्थितः॥ अथतं रावणं संख्ये ददर्शमनुजाधिपः॥ तमालोक्यमहातेजाः प्रसयाद्रघुनंदनः॥ विरोचन
मिवक्रुधोविष्णुरभ्यद्युतायुधः॥ ज्याशब्दमथकुर्वन्स वज्रनिष्पेषनिस्वनं॥ गंभीरोद्दग्रयावाचा राक्षसेंद्रमुवाचह॥
तिष्ठतिष्ठममत्वं हि कृत्वाविप्रियमीदृशं॥ क्वनुराक्षसशार्दूल गंतामोक्षमवाप्स्यासि॥ यदींद्रवैवस्वतभास्करान्वा स्वयंभुवै
श्वानरशंकरान्वा॥ गमिष्यासित्वं दशधादिशोवा तथापिनैथाद्यचिमोक्ष्यसेमे॥ यश्चैषशक्त्या निहतस्त्वयाद्यविषादमूर्छां
सहसाभिपन्नः॥ सएषरक्षोगणश्रृसूभूतं प्रधक्ष्यतेवेतवसैन्यकर्त्तं॥ राघवस्यवचः श्रुत्वा राक्षसेंद्रोमहाकपिं॥ ओज

सरोवेगेण मे घोरिवमहाबलः॥ कृत्स्नंकृत्वा मनोरूपं ध्वजाग्रेस्य पपातह॥ पावकात्मजमालोक्य ध्वजाग्रेपर्यवस्थितं॥
जज्वालरावणः कोपात्ततोनीलोननादच॥ ध्वजाग्रेधनुषश्चाग्रेकिरीटाग्रेचतं हरिं॥ ससौमित्रिससुग्रीवो दृष्ट्वास्म
यतराघवः॥ रावणोपिमहासत्वः कपिलाघवविस्मितः॥ संभ्रमाविष्टहृदयोनकिंचित्‌ प्रत्यपद्यत॥ नादांश्चक्रुः समावि
ष्टाः लब्धलक्षाः प्लवंगमाः॥ नीललाघवसंभ्रांतं दृष्ट्वारावणमाहवे॥ वानराणां प्रणादेन संक्रुधोरावणस्तदा॥ अस्त्र
माहारयामासदीप्तमाग्नेयमुत्तमं॥ आग्नेयेनाथसंयुक्तं गृहीत्वारावणः शरं॥ ध्वजशीर्षस्थितं नीलं उदेक्षतानिशाच
रः॥ ततोब्रवीन्महातेजारावणोराक्षसाधिपः॥ कपेलाघवयुक्तोसि माययापरयायुतः॥ यदित्वंरक्षसिप्राणान्‌ माययावान
राधिप॥ तानितान्यात्मरूपाणि विसृजन्‌ बहुशोरणे॥ तत्तुधायमयाक्षिप्रः सायकोस्त्राभिमंत्रितः॥ जीवितंत्वांहरस्तंजी
वितात्‌ भ्रंशयिष्यति॥ एवमुक्त्वामहाबाहू रावणोराक्षसाधिपः॥ संधायबाणमस्त्रेणचमूपतिमताडयत्‌॥ सोस्त्रयुक्तेन
महबाणेननीलोवक्षसिताडितः॥ निर्दह्यमानः सहसा निपपात महीतले॥ पितृमाहात्म्यसंयोगात्‌ आत्मनश्चापितेजसा॥
जानुभ्यामपतत्सभूमौ नचप्राणैर्वियुज्यत॥ विसंज्ञंवानरं दृष्ट्वा दशग्रीवो रणोत्सुकः॥ रथेनांबुदघोषेण सौमित्रिं
समुपाद्रवत्‌॥ तमाहसौमित्रिरहीनसत्वो विस्फारयंतं धनुरप्रमेयं॥ आगच्छमां योधयराक्षसेंद्र नवानरांस्त्वं

६ आर्षे श्रीरामायणे युद्धकांधकांडे रावणभंगो नाम सर्गः ॥ ॥ स प्रविश्य पुरीं लंकां रामबाणभयार्दितः ॥ विनिश्वसं
स्तत्र राजा बभूव व्यथितेंद्रियः ॥ मातंग इव सिंहेन गरुडेनेव पन्नगः ॥ अभिभूतो ऽभवद्राजा राघवेण महात्मना ॥ ब्रह्मदंडप्रका ३
शानां विद्युत्सदृशवर्चसां ॥ स्मरन् राघवबाणानां विव्यथे राक्षसाधिपः ॥ स कांचनमयं दिव्यमाश्रित्य परमासनं ॥ अवेक्ष
माणः सचिवान् रावणो वाक्यमब्रवीत् ॥ सर्वं तत् खलु मे मोघं यत्कृतं परमं तपः ॥ यदिंद्रेण समानो ऽहं मानुषेण पराजितः ॥ पुरा
णं ब्रह्मणो घोरं वचस्तन्मामुपस्थितं ॥ मानुषेभ्यो विजानीहि भयंऽमत्येव तत्तथा ॥ देवदानवगंधर्वैर्यक्षराक्षसपन्नगैः ॥ अवध्य
त्वं मया प्राप्तं परिभूतास्तु मानुषैः ॥ यच्चापि हिमवच्छृंगे कुशोनं घम्यभाषत ॥ तस्यैव तु व्यवदनैरपिकृ धाऽहिमे पुरा ॥ तयो
र्महात्मनोर्वाक्यं नान्यथा यदि सांप्रतं ॥ सत्यं विभीषणेनोक्तं यच्च वाक्यं महात्मना ॥ तदिदं मामनुप्राप्तं विभीषणवचः स्फु
टं ॥ तस्य धर्मार्थयुक्तस्य नान्यथा याति सांप्रतं ॥ मया दर्पबलोत्सेकात् अन्यथा चिंतितं तदा ॥ तदन्यथा परीणितं मम दारा
त्म्यचेष्टितैः ॥ नातिभारो हि देवस्य पौरुषेण नियता मतिः ॥ देवं पौरुषसंयोगात् नित्यं संसिद्धिरवाप्यते ॥ सज्जीभवंतो रक्षे
तु नगरीं वै समंततः ॥ राक्षसाश्चैव तिष्ठंतु वप्रमारुह्य सर्वतः ॥ स चाप्रतिमदर्पश्च देवदानवदर्पहा ॥ ब्रह्मशापाभिभूतश्च कुंभक
र्णो विबोध्यतां ॥ समरे जितमात्मानं प्रहस्तं च हतं रणे ॥ ज्ञात्वा रक्षो बलं भीमं आदिदेश महाबलः ॥ द्वारेषु यत्नः क्रियतां

प्राकारेष्वधिरुह्यतां ॥ निद्रावलसमाविष्टः कुंभकर्णो विबोध्यतां ॥ सहस्रसंख्यमहाबाहुः ककुदः सर्वरक्षसां ॥ वानरान् राजपुत्रौ च
क्षिप्रमेव वधिष्यति ॥ रामबाणनिरस्तानां संभ्रमेस्मिन् सुदारुणे ॥ वधमिष्यंति नः क्षिप्रं कुंभकर्णो महद्भयं ॥ नव षट् सप्त चाष्टौ
च मासान् स्वपिति राक्षसः ॥ तं विबोधयत क्षिप्रं कुंभकर्णं महाबलं ॥ कुंभकर्णः सदा शेते मूढो ग्राम्यसुखे रतः ॥ किं करिष्या
म्यहं तेन शक्रतुल्यबलेन हि ॥ ईदृशे संभ्रमे घोरे यो न साह्याय कल्पते ॥ ते तु तद्वचनं श्रुत्वा राक्षसेंद्रस्य राक्षसाः ॥ जग्मुः प
रमसंभ्रांताः कुंभकर्णनिवेशनं ॥ ते तथा तु समादिष्टाः राक्षसा भीमविक्रमाः ॥ गंधान् माल्यं तथा पानं भक्ष्यं चादाय सत्वरं ॥
आसाद्य भवनं तस्य विविशुस्ते नृपाज्ञया ॥ तं प्रविश्य महाघोरं सर्वलोकयोजनायतं ॥ कुंभकर्णगृहं पुण्यं पुण्यगंधवहं शु
चि ॥ विबोधयिष्यावः सर्वे तस्थुः तस्य महागृहे ॥ तस्य निःश्वासवातेन कुंभकर्णस्य रक्षसः ॥ राक्षसा वव्यवंतोपि स्थातुं
नाशक्नुवंस्तदा ॥ कुंभकर्णस्य निःश्वासैरवधूता महाबलाः ॥ यतमानाः सुकृच्छ्रेण ततः प्रविविशुर्गृहं ॥ संप्रविश्य त
दा रम्यं गृहं कांचनकुट्टिमं ॥ ददृशुर्नैर्ऋतव्याघ्राः शयानं भीमविक्रमं ॥ ऊर्ध्वरोमाचिततनुं श्वसंतमिव पन्नगं ॥ वित्रा
सयंतो निःश्वासैः शयानं परिशाशनं ॥ भीमप्राणबलं भीमं पातालविपुलाननं ॥ तेनुलं विकृतं सुप्तं विकीर्णमिव पन्नगं ॥ कुं
भकर्णं महानिद्रं प्रसुप्तं बोधयिष्याव ॥ ततः परिष्कृतास्तेन तु राक्षसा भीमविक्रमाः ॥ नीलांजनचयाकाराः कुंभकर्णसमं

वगाः॥ ततो वज्रहृः क्षिप्रं ते कुंभकर्णाग्रतस्तदा॥ भक्ष्याणां मेरुसंकाशं राशिं परमतर्पणं॥ मृगाणां महिषाणां च वराहाणां च संचयं॥
मू॥ चक्रुर्नैरृतशार्दूला राशिमन्नस्य चाद्भुतं॥ ततः शोणितकुंभांश्च मद्यानि विविधानि च॥ पुरस्तात्कुंभकर्णस्य चक्रुस्त्रि
८६ दशशात्रवः॥ लिलिपुश्च परार्ध्येन चंदनेन सुगंधिना॥ वस्त्रैश्चाछादयामासुर्माल्ययोगैः सुगंधिभिः॥ धूपं सुगंधं सस्रजुः तुष्टु
७३ वुश्च परंतपं॥ कुंभकर्णं महानिद्रं वोधनायोपचक्रमुः॥ जलदा इव ते नेदुर्यातुधानास्ततस्ततः॥ विभिदुश्चास्य गात्राणि निद्रां
८५ तोभिनदंस्तदा॥ अथ खिन्ना न शेकुस्ते तस्य वोधाय राक्षसाः॥ ततो गुरुतरं यत्नं दारुणं समुपाक्रमत्॥ शंखानापूरयामा
सुः शशांकसदृशप्रभान्॥ तुमुलं युगपच्चापि नेदुर्भृशममर्षणाः॥ नेदुश्चास्फोटयामासुश्चिक्षिपुश्चापि राक्षसाः॥ कुंभ
कर्णविवोधार्थं चक्रुश्च विपुलं स्वनं॥ उष्ट्रान्खरान्हयान्नागान् जघ्नुर्दंडकशांकुशैः॥ भेरीशंखमृदंगांश्च सर्वप्राणे
रवादयन्॥ निजघ्नुस्तानि गात्राणि महाकाष्ठकडंगरैः॥ मुद्गरैर्मुशलैश्चैव सर्वप्राणसमुद्यतैः॥ शंखभेरीपटहप्रणादं
आस्फोटितास्फोटितसिंहनादं॥ दिशो द्रवंतस्त्रिदिवं क्रमंतं श्रुत्वा विहंगाः सहसा निपेतुः॥ यदा भृशं तैः सन्निनदैर्महात्मा न कुंभकर्णो
वुवुधे प्रसुप्तः॥ ततो मुशुंडीमुशलानि चैव रक्षोगणास्ते जगृहुर्गदाश्च॥ ते शैलशृंगैर्मुशलैर्गदाभिर्वृक्षैस्तलैर्मुद्गरमुष्टिभिश्च॥ ८६
सुखप्रसुप्तं भुवि कुंभकर्णं रक्षांस्युदग्राणि तदा निजघ्नुः॥ ते न शब्देन महता लंका समभिपूरिता॥ सपर्वतवना सर्वा सतु नैव प्रबु ७३

ध्यान शरैस्तीक्ष्णैः कालवैश्वानरोपमैः॥ राघवं च हतं तस्य ताडितस्यापि सायकैः॥ स्वभावतेजोयुक्तस्य भूयस्तेजो व्यवर्धत
॥ ततो रामो महातेजा रावणेन कृतव्रणं॥ दृष्ट्वा प्लवगशार्दूलं क्रोधस्य वशमागतः॥ हनूमानपि तेजस्वी व्यवर्धत महाबलः॥ वि
धो वेगेन महता शरैरग्निशिखोपमैः॥ तस्याभिसंगम्य रथं सचक्रं साश्वध्वजं चापि महापताकं॥ ससारथिं सोशनितुल्य
वेगं रामः प्रचिच्छेद शरैः सुतीक्ष्णैः॥ अथेंद्रशत्रुं तरसा जघान वाणेन वज्राशनिसंनिभेन॥ भुजांतरे व्यूढसुजातरूपे वज्रे
णमेरुं भगवानिवेंद्रः॥ यो वज्रपाताशनिसंनिपातैर्न चुक्षुभे नापि चचाल राजा॥ स रामवाणाभिहतो व्यथार्तः चचाल चा
पं च मुमोच वीरः॥ तं विह्वलं तत्र समीक्ष्य रामः समाददे दीप्तमथार्धचंद्रं॥ तेनार्कवर्णं सहसा किरीटं चिच्छेद रक्षोधिपतेर्महा
त्मा॥ तं निर्विषाशीविषसंनिकाशं शांतार्चिषं सूर्यमिवाभ्ररुद्धं॥ गतश्रियं कृत्तकिरीटकुंडलं प्रोवाच रामो युधि ३८
राक्षसेंद्रं॥ कृतं त्वया कर्म महत्सुतीव्रं हतप्रवीरश्च कृतस्त्वयाहं॥ तस्मात्परिश्रांत इति व्यवस्य न त्वां शरैर्मृत्युवशं नया
मि॥ स एवमुक्तो हतमानदर्पो निकृत्तचापः सशरः सशल्यः॥ शोकार्दितः कृत्तकिरीटकुंडलो विवेश लंकां सहसा
गतश्रीः॥ तस्मिन् प्रविष्टे रजनीचरेंद्रे महावले दानवदेवशत्रौ॥ हरीन्विशल्यान् सहलक्ष्मणेन चकार रामः परमाह
वाय॥ तस्मिन् प्रभग्ने त्रिदशेंद्रशत्रौ सुरासुरा भूतगणा दिशश्च॥ ससागराः सर्षिमहोरगाश्च चचाल भूर्भूमिधराः सुराश्च॥

लंकारौदिव्यधूपेनधूपिता:॥ दिव्यगंधा: सुगंधाश्च क्रीडंत्योभुवनोत्तमे॥ ताश्च सर्वाश्चित्राल्लाढ्या: सर्वा: कां
चनसुप्रभा:॥ सर्वारूपगुणोपेता: सर्वाभरणभूषिता:॥ सर्वाविस्तीर्णजघना:॥ सर्वा: पीनपयोधरा:॥ सर्वा: कमलपत्राक्ष्यानि
कुंचितमूर्धजा:॥ तासांनूपुरशब्देन मेखलानां स्वनेनच॥ गीतवादित्रशब्देनस्वरेणमधुरेणच॥ दिव्येनैवच गंधेनस्पर्शेन
विविधेनच॥ विबुद्ध: कुंभकर्णोवैभीमाक्षोभीमदर्शन:॥ सहन्यमानोगिरिशृंगवृक्षैरचिंतयंस्तांस्तुमुलप्रहारान्॥ निद्रा
क्षयात्कोपनिपीडिताश्च विजृंभमाण: सहसोत्पपात॥ महाभुजोवासुकितक्षकाभौनिक्षिप्यवीरोगिरिशृंगसारो॥ वि
वृतवक्त्रं वडवामुखाभं निशाचरोसौ विकृतं जजृंभे॥ विजृंभमाणोतिबल: प्रसबुध्यत राक्षस:॥ निश्वासश्चास्यसंजज्ञे सं
वर्त्तकइवानल:॥ तस्यतत्जृंभमाणस्य वक्त्रंपातालसंनिभं॥ ददृशेमेरु[illegible]शिखरे दिवाकरइवोदित:॥ दीप्तताम्रा
रा स्यजिह्वस्यविद्युत्संदंशपक्ष्मणी॥ भीमदंष्ट्रश्चतुर्नेत्रेदीप्ताविवमहाग्रहौ॥ रूपमुत्तिष्ठतस्तस्य कुंभकर्णस्यसंबभौ॥ ता
पांतेसवलाकस्यमेघस्येवविवर्धत:॥ तद्विनिद्रस्ततोरक्ष: कषायीकृतलोचन:॥ विहरन्सर्वतोदृष्टिं तानुवाचनिशाच
रान्॥ किंनिमित्तमहंसुप्त: भवद्भि: प्रतिबोधित:॥ तेतमुत्थाप्यभीमाक्षं भीमनिद्रापराक्रमं॥ राक्षसास्त्वरिताजग्मुर्दश

ग्रीवंनिवेदितुं॥ तेतुमभिगम्यदशग्रीवंआसीनंपरमासने॥ ऊचुर्बद्धांजलिपुटा: सर्वएवनिशाचरा:॥ प्रबुद्ध: कुंभकर्णो
सौभ्रातातेराक्षसेश्वर॥ किंतेनैवाथनिर्यातु[illegible]नमिहागतं॥ रावण: त्वब्रवीद्धृष्टो राक्षसान्राक्षसेश्वर॥ द्र
ष्टुमेनमिहेच्छामियथान्यायंतुमर्चितं॥ तथेत्यागम्यतेसर्वे पुनरागम्यराक्षसा:॥ कुंभकर्णमिदंवाक्यं ऊचुर्राव
णेनोदिता:॥ द्रष्टुमिच्छतितेराजा सर्वराक्षसपुंगव:॥ गमनेक्रियतांबुद्धिर्भ्रातरंसंप्रहर्षय॥ कुंभकर्ण: सुदुर्धर्षो
भ्रातुराज्ञायशासनं॥ तथेत्युक्त्वामहावीर्य: शयनादुत्पपातह॥ प्रक्षाल्यवदनंहृष्ट: स्नात: परमभूषण:॥ पिपासु:
त्वरयामासपानमदसमीरणं॥ ततस्तुत्वरितास्तस्य राक्षसा[illegible]ज्ञया॥ मद्यंभक्ष्यांश्चविविधान्क्षिप्रमेवानयंस्त
दा॥ महिषाणांवराहाणां मांसंमद्यंचसंस्कृतं॥ प्रहर्षणार्थंमनसोदीप्तास्योदीप्तलोचन:॥ आददेक्षुधितंमांसंशोणि
तंतृषितोपिबत्॥ मेद: कुंभांश्चमद्यंचपपौशक्ररिपुस्तदा॥ भुक्त्वाचान्नंबहुविधंकिंचि[illegible]त हृष्टमनाह्यभूत्॥
पीत्वाघटसहस्रंतु तथाभुक्त्वाचभोजनं॥ सशंकुकर्णान्करभान्महिषान्वल्मपीवरान्॥ अष्टौपरशतान्येव
पुरुषानेकविंशतिं॥ एतान्संभक्ष्यसमहान्दावाग्निरिवलक्षणं॥ कुंभकर्णोमहारक्षोगमनायोपचक्रमे॥ सरोष

श्चो ध्वरोमांचसतेजोबलसमन्वितः॥ ततः रथस्थमतिं ज्ञात्वा समीयुस्ते निशाचराः॥ शिरोभिश्च प्रणम्यैनं सर्वतः प
र्यवारयन्॥ स सर्वान्सांत्वयामास नैर्ऋतान्नैर्ऋतर्षभः॥ बोधनाद्विस्मितश्चापि राक्षसानिदमब्रवीत्॥
किमर्थमिह चागम्य भवद्भिः प्रतिबोधितः॥ कच्चित्सुकुशलं राज्ञो भयं वा नेह किंचन॥ कच्चिद्राक्षसराज
स्य न रवत्वत्रिप्रियमागतं॥ नह्यल्पकारणे सुप्तं बोधयिष्यंति मामिह॥ तदाख्यात याथातथ्येन मत्प्रबोधस्य कार
णं॥ अथवा ध्रुवमन्येभ्यो भयं परमदारुणं॥ यदर्थं त्वरितैः सर्वैः भवद्भिः प्रतिबोधितः॥ अद्य राक्षसराजस्य भ
यमुत्सादयाम्यहं॥ शातयिष्ये महेंद्रं वा भक्षयिष्यामि वानलं॥ एवं ब्रुवाणं संक्रुद्धं कुंभकर्णमरिंदमं॥ यूपाक्षः
सचिवो राज्ञः कृतांजलिरुवाच ह॥ नाद्य देवकृतं किंचित् भयमस्ति निशाचर॥ गंधर्वदानवेभ्यो वा कुतः पन्न
गभोगिनां॥ याद्दशं मानुषाद्राज्ञो भयं घोरमुपस्थितं॥ वानरैः पर्वताकारैर्लंका संपरिवारिता॥ सीताहरण
दुःखार्ताद्रामान्नः परमं भयं॥ एकेन वानरेणेयं पूर्वं दग्धा महापुरी॥ अक्षः कुमारो निहतो मंत्रिपुत्राः स

ध्यत॥ ततो सहस्रं भेरीणां युगपत्समहन्यत॥ मृष्टकांचनकोणानां असक्तानां समंततः॥ एवमप्यतिनिद्रसः यदा
नैव प्रबुध्यत॥ शापवश्यस्तदा सुप्तः स्यतः क्रुद्धा निशाचराः॥ ते तु क्रोधसमाविष्टाः सर्वे भीमपराक्रमाः॥ तद्रक्षो बो
धयिष्यंतश्चक्रुरन्यं पराक्रमं॥ अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनान्॥ केशानन्ये प्रलुलुचुः कर्णावन्ये दशं
ति च॥ अन्ये तु बलिनस्तस्य कूटमुद्गरपाणयः॥ मूर्ध्नि वक्षसि गात्रेषु निर्दयं समताडयन्॥ मृदंगपटहान्भेरीन्
शंखान्कुंभमुखांस्तथा॥ दश राक्षससाहस्रा जघ्नुर्भीमपराक्रमाः॥ राक्षसानां सहस्रं हि शरीरस्य प्रधाव
ति॥ कुंभकर्णस्तथा सुप्तो नैव स प्रत्यबुध्यत॥ रज्जुजालाविनद्धाभिर्घातनाभिश्च सर्वशः॥ बाध्यमानो महाका
यो न प्रबुध्यत राक्षसः॥ ततो गजसहस्रं हि शरीरस्य प्रधावति॥ मृद्यमानोऽपि न तथा प्राबुध्यत स राक्षसः॥ ते रा
क्षसास्तथा खिन्नाश्चक्रुरन्यं पराक्रमं॥ प्रमदाश्चाह्वयामासुः सृष्टमणिकुंडलाः॥ नागराक्षसकन्याश्च
तथा गंधर्वयोषितः॥ मनुजानां दुहितरः किन्नराणां तथैव च॥ प्रविष्टा भवनं रम्यं तस्य कांचनकुट्टिमं॥ ना
श्च विस्तीर्णजघनाः सर्वाः पीनपयोधराः॥ स्त्रियो गीतवादित्रैः कुंभकर्णाग्रतः स्थिताः॥ ५६ ध्यायद्धयेर

एवंरावणंशरणंव्रजंतिकेचिद्व्यथिताःपतंति॥ केचिद्दिशःसंप्रतिप्रयांतिकेचिद्भयार्ताभुविशेरतेस्म॥
इत्यार्षेश्रीरामायणेयुद्धकांडेप्रबोधनोनामसर्गः॥ ततोरामोमहातेजाधनुरादायवीर्यवान्॥ कुंभकर्णं
महाकायंददर्शहरिकिरीटिनं॥ तंदृष्ट्वाराक्षसश्रेष्ठंपर्वताकारदर्शनं॥ क्रममाणमिवाकाशंपुरानारायणंप्रभुं॥ शूल
हस्तंमहारौद्रंतीक्ष्णदंष्ट्रंभयावहं॥ सतोयांबुदसंकाशंकांचनांगदधारिणं॥ कुंभकर्णंमहाबाहुंदृष्ट्वाशांतिभयंवे
रं॥ यंदृष्ट्वाविद्रुतादिग्भ्योवानराणांमहाचमूः॥ विद्रुतांवाहिनींदृष्ट्वावर्धमानंचराक्षसं॥ युधाविष्टस्त्विदंरामोविभी
षणमुवाचह॥ कोयंपर्वतसंकाशःकिरीटीहरिलोचनः॥ लंकायांदृश्यतेवीरःसविद्युदिवतोयदः॥ पृथिव्यां
केतुभूतोयःमहानेषोत्रदृश्यते॥ यंदृष्ट्वावानराःसर्वेविद्रवंतिदिशोभयात्॥ आचक्ष्वमेमहान्कोयंदिवाकर॥
नमयैवंविधंरूपंदृष्टपूर्वंकदाचन॥ सपृष्टोराजपुत्रेणरामेणाक्लिष्टकर्मणा॥ विभीषणोमहाप्राज्ञःकाकुत्स्थ
मिदमब्रवीत्॥ येनवैवस्वतोयुद्धेवासवश्चपराजितः॥ एषविश्रवसःपुत्रोकुंभकर्णोनिशाचरः॥ एते
नदेवायुधिदानवाश्चयक्षाभुजंगाःपिशिताशनाश्च॥ गंधर्वविद्याधरगुह्यकाश्चसहस्रशोराघवसंप्रभ
ग्नाः॥ शूलपाणिंनमायांतंकुंभकर्णंमहाबलं॥ हंतुंनशेकुस्त्रिदशाःकालोयमितिमोहिताः॥ प्रकृत्याएष
तेजस्वीकुंभकर्णःसुदुर्जयः॥ अन्येषांराक्षसेंद्राणांवरदानकृतंबलं॥ एतेनजातमात्रेणक्षुधितेनमहा
त्मना॥ भक्षिताराक्षसाःसप्तमहेंद्रानुचरादश॥ ऋषीणांचसहस्राणिरक्षसानेनराघव॥ भक्षितानिसह
स्राणिसत्वानिसुमहांत्यपि॥ तास्तदाभक्ष्यमाणास्तुप्रजाभयनिपीडिताः॥ यांतिस्मशरणंशक्रंतंचाप्यर्थंन्यवे
दयन्॥ सकुंभकर्णंकुपितोमहात्माजघानवज्रेणशितेनशक्रः॥ सशक्रवज्राभिहतोमहात्माचचालको
कोपाच्चभृशंननाद॥ तस्यनानद्यमानस्यकुंभकर्णस्यरक्षसः॥ श्रुत्वानिनादंवित्रस्ताःप्रजाभूयोवि
तत्रसुः॥ ततःकोपान्महेंद्रस्यकुंभकर्णोमहाबलः॥ विकृष्यैरावणाद्दंतंजघानोरसिवासवं॥ कुंभक
र्णप्रहारार्तःसोथव्यथितवासवः॥ ततोनिषेदुःसहसादेवगंधर्वराक्षसाः॥ प्रजाभिःसहशक्रस्तुययौस्थानंस्व
यंभुवः॥ कुंभकर्णस्यदौरात्म्यंशशंसाथप्रजापतेः॥ प्रजानांभक्षणंचापिदेवानांचप्रधर्षणं॥ आश्रमध्वंस
नंचापिपरस्त्रीहरणानिच॥ एवंप्रजाभक्षयिष्यतिराक्षसः॥ अचिरेणैवकालेनशून्याभूमिर्भविष्यति॥

वासवस्य वचः श्रुत्वा सर्वलोकपितामहः॥ रक्षः समाह्वयामास कुंभकर्णं ददर्श ह॥ कुंभकर्णं समीक्ष्यैव वित्रस्ता भूत्प्रजा
पतिः॥ तत एनं महावीर्यं स्वयंभूरिदमब्रवीत्॥ ध्रुवं लोकविनाशार्थं पौलस्त्येनासि निर्मितः॥ यस्मात्त्वमीदृशाः शूरा लो
कान्हिंसितुमुद्यतः॥ तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसि॥ ब्रह्मशापाभिभूतश्च निपपात स राक्षसः॥ पुरा हि वृत्तवा
न्निद्रां गोकर्णस्य तपोवने॥ आलापिनि तं दृष्ट्वा निद्रया समभिप्लुतं॥ ततः परमसंभ्रान्तो रावणो वाक्यमब्रवीत्॥ वृत्वानुकं
चनं वृक्षं फलकाले न पातयेत्॥ नप्तारं स्वयं न्याय्यं शप्तुमेवं प्रजापते॥ नार्यस्य वचनं मिथ्या स्वप्स्यत्येष न संशयः॥ कालं
क्रियतामस्य स्वप्ने जागरणे तथा॥ रावणस्य वचः श्रुत्वा स्वयंभूरिदमब्रवीत्॥ शयिता ह्येष षण्मासानेकाहं जागरिष्यति॥
२ असौ विचारकैकाकी क्षुधितो विचरन्भुवि॥ व्यात्तास्यो भक्षयेल्लोकान्संक्रुद्ध
इव पावकः॥ आत्मव्यसनमासाद्य कुंभकर्णो विबोधितः॥ बलपराक्रमभीतेन राज्ञा संप्रति राघव॥ स एष क्षुधितो वीरो
निर्गमिष्यति संशयं॥ वानरान्भृशसंक्रुद्धो भक्षयिष्यति वीर्यवान्॥ कुंभकर्णं समालोक्य हरयोऽपि विदुद्रुवुः॥ कथमेनं
रणे क्रुद्धं वारयिष्यन्ति वानराः॥ उच्यतां वानराः सर्वे यन्त्रं चेत समुत्थितं॥ तर्कयन्तो यथायुक्तं तो भविष्यन्तीह निर्भयाः॥ ८७

किंकराः॥ स्वयमिच्छति योद्धुं तं पौलस्त्यं देवकण्टकं॥ मृतकल्पो रणान्मुक्तो रामेणामिततेजसा॥ यन्नेदृतैः कृतं पूर्वं न दैत्यैर्न
च दानवैः॥ कृतं निरिहि रामेण विमुक्तः प्राणसंशयात्॥ स यूपाक्षवचः श्रुत्वा आलुश्च भयमागतं॥ कुंभकर्णो विवृत्ताक्षो यूपाक्ष
मिदमब्रवीत्॥ सर्वमद्यैव यूपाक्ष हरिसैन्यं सलक्ष्मणं॥ राघवं च रणे हत्वा पश्चाद्द्रक्ष्यामि रावणं॥ राक्षसांस्तर्पयिष्यामि हरीणां
मांसशोणितैः॥ रामलक्ष्मणयोश्चैव स्वयं पास्यामि शोणितं॥ तस्य श्रुत्वा वाक्यं गर्वितानि शम्य स गर्वितं रोषविवृद्धघोरं॥ महोद
रो रावणयोधमुख्यः कृताञ्जलिर्वाक्यमिदं बभाषे॥ पश्चादपि महाबाहो शत्रून्युधि विजेष्यसे॥ तद्दर्शनपरं तावद्भ्रातरं द्र
ष्टुमर्हसि॥ महोदरवचः श्रुत्वा राक्षसैः परिवारितः॥ कुंभकर्णो महातेजाः संप्रतस्थे महाबलः॥ उत्थाप्य तं समभ्यानीतं
राक्षसपुंगवः॥ पीत्वा घटसहस्रं वै गमनायोपचक्रमे॥ स गच्छन्भवनं राज्ञो रक्षोगणसमावृतः॥ कुंभकर्णः पदन्यासैः कं
पयन्निव मेदिनीं॥ ईषदुत्कटमत्तश्च तेजोबलसमन्वितः॥ कुंभकर्णो बभौ घोरः कालान्तकयमोपमः॥ स राजमार्गं वपुषा
विदीपयन्सहस्ररश्मिर्भगवानिवांशुभिः॥ जगाम नेत्राञ्जलिमालया वृतः शतक्रतुस्थानमिव स्वयंभुवः॥ तमद्रिशृंग
प्रतिमं किरीटिनं स्पृशन्तमादित्यमिव स्वतेजसा॥ वनौकसः प्रेक्ष्य विवृद्धमद्भुतं भयार्दिता दुद्रुविरे समन्ततः॥ केचिच्छ

सुग्रीवं कुंभकर्णमवारयितं ॥ किंचिदुत्थायसंहृष्टः सांनिकर्षमुपानयत् ॥ अथासीनस्यपर्यंके कुंभकर्णो महाब
लः ॥ सजग्राह तदा भ्रातुः पादौ राक्षसपुंगवः ॥ उत्थाय चैनं मुदितो रावणः परिषस्वजे ॥ सभ्रात्रा संपरिष्वक्तो
यथावच्चाभिनंदितः ॥ कुंभकर्णः स तदा दिव्यं प्रतिपेदे वरासनं ॥ स तदासनमासाद्य कुंभकर्णो महाबलः ॥ सं
रक्तनयनः कोपात् रावणं वाक्यमब्रवीत् ॥ किमर्थमहं त्वया राजन् प्रबोधितः ॥ शंस कस्माद्भयं तेद्य कोत्र
प्रेतो भविष्यति ॥ यदींद्रात्ते भयं राजन् यदि वापि स्वयंभुवः ॥ यमं हि यमयिष्यामि भक्षयिष्यामि पावकं ॥ आदि
त्यं पातयिष्यामि सनक्षत्रं महीतले ॥ शतक्रतुं विजेष्यामि पास्यामि वरुणालयं ॥ पर्वतांश्चूर्णयिष्यामि दारयि
ष्यामि मेदिनीं ॥ देवान् विद्रावयिष्यामि त्रैलोक्ये पार्थिवो भव ॥ दीर्घकालं प्रसुप्तस्य कुंभकर्णस्य विक्रमं ॥
अद्य पश्यंतु भूतानि भक्ष्यमाणानि सर्वशः ॥ नन्विदं त्रिदिवं सर्वं आहारः पूर्यते मम ॥ सा घतं तोषयिष्यामि भ
क्षयित्वा सुरासुरान् ॥ कुंभकर्णवचः श्रुत्वा प्रहर्षे रावणस्तदा ॥ पुनर्जातमिवात्मानं मेने स रजनीचरः ॥ कुंभ
कर्णवचः श्रुत्वा भ्रातुरत्यंतपराक्रमं ॥ बभूव मुदितो राजा शशांक इव चोद्गतः ॥ तमीषत्परिवृत्ताक्षो नेत्रा

संसुप्तः

भ्यां कुपितोऽब्रवीत् ॥ भ्राता रावणः प्रेक्ष्य कुंभकर्णमुपस्थितं ॥ अयं ते सुमहान् कालः शयानस्य निशाचर ॥ सुखितस्त्वं
नजानीषे समानं मत्परं भयं ॥ एष दाशरथी रामः सुग्रीवसहितो बली ॥ समुद्रं सबलस्तीर्त्वा मूलं नः परिकृंतति ॥ न देवासुरयक्षे
भयं भ्यो गंधर्वेभ्यः कदाचन ॥ भूतपूर्वं ताहृक् यादृग्रामानुषादिदं ॥ पुरा त्वं नाभिजानीषे यथासीत्तन्मया हृता ॥ सीताहरणसंजातं
रामान्नो सुमहद्भयं ॥ हंता वश्च भ्रातः कायाद्वाराण्युपवनानि च ॥ सतुना सुखगम्येन वानरैरर्णवं कृतं ॥ ये राक्षसा मुख्यतमा हतास्ते वा
नरैर्युधि ॥ वानराणां क्षयं युद्धे न पश्यामि कदाचन ॥ नगरं शत्रुणा रुद्धं युद्धेन वसुदुर्जनं ॥ कोशाश्च क्षपिताः सर्वे अभ्यवपद्यमां ॥
तदेतद्भयमुत्पन्नं त्रासनं च महद्बलं ॥ तस्माद्भयविनाशार्थं मया संबोधितो भवान् ॥ त्रायस्वेमां च नगरीं बालवृद्धावशेषितां ॥
२ भ्रातुरर्थे महाबाहो कुरु साहाय्यमुत्तमं ॥ मयैवं नोक्तपूर्वं हि कश्चिद्भ्रातापरंतप ॥ त्वय्यस्ति मम सस्नेहः परा संभावना च मे ॥ देवासुरे
८ महद्युद्धे बहुशो राक्षसर्षभ ॥ त्वया देवाः प्रतिव्यूह्य निर्जिताश्च सुरा युधि ॥ नहि ते सर्वभूतेषु दृश्यते सदृशो बले ॥ स त्वं मया
समादिष्टो वीर दिव्यपराक्रमे ॥ निर्गच्छ शूलमादाय पाशहस्त इवांतकः ॥ वानरान् राजपुत्रौ च भक्षयस्व प्रमथ्य च ॥ स भावको कैवे
तेरूपं विद्रविष्यंति वानराः ॥ रामलक्ष्मणयोरेव हृदयं प्रस्फुटिष्यति ॥ अतिबलमहतो भयाद्धि मुक्तो भवतु जनः सुचिरेण

युद्धकांड माधसर्वः ॥ तवभुजबलसंश्रयाभिगुप्तः त्रिदशरिपो जहि राघवंस्य सैन्यं ॥ कुरुष्व मे प्रियहितं मे तदुत्तमं यशस्कर प्रियवरणबांधव रामायण पा-
प्रियं ॥ स्वतेजसा विधमसपत्नवाहिनीं शरत्सुघनं पवन इवोद्यतो महान् ॥ इत्यार्षे रामायणे कुंभकर्णसमादेशो नाम सर्गः ॥ तस्य राक्षसरा
८१ जस्य निशम्य परिदेवनं ॥ कुंभकर्णं उवाचेदं वचनं प्रजहास च ॥ दृष्टो दोषो हि योस्माभिः पुरा मंत्रविनिश्चये ॥ हितेष्वनभियुक्तेन सोय
७३ मासादितस्त्वया ॥ इदं खलु फलं प्राप्तं शीघ्रं पापस्य कर्मणः ॥ निरयस्यावपतनं यथा दुष्कृत कर्मणः ॥ प्रथमं वै महाराज कृत्यमेतन्न
चिंतितं ॥ केवलं वीर्यदर्पेण नानुबंधो विचारितः ॥ यः पश्चात् पूर्वकर्माणि करोत्यैश्वर्यमाश्रितः ॥ पूर्वाणी तर कार्याणि न स वेद नयान
नयौ ॥ देशकालविहीनानि कर्माणि विपरीतवत् ॥ क्रियमाणानि दुष्यंति हवींष्यप्रयतेष्विव ॥ त्रयाणां पंचधा योगं कर्मणां यः
प्रपद्यते ॥ सचिवैः संविदं कृत्वा यः सम्यक् वर्तते पथि ॥ यथागमं च यो राजा समयं विजिगीषति ॥ बुध्यते सचिवैर्बुध्या सुहृ
दश्चानुपश्यति ॥ धर्ममर्थं च कामं च सर्वान् वा रक्षसां पते ॥ भजते पुरुषः काले त्रीणि द्वंद्वानि वा पुनः ॥ त्रिषु चैतेषु यत् श्रेष्ठं श्रुत्वा
तन्नावबुध्यते ॥ राजा वा राजपुत्रो वा व्यर्थं तस्य बहुश्रुतं ॥ उपप्रदानं सांत्वं च भेदं काले च विक्रमं ॥ योगं च रक्षसां श्रेष्ठ तावु
भौ च नयानयौ ॥ काले धर्मार्थकामान् यः संमंत्र्य सचिवैः सह ॥ निषेवेतात्मवान् लोके न स व्यसनमाप्नुयात् ॥ हितानु ८१ ७३

विभीषणवचः श्रुत्वा हनुमद्वाहरूपयत् ॥ उवाच राघवो वाक्यं नीलं सेनापतिं तदा ॥ स त्वं सैन्यानि सर्वाणि व्यूह्य तिष्ठस्व पा
वके ॥ द्वाराणि संक्रमांश्चैव लंकायां प्लवगैः सह ॥ शैलशृंगाणि वृक्षांश्च शिलाश्चादाय सर्वशः ॥ भवंत्वायुधाः
सर्वे वानराः शैलपाणयः ॥ राघवेण समादिष्टो नीलो हरिचमूपतिः ॥ शशास वानरानीकं यथावत् कपिकुंजरः ॥ ऋष
भः सरभो नीलो हनूमानंगदो नलः ॥ शैलशृंगाणि शैलाभाः गृहीत्वा द्वारमभ्ययुः ॥ ततो हरीणां तदनीकमुग्रं ररा
ज शैलोद्यत भीमवेगं ॥ गिरेः समीपानुगतं यथैव महास्वनं तोयदजालमुग्रं ॥ इत्यार्षे रामायणे कुंभकर्णप्रस्तावनवर्णनं ना
म सर्गः ॥ ॥ स तु राक्षसशार्दूलो निद्रावशमुपागतः ॥ राजमार्गं श्रिया जुष्टं ययौ विपुललोचनः ॥ राक्षसानां सहस्र
स्तैश्च वृतः परपुरंजयः ॥ गृहेभ्यः पुष्पवर्षैश्च कीर्यमाणस्तदा ययौ ॥ स हेमजालविततं भानुभास्वरदर्शनं ॥ ददर्श वि
पुलं रम्यं राक्षसेंद्रनिवेशनं ॥ अभिगम्य गृहं भ्रातुः कक्ष्याश्चापि विगाह्य सः ॥ ददर्शासीनमाविग्नं विमाने पुष्पके गुरुं ॥
स तदा सूर्य इव प्रभासं प्रविश्य रक्षोधिपतेर्निवेशनं ॥ दूराद्ददर्शाग्रजमासनस्थं स्वयंभुवं शक्र इवासनस्थं ॥ अथ दृष्ट्वा

नतुष्यति॥ सच तस्मैप्रदातव्यः एवं बुधिमतांवरः॥ नश्रुतंतन मयाद्धंच सागरे सेतुबंधनं॥ नूनमस्मद्धिनाशाय विधिना दोष्ठसारि
रितः॥ तत् श्रुत्वा समहाराजः कुंभकर्णस्य भाषितं॥ भृकुटीं चैव संचक्रे कुंभकर्णमुवाचह॥ मान्यो गुरुरिवाचार्यः किं
मां त्वमनुशास्सि॥ किमेवं वाक्श्रमं कृत्वा कालयुक्तं विधीयतां॥ गच्छ त्वं शयनीयाय शयत्वं विगतज्वरः॥ राघवं मानवं
हन्याल्लाघवो लक्ष्मणस्तथा॥ अहं रामं वधिष्यामि ससुग्रीवं सलक्ष्मणं॥ वानरांश्च हनिष्यामि ततो देवान् महारणे॥ वि
ष्णुं चैव हनिष्यामि ये च तस्यानुयायिनः॥ गच्छ गच्छ त्वं क्षत्रचिरंजीव सुखी भव॥ कुंभकर्ण महाप्राज्ञ कुरुष्व वचनं मम॥
शृणु राजन् अवहितः मम वाक्यमरिंदम॥ यदर्थं तु पुरा सौम्य नारदात् श्रुतवानहं॥ षण्मासादहमुत्थाय अस्मि त्वाभक्ष्यमु
त्तमं॥ नचलं क्षोस्मिरा जेंद्र ततो हं प्रार्थितो वनं॥ बहूनि भक्षयित्वाहं सत्त्वानि विविधानि वै॥ भुक्त्वा च मनुपर्णं स्वां शिलातल
मुपाविशं॥ शिलातलोपविष्टेन दृष्टं मया काशगो मुनिः॥ हृष्टो हृष्टश्च संजातो मां दृष्ट्वा स च नारदः॥ अवतीर्णश्च सहसा मया
नतोहं चैवाभिवादितः॥ उपविष्टं शिलायां तु मया ब्रुवं॥ कुत आगम्यते ब्रह्मन् कुतो वा प्रतिगम्यते॥ एवमुक्तो महाराजन् नारदो मा
मुवाचह॥ देवानामालयं मेरुं गतोहं देवसंसदि॥ ततो हि भयभीतानां समाजस्तत्र संबभौ॥ तत्र ब्रह्मा च रुद्रश्च वि

ष्णुश्च जयतांवरः॥ देवराजो महेंद्रश्च लोकसाक्षी च पावकः॥ मरुतो वसवश्चैव चंद्रादित्यग्रहास्तथा॥ गंधर्वा गुह्यका
श्चैव गरुडोषधयोनगाः॥ मंत्रं च मंत्रिरे तत्र वधं रक्षःकुलस्य ते॥ सर्वे हि निर्जितास्तत्र रावणेन दुरात्मना॥ देवराजोनि
बद्धस्तु यमः संख्यपराजितः॥ जितस्तु सवलो संख्ये कुबेरो धनदोपि च॥ चंद्रादित्यौ च संभ्रांतौ त्रैलोक्यं सचराचरं॥ य
ज्ञाविध्वंसिताः सर्वे धर्मिष्ठाः प्रहृतान्नृपाः॥ देवोद्यानानि भग्नानि स्त्रियो भीता यथेष्टतः॥ रक्षसा तेन रौद्रेण रावणेन ब
लीयसा॥ ब्रह्मणो वरदानेन गर्वितेन सुरोत्तमाः॥ इत्युक्त्वा च ततो देवान् सर्वान् देवपुरोहितः॥ चिंतयध्वं वधोपायं रावणस्य
दुरात्मनः॥ एवमुक्ते तु वचने ब्रह्मा देवानुवाचह॥ अवध्यत्वं मया दत्तं देवदैत्यैः सुरक्षसैः॥ मानुषेभ्यो भयं तस्य वानरेभ्यश्च
देवताः॥ सुरासुरैस्तु भूतैः वधस्तस्य न विद्यते॥ तस्माद्देवो हरिर्देवः पद्मनाभः त्रिविक्रमः॥ पुत्रो दशरथस्यास्य चतुर्बाहुः
सनातनः॥ भवंतो वसुधां गत्वा विष्णोरस्य महात्मनः॥ वानराणां तनुं कृत्वा सहायत्वं करिष्यथ॥ एवमुक्ता ततो ब्रह्मा तत्र
वांतरधीयत॥ देवा अपि यथान्यायं जग्मुर्वै यत्र वासवः॥ तदा विख्यातवान् मह्यं नारदो भगवान् ऋषिः॥ यथा तत्स मंत्रो

णतनोयातः सुरालयं॥ सोयं विष्णुः सुरैः सार्धं वानरत्वमुपागतः॥ मह्यं तु रोचते सीता रामाय प्रतिदीयतां॥ कुरु मार्गमत्र
हं तेन संधिस्तेन रोचते॥ त्रैलोक्यनमतेयस्य पूज्यश्च सततं प्रभुः॥ नमस्व रामं राजेंद्र रक्ष स्वात्मानमात्मना॥ योग्यश्च
राघवो मित्रं संधिश्चैवोत्तमो भवेत्॥ सकामा न च वैदेह्या भविष्यंति निरुद्यमाः॥ इति श्रीरामायणे कुंभकर्णवाक्यं नाम सर्गः॥
तच्छ्रुत्वाद्वादिनोदारस्य कुरुष्व वचनं मम सत॥ - - - - ॥ कोसौ विष्णुरिति ख्यातो यस्य त्वं लालिधिम्यसे॥ देवत्वे
तं न मन्ये हं तथान्यान् देवदानवान्॥ मानुषत्वं गतेतस्मिन् किं भयं त्वामुपस्थितं॥ नित्यमाहारभूतास्तु मानुषा मम हाव
ञ॥ खादयित्वा तु तान् पूर्वं कथं पश्चान्नमाम्यहं॥ प्रणम्य मानुषं रामं सीतां दत्वा तु तस्य च॥ हास्यभूतस्तु लोकानां अनु
यास्यामि पृष्ठतः॥ हृत्वा तस्य पुरा भार्यां मानं कृत्वा सुदारुणं॥ प्रणमेद्रावणो रामं मम चेत्तु बुद्धिनिर्णयः॥ यदि रामः स्वयं विष्णुः
र्लक्ष्मणोपि शतक्रतुः॥ सुग्रीवेस्त्र्यंबकः साक्षात् स्वयं ब्रह्मा विभीषणः॥ अहोरात्रास्त्वाण्यतीतानि छरयेतबुधिरी छरी॥
भयं तवैरिणं रामं योमित्रं कर्तुमिच्छसि॥ देवत्रयः परित्यज्य मानुषीं योनिमाश्रितः॥ अस्मान् हंतुं किलायातः स सांत्वे

ध्यमालोक्य कार्याकार्यमिहात्मनः॥ राजा सहायैस्तत्वज्ञैश्चिंतयेत् बुद्धिनिश्चितैः॥ अनभिज्ञा हि शास्त्राणां बहवः पररुबुद्धयः॥
माग अप्यात् हंतुमिच्छंति मंत्रेष्वभ्यंतरीकृताः॥ जलसौरकुल्ले छिद्रैः सुनिरोपितैः॥ सहायैर्धार्यते राज्यं सुलभैरिव मंदि
रं॥ मंत्रिरूपा हि रिपवः संभाव्याश्च विचक्षणे॥ हिथैतं नयम् उत्सृज्य विपरीतोपसेविनः॥ मूर्खैर्मंत्रिगुणापेतैर्भातामपापवुद्धिभिः
॥ वस्तितेनाहरन्नग्निं पापेन प्रतिवारितः॥ अशास्त्रविद्वषां तेषां न कार्यमहितं वचः॥ अथ शास्त्रानभिज्ञानां विपुलां श्रिय
मिच्छतां॥ अहितं हि हितकारं धार्ष्ट्याज्जल्पंति ये नराः॥ अयस्समंत्रबाह्यास्ते कर्तव्याः कार्यदूषणाः॥ विनाशाय च भर्तुर्हि संहि
ताः शत्रुबुद्धिभिः॥ विपरीतानि कृत्यानि कारयंतीह मंत्रिणः॥ तान् भर्ता मित्रसंकाशान् अमित्रान् मित्रनिर्णये॥ व्यवहा
॥ रेष्वानीयात् सचिवानुपसंहितैः॥ उपलभ्येह कस्यापि सहसानुप्रधावतः॥ क्षिप्रमन्येप्रपद्यंते क्रौंचस्य छिद्रमिव द्विजाः॥
यो हि शत्रुमविज्ञाय स्वात्मानं परिरक्षति॥ अवाप्नोति हि सोनर्थान् स्थानाच्च व्यपरोप्यते॥ शरोव्यवसितः शत्रुः स्वेन चार्थे

घ

दीकुंभकर्णोतिगर्जनः॥ पंचरामवधायैतःशब्दोविसृज्यघोषय॥ ततोगत्वारणेयुद्धंदास्यामस्तस्ययत्नतः॥ तंवधिष्यामहेशत्रुंनोपाये॥
कार्यमास्तिन॥ अथजीवतिनःशत्रुस्तेवयंचकृतसंभ्रमाः॥ यन्नःकृतंबुधिपूर्वंहंतकुर्वंतिनिशाचराः॥ ततःसमभिपत्स्यामोम
नसायत्समर्थितं॥ वयंयुद्धाद्दिहेष्यामोरुधिरेणसमुक्षिताः॥ सांविदार्यतनुंबाणैःरामनामांकितैर्युधि॥ निहतोराघवोस्माभिः
लक्ष्मणश्चेतिवादिनः॥ तवपादौग्रहीष्यामस्त्वंनःकामंपरिष्वज॥ ततोविघुसनगरेगजस्कंधेनपार्थिव॥ ततोरामःसहभ्रातासहसे
नर्हनसर्वतः॥ प्रीतोनामततोभूत्वाभृत्यानांतमरिंदम॥ भोगांश्चपरिवारांश्चकामान्वसुचदापय॥ ततोमाल्यानिवासांसिवरा
चमनुलेपनं॥ वेयंचदत्वायोधेभ्यःस्वयंचमुदितःपिब॥ ततोस्मिन्बहुलीभूतेकौलीनेसर्वतोगते॥ भक्षितःसगणोरामोराक्ष
सैरितिविश्रुते॥ प्रविश्याश्वास्यचापित्वंसीतांहरसिपार्थिव॥ धनधान्यैश्चकामैश्चरत्नैश्चैतांप्रलोभय॥ अनयोपधयारा
जन्भयशोकानुबंधया॥ अकामावशगासीतानष्टनाथाभविष्यति॥ रजनीयंचभर्तारंविनष्टमवगम्यसा॥ निराशास्त्रील
घुत्वाच्चवशंप्रतिपद्यते॥ सापुरासुखसंवृद्धासुखार्हादुःखकर्शिता॥ त्वय्याध्यक्षसुखंज्ञात्वासर्वथोपगमिष्यति॥
एतत्सुनीतंयद्दर्शनेनरामंहिदृष्ट्वैवभवेदनर्थः॥ इहैवतेसेत्स्यतिमोत्सुकोभूर्महान्युधेनसुखस्यलाभः॥ अ
क्षि

दृष्टसैन्योह्यनवाप्तसंशयोरिपूनयुद्धेनजयज्जनाधिपः॥ यशश्चपुण्यंचधनंचभूपतिःश्रियंचकीर्तिंचचिरंसमश्नुते॥ इ
तिमहोदरवाक्यंनामसर्गः॥ सतथोक्तोविनिर्भर्त्स्यकुंभकर्णोमहोदरं॥ आददेनिशितंशूलंवेगाच्छत्रुनिबर्हणं॥ सर्वकाला
यसंदीप्तंतप्तकांचनभूषणं॥ इंद्राशनिसमंघोरंवज्रप्रतिमगौरवं॥ देवदानवदर्पघ्नंयक्षगंधर्वसूदनं॥ रक्तमाल्यां
बरधरंशिरसाज्वलपावकं॥ आददेनिशितंशूलंशत्रुशोणितरंजितं॥ कुंभकर्णोमहातेजारावणंवाक्यमब्रवीत्॥
निर्गच्छाम्यहमेवैकःतिष्ठत्विहबलंतव॥ अद्यतान्क्षुधितःकोपात्भक्षयिष्यामिवानरान्॥ अहंनेघववधंघो
रंवधात्तस्यदुरात्मनः॥ सवावानोचभक्ष्यामिनिर्वैरस्त्वंसुखीभव॥ गर्जंतिनवृथाशूराःनिर्जलाइवतोयदाः॥
पश्यसंपाद्यमानंवैगर्जितंयुधिकर्मणा॥ नमर्षयात्मनायंतेनसंभावयंस्तुत॥ मर्षयित्वापुराशूराःकर्मकुर्वंतिदुष्करं॥
विक्लवानामबुद्धीनांराज्ञांपंडितमानिनां॥ महोदरप्रधानैस्तैस्त्वद्विधोराजसंमतः॥ युद्धेकापुरुषैर्नित्यंभवद्भिःप्रिय बे
वादिभिः॥ राजानमनुवर्तद्भिःकृत्स्नमेतद्विचारितं॥ राज्ञावस्थाकृतालंकाक्षीणःकोशोहतंबलं॥ राजानमिम

- र च

मा साध्य सुहृच्छिद्रमभिवात्र किं ॥ एष निर्याम्यहं युद्धं उद्यतः शत्रुनिग्रहे ॥ दुर्नयं भवतामद्य समीकर्तुं महाहवे ॥ एवमुक्त
वतो वाक्यं कुंभकर्णस्य धीमतः ॥ प्रत्युवाच ततो वाक्यं प्रहसन्राक्षसेश्वरः ॥ महोदरोयं रामस्य परित्रस्तो न संशयः ॥
नहि रोचयते तात युद्धं युद्धविशारद ॥ नकश्चित्तत्समो नास्ति सौहृदेन बलेन च ॥ गच्छ शत्रुवधाय त्वं कुंभकर्ण जयाय च ॥
सैन्यैः परिवृतो भ्रातः कर्तव्यं वचनं मम ॥ असहायश्च गमनं मम बुध्या न रोचते ॥ वानराश्च महात्मानः शीघ्राश्च व्यव
सायिनः ॥ एकाकिनं प्रमत्तं च गमयेयुर्हि संशयं ॥ तस्मात्परमदुर्धर्षैः सैन्यैः परिवृतो व्रज ॥ अहितं रक्षसानां त्वं शत्रुपक्षं नि
षूदय ॥ अथासनात्समुत्पत्य स्रजं मणिं सूर्यसमप्रभं ॥ आबबंध महातेजाः कुंभकर्णस्य रावणः ॥ अंगदान्यंगुलीवेष्टनक
वचं च महाधनं ॥ हारं च शशिसंकाशं सबबंध महात्मनः ॥ दिव्यानि गंधांश्च माल्यं च रत्नानि विविधानि च ॥ गात्रेषु यो
जयामास कुंडले च महीभुजः ॥ कांचनांगदकेयूरनिष्कप्रवरभूषणः ॥ कुंभकर्णो महाबाहुर्हुताशन इवाबभौ ॥ श्रो
णीसूत्रेण महता कांचनेन विराजते ॥ अमृतोत्पादने कृष्णो भुजगेनेव मंदरः ॥ स कांचनं भारसहं वितानं विद्युदुज्वलं
क्षमिवात्मभासा ॥ आबध्यमानकवचः अभात्संध्याभ्रसंवीत इवाद्रिराजः ॥ सर्वाभरणजुष्टांगः शूलपाणिः स

रा

प्राक्तनस्त्वया ॥ तत्राप्यनुपपन्नं ते वक्तुं भयं साधु च ॥ येन पूर्वं जनस्थाने बहवोऽतिबला हताः ॥ राक्षसा राघवं तं नु कथं मे को हनि
ष्यसि ॥ ये पुरा निर्जितास्तेन जनस्थाने महौजसः ॥ राक्षसास्तस्य तान्नू भीतान्सर्वान्नेव विलोकय ॥ ये चान्ये महात्मानो रा
क्षसाः शूरसंमताः ॥ रामं पश्यंति भीतास्ते स्वप्नेऽपि नरसत्तमं ॥ तं सिंहमिव संक्रुद्धं रामं दशरथात्मजं ॥ सर्पं सुप्तमिवा
प्राज्ञः प्रबोधयितुमिच्छसि ॥ ज्वलितं तेजसा नित्यं क्रोधेन च दुरासदं ॥ कथं मृत्युमिवासह्यं मासादयितुमिच्छसि ॥ संशयस्थम
थो चीर्णं शत्रुं प्रतिसहासनं ॥ एकस्य गमनं तत्र न मह्यं रोचते तव ॥ हीनार्थस्तु समृद्धार्थं को रिपुं प्राकृतं यथा ॥ निश्चितं जीवितासा
गेव रामं नेतुमर्हति ॥ यस्य नास्ति मनुष्येषु सदृशो राक्षसोत्तम ॥ तेनेच्छसि कथं योद्धुं तुल्येनेह विवस्वता ॥ एवमुक्त्वा तु संरब्धो कुंभ
कर्णं महोदरः ॥ उवाच रक्षसां मध्ये रावणं रावणोपमः ॥ लब्ध्वा पुनस्त्वं वैदेहीं किमस्मानभिभाषसे ॥ यदीच्छसि तदा सीता
अवशा वशमागता ॥ दृष्टः कश्चिदुपायो मे सीतोपादानकारकः ॥ रुचितस्तु स च बुध्या मे राक्षसर्षभ मतं शृणु ॥ अहं द्विजिह्वः संह

राक्षसो घोरदर्शनः ॥ निपपात महातेजाः कुंभकर्णः प्रतापवान् ॥ धनुःशतपरीणाहः षट्शतान्युच्छ्रितः ॥ रौद्रः शकट
चक्राक्षो गिरिकूटोपमो महान् ॥ सन्निपात्य सरक्षांसि दग्धशैलोपमो बली ॥ कुंभकर्णो महाबाहुः प्रहसन् वाक्यम
ब्रवीत् ॥ अद्य वानरमुख्यानां तानि यूथानि भागशः ॥ निर्दहिष्यामि संक्रुद्धः शलभानिव पावकः ॥ सर्वे राम सहा
याश्च येचान्ये मम शत्रवः ॥ नापराध्यंति मे काम्यं वानराः वनचारिणः ॥ जातिरस्मद्विधानां सा पुरोद्यानविभूषणं ॥
पुरोरोधस्य मूलं तु राघवः सहलक्ष्मणः ॥ हते तस्मिन् हतं सर्वं तं हनिष्यामि संयुगे ॥ एवं तस्य ब्रुवाणस्य कुंभकर्णस्य रा ष
क्षसाः ॥ नादं चक्रुर्महावीरा न कंपयंत भिवार्णवं ॥ तस्य निष्पततः पुर्याः कुंभकर्णस्य रक्षसः ॥ बभूवुर्घोररूपाणि
निमित्तानि समंततः ॥ शुष्काशनि समाभ्यघाविन दुर्गर्दभारुणाः ॥ ससागरवना चैव वसुधा समकंपत ॥ घोररूपाः शिवा नेदुः
सज्वालकवलैर्मुखैः ॥ मंडलान्यपसव्यानि बबंधुश्च विहंगमाः ॥ निपपात च गृध्रोस्य रथस्योपरि गच्छतः ॥ प्रास्फुरन्नय
नं चास्य सव्यो बाहुरकंपत ॥ गगनान्निपपातोल्का ज्वलंती भीमनिस्वना ॥ आदित्यो निःप्रभश्चासीत् प्रवबौ न च मारु
तः ॥ अचिंतयन्महोत्पातानुद्भूतान् जीवितांतकान् ॥ निर्ययौ कुंभकर्णः स कृतांतबलनोदितः ॥ स निष्क्रम्य पुरीद्वा

रात् कुंभकर्णो महाबलः ॥ ददर्शाभ्रघनप्रख्यं वानरानीकमद्भुतं ॥ तं दृष्ट्वा वानरश्रेष्ठा राक्षसं पर्वतोपमं ॥ वायुनुन्ना यथा मेघा
जग्मुः सर्वे यथा दिशः ॥ विपुलपरिघवान्स कुंभकर्णो रिपुनिधनाय विनिःसृतो महौजाः ॥ कपिगणभावहन्सु भय
तीव्रं प्रभुरिव किंकरदंडवान् युगांते ॥ इति श्रीवाल्मीकिरामायणे कुंभकर्णनिर्याणं नाम सर्गः ॥ ॥ स ननाद महानादं
समुद्र इव पर्वणि ॥ जनयन्निव निर्घातं कंपयन्निव पर्वतं ॥ तमवध्यं मघवता यमेन वरुणेन च ॥ प्रेक्ष्य भीमाक्षमायां
तं वानरा विप्रदुद्रुवुः ॥ दृष्ट्वा तं वानरश्रेष्ठा राक्षसं पर्वतोपमं ॥ वायुक्षिप्ता यथा मेघाः ययुः सर्वा दिशस्तदा ॥ तद्वारा
नीकमतिप्रचंडं दिशो भ्रमद्दृष्टमिवाभ्रजालं ॥ स कुंभकर्णः समवेक्ष्य हर्षान्ननाद नादं घनवद्घनाभः ॥ ते तस्य घोरं
निनदं निशम्य यथा शनैर्दीर्घघनेन मुक्तं ॥ पेतुः पृथिव्यां बहवः प्लवंगा निकृत्तमूला इव सालवृक्षाः ॥ तांस्तु विद्रवतो दृ
ष्ट्वा राजपुत्रोंगदोब्रवीत् ॥ गवाक्षं कुमुदं नीलं सनलं च महाबलं ॥ आत्मानमभिसंस्मृत्य वीर्याण्यभिजनानि च ॥ क्व गच्छ
त भयत्रस्ताः प्राकृता हरयो यथा ॥ सर्वे सैन्यानि वर्तध्वं किं प्राणान्परिरक्षथ ॥ नालं युद्धाय वै रक्षो महतीयं विभीषि
का ॥ महतीमुत्थितामेतां वानराणां विभीषिकां ॥ स्वकालेद्य धर्मिष्ठा भो निवर्तध्वं प्लवंगमाः ॥ कृच्छ्रेण महता त्र

८६

त्ताः संरब्धाश्च परस्परं ॥ शिलापादपहस्तास्ते तस्थुः संग्राममूर्धनि ॥ ते प्रहृष्टा विनर्दन्तः समदा इव कुंजराः ॥ निजघ्नुः परमक्रुद्धाः
कुंभकर्णं वनौकसः ॥ प्रहारैरभिदीर्यंत तेऽश्म शिलाभिश्च महाबलाः ॥ तमप्राप्य महाकायं तत्स्वसैन्ये पपात ह ॥ तस्य गात्रेषु पति
ताः भिद्यंते विपुलाः शिलाः ॥ पादपाः पुष्पिता ग्रेश्च बध्यमानो न चक्रमे ॥ ततः पर्वतमुत्पाट्य द्विविदः प्लवगर्षभः ॥ दुद्रा
व पर्वताकारो राक्षसं समहाबलः ॥ तमप्राप्य महाकायं तत्स्वसैन्ये पपात ह ॥ तस्य गात्रेषु भिद्यंते पतिताः भिद्यंते विपुलाः शिलाः ॥
पादपाः पुष्पिताग्रास्तु भिन्नाः पेतुर्महीतले ॥ सोऽपि सैन्यानि संक्रुद्धो वानराणां महौजसां ॥ ममंथ परमायत्तो वनान्यग्निरिवो
त्थितः ॥ वानरास्तु सुसंक्रुद्धा गिरिशृंगैर्महाबलाः ॥ राक्षसानामनीकानि चिनिजघ्नुः सहस्रशः ॥ तं छेत्तुवेगाभिहतं तं
ताश्च वरवारुणं ॥ रक्षोरुधिरसंक्लेदं बभूवायोधनं महत् ॥ रथिनो वानरेंद्राणां शरैः कालांतकोपमैः ॥ शरांस्तु सहसा जघ्नुः न
दंतो भीमनिस्वनाः ॥ वानराश्च महात्मानः समुत्पाट्य महाद्रुमान् ॥ रथानश्वान् गजानुष्ट्रान् राक्षसांश्च निशुद्यन् ॥ लोहिताद्रीं
स्तु बहवः शेरते वानरर्षभाः ॥ निरस्ताः पतिता भूमौ ताम्रपुष्पा इव द्रुमाः ॥ बध्यमानास्तु ते वीराः राक्षसेन महात्मना ॥ सागरं येन स
तीर्णाः पथा तेनैव दुद्रुवुः ॥ ते स्थलान्यथ निम्नानि विषण्णवदना भृशं ॥ ऋक्षवर्यं निरस्याधावंतो निरपेक्षाः प्लवंगमाः ॥ केचित्समुद्रे प
तिताः गगनं केचिदाश्रिताः ॥ केचिद्वृक्षान्समारूढाः भग्नाः केचित्पर्वतं ॥ केचिन्नगिरीनारुरुहुर्गुहाः केचिच्च तथाश्रिताः ॥

राक्षसः ॥ विक्रमाय कृतोत्साहो देवराज इवाबभौ ॥ स रावणं परिष्वज्य कृत्वा चापि प्रदक्षिणं ॥ प्रणम्य शिरसा चैव संप्र
तस्थे महाबलः ॥ ततस्तस्य रथं दिव्यं पंचनल्वप्रमाणतः ॥ युक्तं खरसहस्रेण मुक्ताध्वजविभूषितं ॥ महाजलद
निर्घोषं कैलासशिखरोपमं ॥ अष्टचक्रं महाचक्रं उपनीय महारथं ॥ जयाशिषा वर्धयित्वा विनीतः प्रांजलिः स्थितः ॥
तमारुह्य ययौ मेघगंभीरनिस्वनः ॥ सोऽतिकायो महानादो रथस्योपरि राक्षसः ॥ गंधर्वनगराकारः प्रगृहीतायुधो बभौ ॥
तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः ॥ शंखदुंदुभिनिर्घोषैः सैन्यैश्चानवरायुधैः ॥ तं जेष्ठतुरगैश्च रथैश्चा
ंबुदनिस्वनैः ॥ अन्वगच्छन्महात्मानं रथिनो रथिनां वरं ॥ नागाष्ट्रखरहस्त्यश्वसिंहद्वीपमृगद्विजाः ॥ अनुजग्मु
र्महात्मानं रथिनो रथिसंयुतः ॥ स पुष्पवर्षैश्च खैरवकीर्यमाणो धृतातपत्रः शितशल्पपाणिः ॥ मदोत्कटः शोणि
तगंधमत्तो विनिर्ययौ राक्षसयोधमुख्यः ॥ निपतंतं महाकायं महानादं महाबलं ॥ अन्वयू राक्षसा भीमा भीमाक्षाः शस्त्र
पाणयः ॥ राक्षसाश्च महाकाया नीलांजनचयोपमाः ॥ शस्त्राण्युद्यम्य खड्गांश्च विविधांश्च परश्वधान् ॥ बह्
व्यासांश्च परिघान् गदाश्च मुसलानि च ॥ शालस्कंधाश्च विविधाः शतघ्नीश्च दुरासदः ॥ स पुरद्वारमासाद्य

८६

भग्नेश्वरास्तदैर्यै विनिवर्तिताः॥ ततः पुनर्हरिश्रेष्ठा भीममहौजसः तदाहवे गिरिस्तटपादपायुधाः॥ पृथक् स्तवः समुद्दिश्य भीमविक्रमाव्यव
स्थिताः परबलदर्पनाशनाः॥ इति वानरसमाश्वासनो नाम सर्गः॥ ॥ ते निवृत्ता महाकायाः श्रुत्वांगदवचस्तदा॥ नैष्ठिकीं बुद्धि
मास्थाय सर्वे संग्रामकांक्षिणः॥ समुदीरितवीर्यास्ते समारोपितविक्रमाः॥ पर्यवस्थापिता वाक्यैरंगदेन प्लवंगमाः॥ चक्रुर्युद्धं
समतुलं वानरास्त्यक्तजीविताः॥ प्रहर्षादागतोत्साहा मरणे कृतनिश्चयाः॥ अथ वृक्षान्महाकायान् शृंगाणि सुमहांतिच॥ वा
नरास्तूर्णमुत्पाट्य कुंभकर्णमुपाद्रवन्॥ तान् समापततो दृष्ट्वा कुंभकर्णः प्रतापवान्॥ व्यद्रावयत् सुसंरब्धो मेघानिव सदाग
तिः॥ ततस्तु तं महावीर्यं दृष्ट्वा वानरयूथपाः॥ शिलाउत्पाट्य विपुलाः कुंभकर्णमुपाद्रवन्॥ अंगदो कुमुदो नीलो गवाक्षश्च गजो
हरिः॥ मैंदोथ द्विविदश्चैव जांबुवान् विनतस्तथा॥ युगपद्घ्नन् हनन् सर्वे कुंभकर्णं महाबलाः॥ तस्य गात्रे विनिर्भिन्नाः शिलाः शैलनिभा
स्तथा॥ ध्वजं रथं खरांश्चैव सूतं चैव व्यपातयत्॥ सोवप्लुत्य रथाद्धीरो गदामुद्यम्य सत्वरः॥ वेगेनाभ्युत्पपाताथ पक्षवानिव पर्वतः॥ स कुंभक
र्णः संक्रुद्धो गदामुद्यम्य वीर्यवान्॥ अमर्दयन् महानागः समंतात् विक्षिपन् रिपून्॥ शतानि सप्त चाष्टौ च सहस्राणि च वानराः॥
प्रकीर्णाः शेरते भूमौ कुंभकर्णेन पातिताः॥ षोडशाष्टौ च दशाच त्रिंशद्विंशाश्च वानराः॥ संपरिष्वज्य बाहुभ्यां निष्पेषसरा

क्षसः॥ हनूमान् शैलशृंगाणि वृक्षांश्च विविधान् बहून्॥ ववर्ष कुंभकर्णस्य शरीरे वानरर्षभः॥ तानि पर्वतशृंगाणि बली च परसा
हवे॥ विभेद परमायस्तो कुंभकर्णो मदोत्कटः॥ ततो हरीणां कं कमुग्रं द्रुद्राव शूलं निशितं प्रगृह्य॥ तस्थौ चलस्यापततः पुरस्ता
न्महीधराग्रं हनुमान् प्रगृह्य॥ तमापतंतं त्रिदशेंद्रशत्रुं जघान शैलेन कपिप्रवीरः॥ स चापि तेनाभिहतस्तरस्वी न चुक्षुभे
कालसमप्रभावः॥ सशैलमार्गं व्यधतडित्प्रकाशं गिरिं यथा प्रज्वलिताग्रशृंगं॥ बाह्वंतरे मारुतिमाजघान गुहोचलं क्रौं
चमिवोग्रशक्त्या॥ स तेन वीरोभिहतस्तनांतरे सुविक्लवः शोणितमुद्वमन् मुखात्॥ ननाद भीमं हनुमान् महायशा य
थाल्पांते सबलो बलाहकः॥ ततो विनेदुः सहसा प्रहृष्टा रक्षोगणास्तं व्यथितं निरीक्ष्य॥ प्लवंगमाश्चापि तथा व्यथा
र्ताः प्रदुद्रुवुस्ते सहसा स्वसंभ्रांताः॥ नीलश्चिक्षेप शैलाग्रं कुंभकर्णाय धीमते॥ तदापतंतं संप्रेक्ष्य मुष्टिनाभिजघान सः॥ नी
मुष्टिप्रहाराभिहतं तच्छैलाग्रं व्यशीर्यत॥ सविस्फुलिंगं सज्वालं निपपात च भूतले॥ ऋषभः शरभो नीलो गवाक्षो गंधमादनः॥
पंच वानरशार्दूलाः कुंभकर्णमुपाद्रवन्॥ शैलवृक्षैस्तलैश्चापि मुष्टिभिश्च महाबलाः॥ कुंभकर्णं महाकायं सर्वतोभ्या
घ्नन् रणे॥ स्पर्शानिव प्रहारांस्तान् मन्यमानो न विव्यथे॥ ऋषभं च महाभागं बाहुभ्यां परिषस्वजे॥ कुंभकर्णभुजाभ्यां

स पीडितो वानरोत्तमः॥ पपात च भृशं भीमो भूमौ मुखवाद्गतशोणितः॥ मुष्टिना शरभं चापि जानुभ्यां नीलमाहवे॥ आ
जघान गवाक्षं तु तलेनतु रिपुस्तदा॥ एतेः प्रहारैः व्यथिता मुमुहुः शोणिताक्षिताः॥ निपेतुश्चापि मेदिन्यां निकृत्ता इव किं
शुकाः॥ ततो वानरमुख्येषु पातितेषु महात्मसु॥ वानराणां सहस्राणि कुंभकर्णं विदुद्रुवुः॥ तं शैलमिव शैलाभाः
सर्वतः प्लवगर्षभाः॥ समारुह्य समुत्पत्य व्यदशंश्च महाबलाः॥ तं च ते दशनैश्चैव जानुभिर्मुष्टिभिस्तलैः॥ कुंभकर्णं महा
कायं निजघ्नुस्ते प्लवंगमाः॥ तं तु वानरसाहस्रैः परिक्षिप्तः समंततः॥ रराज राक्षसव्याघ्रो गिरिराट् भूधरैरिव॥
बाहुभ्यां वानरान्सर्वान् आकृष्य स महाबलः॥ भक्षयामास संक्रुद्धः हरीन्पर्वतसंनिभान्॥ नाविंदत्स्पर्वतो गैश्च महा
रान्राक्षसोत्तमः॥ मांसशोणितसंक्लेदां कुर्वन्भूमिं स राक्षसः॥ चचार हरिसैन्येषु कालाग्निरिव मूर्छितः॥ वज्रहस्तो य
था शक्रः पाशहस्तो यथांतकः॥ शूलहस्तो बभौ तद्वत्कुंभकर्णो महाबलः॥ यथारण्याकाण्यरण्यानि ग्रीष्मे दहति पा
वकः॥ तथा वानरसैन्यानि ददाह स महाबलः॥ ततस्ते वध्यमानास्तु हतयूथा विनायकाः॥ वानरा भयसंविग्ना विनेदुः वि
स्वरं तथा॥ ततो निपात्यमानास्ते कुंभकर्णेन वानराः॥ राघवाभ्यां रामाजग्मुर्व्यथार्त्ता नष्टचेतनाः॥ तमापतंतं संप्रेक्ष्य कुं

७

निपेतुर्वानराः केचित्केचिन्नैवावतस्थिरे॥ समीक्ष्य वानरान्भग्नानंगदो इदमब्रवीत्॥ संतिष्ठध्वं हि युध्यामो निवर्तध्वं
हताश्च ये॥ भग्नानां वानरेन्द्राभिप रिवज्य महीमिमा॥ स्थानं सर्वे निवर्तध्वं युध्यध्वं वानरोत्तमाः॥ निरायुधानां द्रवतां
असंगगतिचक्षुषां॥ स्त्रीणामौपयिकस्त्रासः सर्वेषां वो जघन्यजः॥ कुलेषु जाताः सर्वे स्म विस्तीर्णेषु महत्सु च॥ अनार्याः ख
लु यद्भीताः स्वकावीर्यं पलायथ॥ विकत्थितानि वो यानि गर्जितानि जनसंसदि॥ तानि चः क्व च गतानि सोदग्राणि गतानि च॥ भीरु प्र
वादाः श्रूयंते न सज्जीवति धिक्कृतः॥ मार्गं सत्पुरुषैर्जुष्टं भजध्वं मत्यज्यतां भयं॥ स्व[illegible]स्यामो वा धनिहताः पृथिव्यां व्यल्पजी
विताः॥ अवाप्स्यामो थवा कीर्तिं निहत्वा शत्रुं महाहवे॥ दुष्प्रापं ब्रह्मलोकं वा प्राप्स्यामो युधि निर्जिताः॥ न कुंभकर्णः काकुत्स्थं दृ
ष्ट्वा जीवन्गमिष्यति॥ दीप्यमानं समासाद्य पतंगो ज्वलनं यथा॥ पलायनेन स्वान्प्राणान्यदि रक्षामहे वयं॥ एकेन बहवो भ
ग्नाः यशो नो धविनंक्ष्यति॥ एवं ब्रुवंतं तं शूरं अंगदं वानरा भयात्॥ द्रवमाणास्तदा वाक्यं ऊचुः शूरविगर्हितं॥ कृत
नः कदनं घोरं कुंभकर्णेन रक्षसा॥ न स्थानकालो गच्छामो दयितं जीवितं हि नः॥ एतावदुक्त्वा प्लवगा भेजिरे
सर्वतो दिशः॥ भीमं भीमाक्षमायांतं दृष्ट्वा राक्षसमाहवे॥ द्रवमाणास्तु ते रामादंगदेन बलीयसा॥ सांत्वैश्चैवान्

र्महात्मा॥ उत्पाट्य शृंगं सहसा चलस्य जघान सुग्रीवमभिप्रमर्द्दनं॥ सशैलशृंगाभिहतो विसंज्ञः पपात भूमौ युधि वानरें
द्रः॥ तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः॥ तमभ्युपेत्याथ सुघोरकर्मा स कुंभकर्णो युधि वानरेंद्रं॥
जहार सुग्रीवमभिप्रगृह्य यथानिलो मेघमतिप्रचंडः॥ स तं महामेघनिकाय रूपमुत्पाट्य गच्छन् युधि कुंभकर्णः॥ रराज[illegible]मेघप्र
तिमानुरूपो मेरुर्यथा सुच्छ्रित घोरशृंगः॥ स तं समुत्पाट्य जगाम वीरः॥ संस्तूयमानो युधि राक्षसौघैः शृण्वन्निनादं
त्रिदिवालयानां प्लवंगराजग्रहविस्मितानां॥ ततस्तदादाय तदा समेने हरींद्रमिंद्रोपमतुल्यवीर्यं॥ यस्मिन्हृते सर्वमिदं
विनष्टं सराघवं सैन्यमितींद्रशत्रुः॥ इत्यार्षे श्रीरामायणे सुग्रीवग्रहणो नाम सर्गः॥ ॥ विद्रुतां वाहिनीं दृष्ट्वा वान
रा राणां सर्वतः॥ कुंभकर्णेन सुग्रीवं गृहीतं गृहीतं च ... पि वानरं॥ हनूमांश्चिंतयामास मतिमान्पवनात्मजः॥ एवं गृही
ते सुग्रीवे किं कार्यं वै मया भवेत्॥ यच्च न्याय्यं मया कर्त्तुं तत्करिष्यामि राक्षसं॥ मयाहते संप्रति कुंभकर्णे महाबलेमुष्टि
निपातभग्ने॥ यमोर्च्चितवानरपार्थिवेन भवंतु हृष्टाः प्लवगाः समग्राः॥ अथवा स्वयमेवैष मोक्षं प्राप्स्यति पार्थिवः॥ गृ

हीतोयद्यपि भवेत्त्रिदशैः सुमहोरगैः॥ मन्ये न तावदात्मानं बुध्यते वानराधिपः॥ शैलप्रहाराभिहतः कुंभकर्णेन संयुगे॥ अ
यं मुहूर्तात्सुग्रीवो लब्धसंज्ञो महाहवे॥ आत्मनो वानराणां च यत्पथ्यं तद्भविष्यति॥ मया विमोक्षितश्चास्य सुग्रीवस्य
महात्मनः॥ अप्रीतिश्च भवेत्कष्टा कीर्त्तिनाशश्च शाश्वतः॥ तस्मान्मुहूर्त्तं कांक्षिष्ये विक्रमं पार्थिवस्य हि॥ वानराश्चापि सं
त्रस्ताः जग्मुः सर्वा दिशस्तथा॥ केचित्संविग्नमनसः चिंतयंतो हितं परं॥ एतस्मिन्नंतरे वीरो हनूमान्प्लवतां वरो॥ कृत्वं
कृत्वात्मनो रूपं सुग्रीवहितकाम्यया॥ भिन्नं च वानरानीकं तावदाश्वासयाम्यहं॥ एवं संचिंतयित्वा तु हनूमान्मारुतात्मजः॥
भूयः संस्तंभयामास वानराणां तदा चमूं॥ स कुंभकर्णोथ विवेश लंकां स्फुरंतमादाय महाहरीन्द्रं॥ विमानचर्या गृहगोपुरस्थै
र्माल्याग्रवर्षैरवकीर्यमाणः॥ ततः स संज्ञां प्रतिलभ्य कृच्छ्रात् बलीयसस्तुल्यभुजांतरस्थः॥ अवेक्षमाणः पुरराजमा
र्गं विचिंतयामास मुहुर्महात्मा॥ एवं गृहीतेन कथं नु नाम शक्यं मया संप्रति कर्त्तुमद्य॥ तथा करिष्यामि यथा हरीणां भविष्य
तीष्टं मम चैव पथ्यं॥ ततः कराग्रैः सहसा समेत्य राजा हरीणां स सुरेंद्रशत्रोः॥ चकर्त्त कर्णौ दशनैश्च नासां ददार पार्श्वेषु च कुंभक
र्णं॥ स कुंभकर्णो हृतकर्णनासो विस्रंभवद्रुदनयार्द्दितश्च॥ रोषाभिभूतः क्षितजार्द्रगात्रो सुग्रीवसुग्रीवमाविध्य

पिपेषभूमौ ॥ सभूतले भूरिबलेन पिष्टः सुरारिभिस्तैरभिहन्यमानः ॥ जगाम खं वेगवदभ्युपेत्य पुनश्च रामं स समाजगाम ॥ इ
त्यार्षे श्रीरामायणे युद्धकांडे कुंभकर्णनासाविकर्त्तनो नाम सर्गः ॥ कर्णनासाविहीनस्तु कुंभकर्णो महाबलः ॥ रराज
शोणितोत्सिक्तो गिरिः प्रस्रवणैरिव ॥ पुनः स पुर्याः सहसा महात्मा निष्क्रम्य तद्वानरसैन्यमुग्रं ॥ अक्षोभयन् क्रोधवि
चित्रनेत्रः प्रजायुगांताग्निरिव प्रदीप्तः ॥ बुभुक्षितः शोणितमांसगंधी प्रविश्य तद्वानरसैन्यमाशु ॥ चखाद रक्षः स
हसा न पिंगान् ऋक्षांश्च मोहाद्युधि कुंभकर्णः ॥ एकं द्वौ त्रीन् बहूंश्चापि वानरान् राक्षसैः सह ॥ समादाय एकहस्ते
न मुखे प्राक्षिपत स्म सः ॥ मुखान् प्रस्रुतमेदोऽसृक् घोररूपः स राक्षसः ॥ वर्धमानो गिरींद्राभो भक्षयामास वी
र्यवान् ॥ स चापमादाय भुजंगकल्पं दृढज्यमुग्रं तपनीयचित्रं ॥ तं वेध्यमानाहरयो रामं जग्मुस्तदा गतिं ॥ हरीन् समा
श्वास्य समुत्पपात रामोऽथ वध्योत्तमतूणपाणिः ॥ स वानराणां सैन्ये तैस्तुलः परपुरंजयः ॥ लक्ष्मणानुचरो रामः संप्र
तस्थे महाबलः ॥ पुनस्तं राघवस्यार्थे गदापाणिर्विभीषणः ॥ अभिदुद्राव वेगेन भ्राता भ्रातरमाहवे ॥ विभी

भकर्णं महाबलं ॥ उत्पपात ततो वीरः सुग्रीवो वानरोत्तमः ॥ स शालवृक्षं सहसा समाविध्य महाकपिः ॥ अभिदुद्राव वेगेन कुंभकर्णं म
हाबलं ॥ तमापतंतं संप्रेक्ष्य कुंभकर्णो महाबलः ॥ तस्थौ विधृतसर्वांगो वानरेंद्रस्य सन्मुखः ॥ कपिशोणितदिग्धांगं भक्षयंतं महाहरी
न् ॥ कुंभकर्णं स्थितं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत् ॥ निहताः कपिशार्दूलाः कृतं कर्म सुदुष्करं ॥ भक्षितानि च सैन्यानि प्राप्तं ते परमं
यशः ॥ त्यजैतान् वानरान् सर्वान् किमेभिस्त्वं निरुध्यसे ॥ सहस्वैकं निपातं मे शालवृक्षस्य राक्षस ॥ तद्वाक्यं हरिराजस्य सत्त्व
धैर्यसमन्वितं ॥ श्रुत्वा राक्षसशार्दूलः कुंभकर्णोऽब्रवीद्वचः ॥ श्रुतः पौरुषसंपन्नः कस्माद्गर्जसि वानर ॥ कर्मणा दर्शयात्मानं यावत्त्वां
प्रमथाम्यहं ॥ स कुंभकर्णस्य वचो निशम्य व्याक्षिप्तकोपः स्वयमुग्रवीर्यः ॥ तेनाजघानोरसि कुंभकर्णं वृक्षेण कालानलसन्नि
भेन ॥ स शालवृक्षः सहसा च भग्नः भुजांतरे तस्य तदा निमग्नः ॥ ततो विनेदुः सहसा प्लवंगमाः रक्षोगणश्चापि मुदा निनेदुः ॥
स शालवृक्षाहितश्चुकोप जहास चैवाथ विवृत्तवक्त्रः ॥ आविध्य शूलं च तडित्प्रकाशं चिक्षेप हर्यृक्षपतेर्वधाय ॥ तं कुंभकर्ण
स्य भुजप्रवृत्तं शूलं शितं कांचनवज्रजुष्टं ॥ क्षिप्रं समुत्पत्य निगृह्य दोर्भ्यां बभंज चारं त्वरसा बलेन ॥ कृत्वा भारसहस्र
शूलं कालायसं दृढं ॥ बभंज जानुनारोप्य प्रहृष्टः प्लवंगमः ॥ स तत्तदा भग्नमवेक्ष्य शूलं चुकोप रक्षोऽधिपति

तोनैऋतर्षभः॥ अभ्यव्यमाणस्तं शब्दं अभिदुद्राव राघवं॥ तस्मिन् काले सुमित्रायाः पुत्रः परबलार्दनः॥ चकार लक्ष्मणः प्रादुरस्त्रमस्त्रविदां
वरः॥ स कुंभकर्णस्य शरान् शरीरे सप्त वीर्यवान्॥ निचखान ददे बाणान्यान् विससर्ज स लक्ष्मणः॥ अतिक्रम्य स सौमित्रिं कुंभकर्णो महा
वा बलः॥ राममेवाभिदुद्राव कंपयन्निव मेदिनीं॥ ततस्तु वात्तोथितवन्हिकल्पं भुजंगराजोपमदीर्घबाहुं॥ समीपतस्तं धरणीधराभं प्रोवाच
रामो युधि कुंभकर्णं॥ आगच्छ रक्षोधिप मत्समीपं अयं स्थितोहं प्रगृहीतचापः॥ उपेहि मां मृत्युमुपास्थितं स्थिरस्त्वेनो मुहूर्तात् भविता वि
नाय॥ रामोयमिति विज्ञाय जहास स विकृतस्वनं॥ पाट्यन्निव सर्वेषां हृदयानि वनौकसां॥ प्रहस्य विकृतं भीमं स मेघस्तनितो
पमं॥ कुंभकर्णो महातेजा राघवं वाक्यमब्रवीत्॥ नाहं विराधो विज्ञेयो न कबंधः खरो न च॥ न वाली न च मारीचः कुंभकर्णम
वेहि मां॥ पश्य मे मुद्गरं घोरं सर्वकालायसं दृढं॥ अनेन निर्जिता देवा दानवाश्च पुरा मया॥ शक्रश्चापि निर्जितो राम न त्वाहं च स्वयं
भुवः॥ विकर्णनासो भातिमां नावज्ञातुं त्वमर्हसि॥ अल्पापि हि न मे पीडा कर्णनासाविनाशने॥ दर्शयेक्ष्वाकुशार्दूल वी
र्यं गात्रेषु मे लघु॥ ततस्त्वां भक्षयिष्यामि दृष्टपौरुषविक्रमं॥ स कुंभकर्णस्य वचो निशम्य रामः सपुंखान् विससर्ज बाणान्॥
तैराहतो वज्रसमप्रभावैर्न चक्षुभे संयति कुंभकर्णः॥ यैः सायकैः सालवरा निकृत्ता वाली हतो राक्षसपुंगवाश्च॥ ते कुं
भकर्णस्य तदा शरीरे वज्रोपमा न व्यथयांबभूवुः॥ सवारिधारा इव सायकांस्तान् विधून् शरीरेण महेंद्रशत्रुः॥ जघान त

के रामशरप्रवेगं संविध्यतं मुद्गरमुग्रवेगं॥ वित्रासयामास रघुप्रवीरं॥ अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन्॥ कुंभकर्णो
स्य हृदये निचखान शितान् शरान्॥ तस्य रामेण विद्धस्य सहसा विनिधावतः॥ अंगारमिश्राः क्रुद्धस्य मुखान् निः
श्चेरुरर्चिषः॥ तस्योरसि निमग्नास्ते शरा बर्हिणः॥ हृदयं पीडयामासुः क्रोधमुक्ता महात्मना॥ हस्ताच्चास्य परिभ्र
ष्टः पपातोर्व्यां महायुधः॥ स निरायुधमात्मानं यदामेने महाबलः॥ मुष्टिभ्यां चरणाभ्यां च चकार कदनं महत्॥ स बाणैरति
विद्धांगः क्षतजेन समुक्षितः॥ रुधिरं परिसुस्राव गिरिः प्रस्रवणैरिव॥ स तीव्रेण च कोपेन रुधिरेण समुक्षितः॥ वानरा
न्राक्षसांश्चैव खादन् विपरिधावति॥ तस्मिन् काले तु धर्मात्मा लक्ष्मणो वाक्यमब्रवीत्॥ कुंभकर्णवधे युक्तो योगान् परिमृ
शन् बहून्॥ नैवायं वानरान् खादन् न च जानाति राक्षसान्॥ मत्तः शोणितगंधेन स्वान् परांश्चैव खादति॥ साध्वेनमधिरो
हंतु सर्वथा वानरर्षभाः॥ यूथपाश्च यथामुख्यास्तिष्ठंत्वस्य समीपतः॥ अप्ययं दुर्मतिः काले गुरुं भारमपानयन्॥ प्रपते
द्राक्षसो भूमौ न च हन्यात् प्लवंगमान्॥ तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः॥ गजो गवाक्षो गवयः शरभो गंधमादनः॥
नीलश्च कुमुदश्चैव जांबुवानंगदस्तथा॥ ते समारुरुहुर्हृष्टाः कुंभकर्णं प्लवंगमाः॥ कुंभकर्णस्तु संक्रुद्धः समारूढं प्लव

गमैः ॥ विधून्वयस्तांश्चैवयेन दुष्टहस्तीव हस्तिपान् ॥ तान्दृष्ट्वा निहितान् रामो रोषीत वानरयूथपान् ॥ शालामहानुभावंतंदिव्याण्य
स्त्राणिसंदधे ॥ वायव्यमाहूयततोमहास्त्रं रामः प्रचिक्षेपनिशाचराय ॥ समुद्गरं तेनजहारबाहुं सकृत्तबाहुस्तुमुलंननाद ॥ स
वृक्षबाहुर्गिरिशृंगतुल्यः समुद्गरोराघववाणकृत्तः ॥ पपात तस्मिन्हरिसैन्यमध्ये जघानतां वानरवाहिनीं च ॥ ते वानराभग्नहता
वशेषाः पर्यंतमाश्रित्य भयादसन्नाः ॥ प्रवेपितांगा ददृशुः सुघोरं नरेंद्ररक्षोधिपसन्निपातं ॥ सकुंभकर्णोस्त्रनिकृत्तबाहुर्नस्थान
ह्रस्थाणुरिवाचलेंद्रः ॥ उत्पाटयामासकरेणवृक्षं ततोभिदुद्राव रणेनरेंद्रं ॥ ततोस्यबाहुं सहशालवृक्षं समुद्यतं पन्नगकल्पं ॥
ऐंद्रास्त्रमुक्तेनजहाररामः शरेण जांबूनदभूषितेन ॥ सकुंभकर्णस्य भुजोन्यकृत्तःपतन्निवाहिःपततेंद्रमुक्तः ॥ सचेष्टमानोभि
अघानतत्र शैलान् शिलाराक्षसवानरेंद्रान् ॥ समापतंतं सहसोन्नदंतं ततोर्धचंद्रं निशितं गृहीत्वा ॥ चिच्छेदपादौ युधिराक्षसस्य सकृ
त्तबाहुर्बाहुर्विनिकृत्तपादो ॥ विवृत्य वक्त्रं वडवामुखाभं दुद्राव राममसहसाभिगर्जन् ॥ राहुर्यथा चंद्रमसांतरिक्षे ॥ आपूरयन्
स्य मुखं शिताग्रैः रामः शरैर्हेमपिनद्धपुंखैः ॥ नपूर्णवक्त्रो नशशाकवक्तुं चुकूज कृच्छ्रेण मुमोह चापि ॥
अथाददे सूर्यमरीचिकल्पं सब्रह्मदंडांतककालकल्पं ॥ अरिघ्नमैंद्रं निशितं सपुंखं रामः शरं मारुततुल्यवेगं अवारणीय

वर्णं पुनर्दृष्ट्वा कुंभकर्णोब्रवीदिदं ॥ प्रहरस्व रणे शीघ्रं क्षत्रधर्मे स्थितो भवान् ॥ भ्रातृस्नेहं परित्यज्य राघवस्य प्रियं कुरु ॥ अस्मत्का
र्यं कृतं वत्स यत्त्वं राममुपागतः ॥ त्वमेको राक्षसांल्लोके सत्यधर्माभिरक्षणः ॥ नास्ति धर्माभिसक्तानां व्यसनं तु कदाचन ॥ संताना
र्थं त्वमेवैकः कुलस्यास्य भविष्यसि ॥ राघवस्य प्रसादात्त्वं रक्षसां राज्यमाप्स्यसि ॥ अरुसामपि दुर्धर्षः शीघ्रं मार्गादपाक्रम ॥ न
स्थातव्यं पुरस्तान्मे संभ्रमान्नष्टचेतसः ॥ नवेद्मि संख्ये स्वान्परान्वा निशाचरान् ॥ रक्षणीयोसि मे वत्स सत्यमेतद्ब्रवीमि ते ॥
एवमुक्तो वचस्तेन कुंभकर्णेन धीमता ॥ बिभीषणो महाबाहुः कुंभकर्णमुवाच ह ॥ गदितं मे कुलस्यास्य रक्षणार्थे अरिंदम ॥ नकृ
तं सर्वरक्षोभिस्ततोहं राममागतः ॥ तत्क्षंतव्यं च भवता सुकृतं दुष्कृतं तु वा ॥ एवमुक्त्वाश्रुपूर्णाक्षो गदापाणिर्बिभीषणः ॥ ए
कांतमाश्रितो भूत्वा चिंतयामास तत्र स्थितः ॥ ददर्श स महात्मानं किरीटिनमवस्थितं ॥ शोणिताप्लुतसर्वांगं कुंभकर्णं महाबलं ॥
सर्वान्समभिधावंतं यथा दुष्टं महागजं ॥ मार्गमाणं हरीन्क्रुद्धं राक्षसैः परिवर्जितं ॥ विंध्यमंदरसंकाशं कांचनांगदभूषितं ॥
स्रवंतं रुधिरं गात्रात् भयं मूर्तमिवोत्थितं ॥ लिलेहानंजकयावकृत्रातुत्रोणितं शोणिताक्षितं ॥ मर्दंतं वानरान् संख्ये कालांतक
यमोपमं ॥ तं दृष्ट्वा राक्षसश्रेष्ठं प्रदीप्तानलवर्चसं ॥ विस्फारयामास तदा कार्मुकं पुरुषर्षभः ॥ स ततस्य चापनिर्घोषात् कुपि

चभूमौ निपतितं दृष्ट्वा विक्षिप्तमभूषणं॥ बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः॥ तेविषण्णमुखा दीना प्रहारा जनितश्र
माः॥ विनेदुरुच्चैर्बहवः सहसा विस्वरैः स्वरैः॥ स चातिकायो हिमवत्प्रकाशो रक्षः पतिस्तोयनिधेः समीपे॥ ग्राहान्महामी
नवरान्भुजंगान् संक्षोभ्य भूमौ च तदा पपात॥ तस्मिन्हते ब्राह्मणदेवशत्रौ महाबले संयति कुंभकर्णे॥ चचाल भूर्भूमिधराश्च
सर्वे हर्षाच्च देवाः प्रसभं विनेदुः॥ हर्षेण युक्ता बहवश्च वानराः प्रबुद्धपद्मप्रतिमैरिवाननैः॥ अपूजयन्राघवमिष्टभागिनं हतेरि
पौ भीमबले दुरासदे॥ स कुंभकर्णं सुरसंघमुत्तमं महत्सु युद्धेष्वजितं कदाचन॥ ननंद हत्वा भरताग्रजो रणे महासुरं वृत्रमिवा
मराधिपः॥ इत्यार्षे रामायणे युद्धकांडे कुंभकर्णवधो नाम सर्गः॥ ॥कुंभकर्णं हतं श्रुत्वा राघवेण महात्मना॥ राक्षसा राक्षसेंद्रा
य रावणाय न्यवेदयन्॥ स श्रुत्वा निहतं संख्ये कुंभकर्णं महाबलं॥ रावणः शोकसंतप्तो मुमोह च पपात च॥ पितृव्यं पतितं दृष्ट्वा दे
वांतकनरांतकौ॥ त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः॥ भ्रातरं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा॥ महोदरमहापा
र्श्वौ शोकाक्रांतौ बभूवतुः॥ ततः कृच्छ्रात्समासाद्य संज्ञां राक्षसपुंगवः॥ कुंभकर्णवधाद्दीनो विललाप स रावणः॥ हा रिपुद वीर
र्पघ्न कुंभकर्ण महाबल॥ शत्रुसैन्यं प्रताप्यैकः धुर्मां संत्यज्य गच्छसि॥ इदानीं खल्वहं नास्मि यस्य मे पतितो भुजः॥ दक्षि

णो यं समाश्रित्य न बिभेमि सुरासुरान्॥ कथमेवंविधो नाम देवदानवदर्पहा॥ कालाग्निप्रतिमः राघवेणासि पातितः॥ नन्वतव
ज्रनिष्पेषनाकुर्वं भ्रव्यथां कदा॥ स कथं रामबाणार्तः प्रसुप्तोसि महीतले॥ एते देवगणाः सार्धं ऋषिभिर्गगनेस्थिताः॥ रा
मघवं दृष्ट्वा नंदंति रामेणाभिहतः शरैः॥ ध्रुवमेवं च तोराजा प्रभवः प्रतिभाति मे॥ येन त्वं कालसदृशो योजितः कालकर्म
णा॥ त्वां भ्रमोपगतं दृष्ट्वा भयद्वाकारणोत्सुकाः॥ ध्रुवमद्य प्रहृष्टास्ते ऊर्ध्वलक्षाः प्लवंगमाः॥ समारोक्ष्यंति दुर्गाणि लंकाद्वा
राणि सर्वशः॥ राघवे नास्ति मे कृत्यं किं करिष्यामि सीतया॥ कुंभकर्णविहीनस्य जीवितेनास्ति मे स्पृहा॥ यद्यहं भ्रातृहंतारं
न हन्मि युधि राघवं॥ ननु मे मरणं श्रेयो न चेदं व्यर्थजीवितं॥ अद्यैव तं गमिष्यामि देशं यत्रानुजो मम॥ नहि भ्रातृन्परित्य
णः क्षणं जीवितुमुत्सहे॥ देवा मां विहसिष्यंति दृष्ट्वा पूर्वापकारिणं॥ कथमिंद्रं विजेष्यामि कुंभकर्ण हते त्वयि॥ तदिदं मामनु
प्राप्तं विभीषणवचः शुभं॥ यदज्ञानान्मया तस्य न गृहीतं महात्मनः॥ विभीषणाभिशापोयं कुंभकर्णप्रहस्तयोः॥ विनाशोयं स
मुत्पन्नो मां पीडयति दारुणः॥ तस्यायं कर्मणः प्राप्तो विपाको मम शोकदः॥ यन्मया धार्मिकः श्रीमान् स निरस्तो विभीषणः॥ एवं वि
लप्यमानस्य रावणस्य दुरात्मनः॥ श्रुत्वा शोकाभिसंतप्तस्त्रिशिरा वाक्यमब्रवीत्॥ एवमेतन्महासत्त्व न श्रुतं यद्विभीषणात्॥ ननु स

वाल्मीकरा
पुरुषाघ्रं विलपंतं यथा भवान्॥ ननु त्रिभुवनस्यापि पर्याप्तस्त्वं विनिग्रहे॥ स कथं प्राकृत इव शोचस्यात्मानमीश्वर॥ ब्रह्मदत्ता मायणयुधकां ड
९३ स्तिते शक्तिः कवचं सायकौ धनुः॥ सहस्रखरसंयुक्तश्च रथो मे घननिस्वनः॥ तदा त्वया विशस्त्रेण विशस्ता देवदानवाः॥ स
सर्वायुधसंपन्नो राघवं हंतुमिच्छसि॥ कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणे॥ उद्धरिष्यामि ते शत्रून् गरुडः पन्नगं यथा॥ शंब
रो देवराजेन नरको विष्णुना यथा॥ तथा घत्रायितारामो मयायुधि विनिर्जितः॥ श्रुत्वा त्रिशिरसो वाक्यं देवांतकनरांतको॥ अ
तिकायश्च तेजस्वी बभूवुर्युद्धकांक्षिणः॥ ततो हर्षसमाविष्टा जगर्जुस्ते नर्षभाः॥ रावणस्य सुता वीराः शक्रतुल्यपराक्र
तुल्यपराक्रमाः॥ अंतरिक्षचराः सर्वे सर्वे मायाविशारदाः॥ सर्वे त्रिदशदर्पघ्नाः सर्वे संग्रामकांक्षिणः॥ सर्वे तु बलसंपन्ना
सर्वे विपुलकीर्तयः॥ सर्वे समरमासाद्य न श्रूयंते स्म निर्जिताः॥ स तैः सदा भास्कररश्मिसन्निभैः सुतैर्वृतः शत्रुबलाभिम
र्दनैः॥ रराज राजा मघवान् यथामरैः वृतो महादानवदर्पनाशनैः॥ इति श्रीरामायणे रावणपरिदेवनो नाम सर्गः॥ स पुत्रा
न् संपरिष्वज्य भूषयित्वा विभूषणैः॥ आशीर्भिश्च प्रशस्ताभिः प्रेषयामास संयुगे॥ महोदरमहापार्श्वौ भ्रातरौ चापि रा ९५
वणः॥ रक्षणार्थं कुमाराणां प्रेषयामास संयुगे॥ तेऽभिवाद्य महात्मानं रावणं राक्षसेश्वरं॥ कृत्वा प्रदक्षिणं स

विशिखं वीर्यवंतं महाबलं॥ भयंकरममित्राणां शात्रूणां हर्षवर्धनं॥ तं कार्मुके समाधाय विकृष्य च महाबलः
॥ ससर्ज कुंभकर्णस्य वधाय रघुनंदनः॥ दिव्यं मघवता दत्तं ज्वलंतमिव तेजसा॥ आनिसृष्टो बलवता रामेण
निशितैः शरैः॥ कुंभकर्णस्य हृदयं भित्वा धरणिमाविशत्॥ अथान्यत्केशरं चान्यं दिव्यं निशाभिरक्षितं॥ तं व
ज्रजांबूनदैः चारुपुंखं प्रदीप्तसूर्यज्वलनप्रकाशं॥ महेंद्रवज्राशनितुल्यवेगं रामः प्रचिक्षेप निशाचराय॥
स सायको राघवबाहुविच्युतो दिशः स्वभासा दशविप्रकाशयन्॥ विधूमवैश्वानरतुल्यदर्शनो जगाम
शक्राशनितुल्यवेगः॥ स तं महाकूटगिरींद्रसन्निभं विवृत्तदंष्ट्रोज्ज्वलचारुभूषणं॥ चकर्त रक्षोधिप
तेः शिरस्तदा यथैव वृत्रस्य पुरा पुरंदरः॥ तद्रामबाणाभिहतं पपात रक्षःशिरः पर्वतसन्निकाशं॥ बभंज चर्यागृ
हगोपुराणि प्राकारकाद्युच्चयांश्च तत्र॥ पतितो वानराः सर्वे व्यनदन् राक्षसे हते॥ वानराणां सहस्राणि का
येनाभिन्यपोथयत्॥ संप्राकं पतस्तं कायात् प्राकारतोरणानि च॥ तस्मिन्निपतिते भूमौ चुक्षुभे च महोदधिः॥ तं

वान्॥ विरराज गदापाणिः कुबेर इव संयुगे॥ ते प्रतस्थुर्महात्मानो बलैरप्रतिमैर्वृताः॥ सुरा इवामरावत्यां बभूवुर्युधि दर्पिताः॥ तान्
गजैश्च तुरगैश्च रथैश्चांबुदनिःस्वनैः॥ अनुजग्मुर्महात्मानो राक्षसप्रवरायुधि॥ ते विरेजुर्महात्मानो राक्षसप्रवरायुधि॥ ते वि
रेजुर्महात्मानः कुमाराः सूर्यवर्चसः॥ किरीटिनः श्रियायुक्ताः सप्तर्षय इवांबरे॥ मरणं चैव निश्चित्य शत्रूणां वा पराजयः॥ इ
ति कृत्वा महावीरा निर्जग्मुः संयुगार्थिनः॥ जगर्जुश्चापि नेदुश्च चिक्षिपुश्चापि राक्षसाः॥ जहर्षुश्च दुरात्मानो दद्दर्फ
नैर्ऋतं बलं॥ हर्येश्च रथसंबाधं किंकिणीशतनादितं॥ नीलजीमूतसंकाशैः समुद्यतशिलायुधैः॥ दीप्तानलरवि
प्रख्यैर्नैर्ऋतैः सर्वतोवृतं॥ तं दृष्ट्वा बलमायांतं लब्धलक्ष्याः प्लवंगमाः॥ क्रुद्धा राक्षससैन्येषु चेरुर्द्रुमशिलायुधाः
ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनुत्तमां॥ बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः॥ शिखरैः शिखरा भास्ते यातुधानाः
प्लवंगमाः॥ निजघ्नुः समरे बाणैर्वानरान् पि राक्षसाः॥ केचिद्रथगतांश्चैव गजवाजिगतानपि॥ निजघ्नुः सहसा प्रेत्य यातु
धानान् प्लवंगमाः॥ शैलशृंगाविभिन्नांगा मुष्टिभिर्वांतलोचनाः॥ चेलुः पेतुश्च नेदुश्च ततो राक्षसपुंगवाः॥ ततः शूलैश्च वृ
क्षैश्च निसृष्टैर्हरिराक्षसैः॥ मुहूर्तेनावृता भूमिरभवच्छोणिताप्लुता॥ विकीर्णाः पर्वताकारैः रक्षोभिरुपमर्दितैः॥ आ

क्षिप्ताः क्षिप्यमाणाश्च भग्नपार्श्वाश्च वानराः॥ वानरं वानरेणैव जघ्नुर्घोरा निशाचराः॥ राक्षसं राक्षसेनैव पिपिषुर्वानरा युधि॥ आ
क्षिप्य च शिला जघ्नू राक्षसा वानरा युधि॥ तेषामाच्छिद्य गात्राणि जघ्नुस्तानपि वानराः॥ निजघ्नुः शैलशिखरैरभिदुश्च प
रस्परं॥ सिंहनादं विनेदुश्च रणे राक्षसवानराः॥ छिन्नमर्मतनुत्राणा राक्षसा वानरैर्हताः॥ सुस्राव रुधिरं तेभ्यः सरितः पर्वतादिव
॥ रथेन रथिनं वापि राक्षसं राक्षसेन च॥ हयेन च हयं केचित् निपिपीषुस्ते वलीमुखाः॥ तस्मिंस्तथा निर्भरसंप्रवृत्ते कोलाहले राक्ष
सराजधान्यां॥ संहृष्यमाणेषु च वानरेषु निपात्यमानेषु च राक्षसेषु॥ प्रधमानेषु महारथेषु महर्षयो भूतगणाश्च नेदुः॥ ते
वाजिसंघैर्हरयः प्रहृष्टा विनेदुरावेडितसिंहनादैः॥ ततो हयं मारुततुल्यवेगं आरुह्य शक्तिं निशितां प्रगृह्य॥ नरांतको
वानरराजसैन्यं विवेश मानः स यथार्णवाभं॥ स वानरान् सप्तशतानि वीरः प्रासेन दीप्तेन विनिर्बिभेद॥ एकक्षणेनेंद्ररिपु
र्महात्मा जघान सैन्यं हरिपुंगवानां॥ ददृशुश्च महात्मानं हयपृष्ठे प्रतिष्ठितं॥ चरंतं हरिसैन्येषु भूतविद्याधरर्षभाः॥
तेनेनस्य ददृशे मार्गो मांसशोणितकर्दमः॥ पतितैः पर्वताकारैर्वानरैरभितः सर्वतः॥ यावद्विक्रमितुं चक्रुर्बुद्धिं प्लव
गपुंगवाः॥ तावदेतानतिक्रम्य निर्बिभेद नरांतकः॥ धावमानान् कपीन् सर्वान् प्रासमुद्यम्य सोऽभ्युधावति॥ सर्वा

७५

प्रासभृत्सोनुधावति ॥ स वायुरिक्षुवलवान् प्रावीच यथानिलः ॥ गतोयतः सदहश्चेप्रासपाणिर्नरांतकः ॥ ततः स्ततश्चम
र्य्यंते कालो यत्र वानराः ॥ ज्वलंतं प्रासमुद्यम्य संग्रामांतेन रांतकः ॥ ददाह सैन्यानि कानननानि यथानलः ॥ यावदुत्पाटय
मासुः शैलान्वृक्षांश्च वानराः ॥ तावत्प्रासहताः सर्वे वज्राक्रांता इवाचलाः ॥ नरांकुश्चलितं वीरः नेस्थातुं नस्थातुं नचसा
दितु ॥ स्थितं चैवोत्पतंतंच सचहंति महाबलः ॥ एके नांतक कल्पेन प्रासेनादित्यवर्चसा ॥ भिन्नानि हरिसैन्यानि निपेतुर्धर
दितु ॥ वज्रनिर्घोषसंनादं प्रासस्य विनिपातनं ॥ नरांकुर्जनिराः सोढुं विनेदुश्च महाबलवान् ॥ पततां हरिवीराणां रूपा च
णि लिले ॥ वज्रनिर्घोषनिर्नादं प्रासस्य विनिपातनं ॥ येन सर्वं महात्मानः कुंभकर्णेन पातिताः ॥ नेत्र लावानरश्रेष्ठाः सु
णिग्रचकारिरे । विद्युदग्नाग्रकूटानां शैलानांपतनामिव ॥ नरांतकभयत्रस्तां विद्रवंतीं निरस्ततः ॥ विद्रुतांवाहिनीं दृष्ट्वा सद
ग्रीवंपर्युपासते ॥ विचेष्टमानां सुग्रीवोददर्शहरियाहिनीं ॥ कुमारमंगदंवीरं शक्रतुल्य
ददर्श निरांतकं ॥ प्रासपाणिनमायांतं हयपृष्ठेन दर्पितं ॥ अथोवाच महातेजाः सुग्रीवो हरिपुंगवः ॥
पराक्रमं ॥ गच्छैनं राक्षसं वीरं घोरं तुरगमास्थितं ॥ क्षोभयंतं हि सैन्यानि क्षिप्रं प्राणैर्वियोजय ॥ सतुभर्तुर्वचः श्रुत्वा निपपात
गदः सदा ॥ अनीकान्मेघसंकाशान् मेघानीको दिवाकरः ॥ शैलसंघातसंकाशान् हरीणामुत्तमोंगदः ॥ रराजांगदनश्चु ७८
नः सधातुरिवपर्वतः ॥ निरायुधो महातेजाः केवलं नखदंष्ट्रवान् ॥ नरांतकमुपागम्य वालिसूनुरुवाच ह ॥ तिष्ठ किं प्राकृतै

र्वैर्महाकायाः प्रतारथिरे ॥ महौषधीभिर्मैत्रैश्च समाविष्टा महाबलाः ॥ निर्जग्मुर्नैर्ऋता व्याघ्रा युद्धानतायुध्यकांक्षिणः ॥ ततः सुदर्शनं
नागं नीलजीमूतसंनिभं ॥ ऐरावतकुले जातं आरुरोह महोदरः ॥ हयोत्तमसमायुक्तं सर्वायुधसमन्वितं ॥ आरुरोहरथ
श्रेष्ठं त्रिशिरा रावणात्मजः ॥ त्रिशिरा रथमास्थाय विरराज धनुर्धरः ॥ सविद्युदुल्कः सज्वालः सेंद्रचापइवांबुदः ॥ त्रिभिः
किरीटैः त्रिशिराः शुशुभे स रथोत्तमे ॥ हिमवानिव शैलेंद्रः त्रिभिः कांचनपर्वतैः ॥ अतिकायोतितेजस्वी राक्षसेंद्रसुतस्त
दा ॥ आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मतां ॥ सुचक्राक्षं सुसंयुक्तं सानुकर्षं सकूबरं ॥ सतूणबाणसंयुक्तं प्रासासिपरिघा
कुलं ॥ सर्वकांचनचित्रेण किरीटेन विराजता ॥ भूषणैश्च बभौ चारुः प्रभाभिरिव भास्करः ॥ सविरराज बभौ येतस्मिन्रजस
नुर्महाबलः ॥ वृतो नैर्ऋतशार्दूलैः वज्रपाणिरिवामरैः ॥ हयमुच्चैःश्रवःप्रख्यं श्वेतं कनकभूषणं ॥ मनोजवं महा
कायं आरुरोह नरांतकः ॥ प्रासमुत्क्षिप्य निर्भंगं हर्षाद्विरराज नरांतकः ॥ शक्तिमादाय तेजस्वी गुहः शक्तिरिवाबभौ ॥ दे वर्णर्भु रवहंय
वांतकः समादाय परिघं वज्ररूपिणं ॥ भुजैर्मुद्गरमुत्पाट्य बभौ विष्णुरिवाहवे ॥ महापार्श्वो महातेजा रथमारुरोह वीर्य

मनः प्रहर्षणं ॥ अन्यैः सुदुष्करं ततस्तवांश्च कर्म ॥ विस्मितस्समये येन स भीमविक्रमः पुनश्च युद्धाय मनो दधे तदा ॥
इत्यार्षे रामायणे नरांतकवधो नाम सर्गः ॥ ॥ नरांतकवधं श्रुत्वा ययुस्ते नैर्ऋतर्षभाः ॥ देवांतकस्त्रिमूर्धा च पौलस्त्यश्च
महोदरः ॥ आरूढो मेरुसंकाशं वारणेंद्रं महोदरः ॥ वालिपुत्रं महावीर्यं अभिदुद्राव वीर्यवान् ॥ भ्रातृव्यसनसंतप्तस्त
था देवांतको बली ॥ आदाय परिघं घोरं अंगदं समभिद्रवे ॥ रथमादित्यसंकाशं युक्तं परिघवाजिभिः ॥ आस्थाय त्रिश
राश्चापि वालिपुत्रमुपाद्रवत् ॥ स त्रिभिर्मेरुसंकाशैर्नैर्ऋतेंद्रैरभिद्रुतः ॥ महाविटपमासाद्य शालमुत्पाट्य वीर्यवान् ॥
देवांतकाय तं वीरः श्चिक्षेप वलवद्बली ॥ महावृक्षं महाशाखं शक्रो दीप्तमिवाशनिं ॥ त्रिशिरास्तं तु चिच्छेद
शरैराशीविषोपमैः ॥ वृक्षं निकृत्तमालोक्य उत्पपात तदांगदः ॥ स ववर्ष ततो वृक्षान् शिलाश्च कपिकुंज
रः ॥ तं प्राविच्छेद संक्रुद्धस्त्रिशिरा निशितैः शरैः ॥ परिघाग्रेण तान् वृक्षान् बभंज स सुरांतकः ॥ त्रिशिरा
स्त्वंगदं वीरमभिदुद्राव सायकैः ॥ गजेन समभिद्रुत्य वालिपुत्रं महोदरः ॥ आजघानोरसि क्रुद्धस्तो

मरैर्वज्रसंनिभैः ॥ देवांतकश्च संक्रुद्ध परिघेन तदांगदं ॥ उपगम्याभिहत्वा च मुहुर्मुहुरुपागमत् ॥ स त्रि
भिर्नैर्ऋतश्रेष्ठैर्युगपत्समभिद्रुतः ॥ न विव्याथ महातेजा वालिपुत्रः प्रतापवान् ॥ तलेन गजमुत्पत्य
जघान गजमंगदः ॥ पेततुस्तस्य तेनेत्रे ननाद स वानरः ॥ विषाणं चास्य निष्कृष्य वालिपुत्रो महाबलः
॥ देवांतकमभिद्रुत्य संजघान तथोरसि ॥ स विह्वलितसर्वांगो वातोद्धूत इव द्रुमः ॥ लाक्षारससवर्णं तु सु
स्राव रुधिरं मुखात् ॥ अथागम्य महातेजाः कृच्छ्राद्देवांतको बली ॥ आविध्य परिघं वेगात् आजघान तथां
गदं ॥ परिघाभिहतश्चापि वानरेंद्रात्मजस्तदा ॥ जानुभ्यां पतितो भूमौ पुनरुत्पुप्लुवे च ॥ तं चोपनत
त्रिशिराः शरैराशीविषोपमैः ॥ वाणैर्हरिपतेः पुत्रं ललाटे भिजघान ह ॥ ततोंगदं परिक्षिप्तं त्रिभिर्नैर्ऋत
पुंगवैः ॥ हनूमानपि विज्ञाय ॥ हनूमानपि विज्ञाय नीलश्चापि प्रतस्थतुः ॥ ततः श्चिक्षेप शैलाग्रं नील
स्त्रिशिरसे तदा ॥ तद्रावणसुतः श्रीमान् विभेद निशितैः शरैः ॥ तद्वाणशतनिर्भिन्नं विदारि

तमभिलंघनं॥ साग्निस्फुलिंगसंनादं निपपात गिरेः शिरः॥ तच्चूर्णितमथालोक्य हनूमान्कपिकुंजरः॥ आजघानत
तोमूर्ध्नि वज्रवेगेन मुष्टिना॥ स मुष्टिनिष्पिष्टविशीर्णमूर्धा विकीर्णदंताक्षिविलंबिजिह्वः॥ देवांतको राक्षसराजसूनुर्गतासु
रुर्व्यां सहसा पपात॥ इति देवांतकवधसर्गः॥ ॥ तस्मिन्हते राक्षसराजसूनौ महाबले संयति देवशत्रौ॥ नीलं त्रिमूर्धा कु
पितः शरौघैः घोरैर्जांबूनदचित्रपुंखैः॥ शिलाशरैस्तैरभिभूयमानो विभिन्नगात्रः कपिसैन्यपालः॥ धिरूढगात्रो निचर्मू
व नीलो विष्टंभितः स्वेन महाबलेन॥ ततस्तु नीलः प्रतिलभ्य संज्ञां सशैलमुत्पाट्य सवृक्षखंडं॥ सदूरमुत्पात्य स्वयमूर्धवे
गो महोदरं तेन जघान मूर्ध्नि॥ स तेन शैलेन समाहतस्तदा रक्षो हतो भूमितले पपात ह॥ महोदरं जीवितमुत्सृजंय यथा गजः सिंह
व्याभिभूतः॥ पितृव्यं निहतं दृष्ट्वा त्रिशिराः क्रोधमूर्च्छितः॥ हनूमंतं सुसंक्रुद्धो विव्याध निशितैः शरैः॥ ततो हनूमानुत्सह
यान्त्रिशिरसस्तदा॥ विददार नखैः क्रुद्धो गजेंद्रान्मृगराडिव॥ अथ शक्तिं समादाय कालरात्रिमिवांतकः॥ हनूमति प्राचिक्षे
प त्रिशिरा रावणात्मजः॥ निचखान तदा रुष्टो वानरेंद्रस्य वक्षसि॥ खड्गप्रहाराभिहतो हनूमान्प्लवगोत्तमः॥ स जघान त्रिशि
रसं तलेनोरसि वीर्यवान्॥ स तथाभिहतस्तेन न्यस्तहस्तो धराभुवि॥ निपपात महातेजा विसंज्ञस्त्रिशिरास्तदा॥ पततस्त

ग

रैर्हरिभिस्तु करिष्यसि॥ अस्मिन्वज्रसमस्पर्शैः प्रासं मे क्षिप वक्षसि॥ अंगदस्य वचः श्रुत्वा प्रचुकोप नरांतकः॥ संदीश्य
दशनैरोष्ठौ निश्वस्य च पुनः पुनः॥ स प्रासमाविध्य तदंगदाय समुज्वलंतं सहसा ससर्ज॥ स वालिपुत्रोरसि वज्रकल्पे
बभूव भग्नो पतितश्च भूमौ॥ तं प्रासमालोक्य तदा विभग्नं सुपर्णकृत्तोरगभोगकल्पं॥ तलं समुद्यम्य स वालिपुत्रः
तुरंगमं तस्य जघान मूर्ध्नि॥ ततस्य वाजी निपपात भूमौ तलप्रहारेण विशीर्णशीर्षः॥ निरुग्णतालुः स्फुटिताक्षिकं
धरः पपात भूमौ सह सा तुरंगः॥ नरांतकः क्रोधवशं जगाम हतं तुरंगं पतितं समीक्ष्य॥ स मुष्टिमुद्यं महानुभावो जघा य
न शीर्षे युधि वालिपुत्रं॥ अथांगदो मुष्टिनिपातभग्नः सुस्राव तीव्रं रुधिरं स्वचर्गोष्णं॥ मुहुः प्रजज्वाल मुमो
ह चापि संज्ञां समासाद्य च विस्मितोऽभवत्॥ अथांगदो वज्रसमानवेगं संवर्त्य मुष्टिं गिरिशृंगकल्पं॥ नि
पातयामास तदा महात्मा नरांतकस्योपरि वालिपुत्रः॥ स मुष्टिनिष्पिष्टविशालवक्षा भूयस्तथा शोणित
दिग्धगात्रः॥ नरांतको भूमितले पपात सहाश्रुभिः सैनिकराक्षसानां॥ अथांतरिक्षे त्रिदशोत्तमानां व
नौकसां चापि महाभिनादः॥ बभूव तस्मिन्निहते तिवीर्ये नरांतके वालिसुतेन संरव्ये॥ अथांगदो राम

स्यसंभ्रांता राक्षसाश्चमहाकपिः॥ ननादगिरिसंकाशः त्रासयन्सर्वराक्षसान्॥ अमृष्यमाणस्तं घोरं त्रिशिराः क्रोधमूर्छितः॥ स
मुत्पत्यहनूमंतं आजघान समुष्टिना॥ शितेन खड्गेन महाशिरांसि कपिः समस्तानि सकुंडलानि॥ मुहुः सछिचिछेदस संह
नूमान्त्वष्टात्मजस्येवशिरांसि शक्रः॥ तान्यायतोक्षाण्यभिसंन्नभानि प्रदीप्तवैश्वानरसंनिभानि॥ पेतुः शिरांसींद्ररिपोर्धरि
र्व्यां ज्योतींषि रुक्तानि यथार्कमार्गात्॥ ॥इति त्रिशिरावधोनामसर्गः॥ ॥ तस्मिन्हतेदेवरिपौ त्रिशीर्षे हनूमताशक्रपराक्र
मेण॥ नेदुःप्लवंगाः प्रचचालभूमिः रक्षांसि सर्वाणि विदुद्रुवुश्च॥ हतंत्रिशिरसं दृष्ट्वा तथैवचमहोदरं॥ हतौतौ प्रेक्ष्यतेजस्वीदे
वांतकनरांतकौ॥ मुहूर्तंमोहमापन्नः शांतिंचैवोपलब्धवान्॥ ततश्चिरंतु संप्राप्ता राक्षसोभीमविक्रमः॥ चुकोपसमहातेजामहा
पार्श्वोमहाबलः॥ अग्राह्यार्चिष्मतींचापि गदांसर्वायसांतदा॥ हेमपट्टपरीतां च मांसशोणितलेपनां॥ विराजमानांवपुषाशत्रुशो
णिततर्पितां॥ तेजसासंप्रदीप्ताग्रांरक्तमाल्यविभूषितां॥ ऐरावतमहापार्श्वं सर्वभूतभयावहां॥ गदामादायसंक्रुद्धोमहापार्श्वोम
हायशाः॥ हरीन्समभिदुद्राव युगांताग्निरिवज्वलन्॥ ऋषभस्तुसमुत्पत्य वानरोवरुणात्मजः॥ महापार्श्वंसमासाद्यतस्थौतस्या
ग्रतोयुधि॥ तंपुरस्तात्स्थितंदृष्ट्वा वानरंपर्वतोपमं॥ आजघानोरसिक्रुद्धोगदयावज्रकल्पया॥ सतथाभिहतस्तेनगदया

रामायणयुद्ध

१००२

~~[illegible]~~

९६

वानरर्षभः॥ भिन्नचक्षुः पराभूतः शुश्राव रुधिरं बहु॥ ससंप्राप्य चिरात् संज्ञां ऋषभोवानरर्षभः॥ महापार्श्वंमहाबाहुनस्तेनो
भिजघानह॥ निपपातमहाबाहुर्वनिर्द्धूण सूदितः॥ विकीर्णनयनोभूमौ विगतासुर्गतायुधः॥ तस्मिन्हतेभ्रातरिराव
णस्यनत्रैकलःस्तूलमर्णवाभं॥ ध्वकृत्वायुधंकेवलंजीवितार्थीद्रुमवभिन्नार्णवसंन्निकाशं॥ ॥इतिमहापार्श्ववधोनाम
सर्गः॥ ॥ स्वंचलं व्यथितंदृष्ट्वातस्मिन् संग्राममूर्धनि॥ भ्रातृंश्च निहतान्संख्ये शक्रतुल्यपराक्रमान्॥ पितृव्यौनिहतौच
वसमरे समरेष्वपलायिनौ॥ महोदरमहापार्श्वौभ्रातरौराक्षसर्षभौ॥ चुकोपाथमहातेजाब्रह्मदत्तवरोभुवि॥ अतिकायोम
हावीर्योदेवदानवदर्पहा॥ सभास्करसहस्रस्य संघातइवराक्षसः॥ सतंचचोदयामासरथंचेदमुवाचह॥ निहतानां
ममाद्यानां दग्धस्यनगरस्यच॥ संभ्रमार्थेहमबाह्य हत्वातौरामलक्ष्मणौ॥ रघुवृक्षंहनिष्यामिमैथिलीफलपुष्पदं॥ प्र
शाखाथस्यसुग्रीवः सेवकाहरियूथपाः॥ कर्मणास्यहतोमूलंभ्रातरौरामलक्ष्मणौ॥ भूखंडेहतेहतंसर्वंतौहनिष्यामिसंयु
गे॥ सविस्रोदराघोषेणरथेनातिरथोमहान्॥ [illegible]

कांड वाल्मीक

१००२

९६

द्वेच खड्गे रथगतो पार्श्वस्थौ पार्श्वशोभिनौ ॥ किष्कुसारौ च दिव्यौ च दशहस्तप्रमाणतः ॥ रक्तमाल्यांबरधरो महापर्वतसंनि
भः ॥ कालः कालमहावक्त्रो मेघस्थ इव भास्करः ॥ कांचनांगदनद्धाभ्यां भुजाभ्यामेष शोभते ॥ शृंगाभ्यामिव दीप्ताभ्यां
हिमवान्पर्वतो यथा ॥ कुंडलाभ्यां च तस्यैतद्भाति वक्त्रं शुभेक्षणं ॥ पुनर्वस्वंतरइव परिपूर्णो निशाकरः ॥ आचक्ष्व मे महाबाहो
कोयं राक्षसपुंगवः ॥ यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः ॥ स पृष्टो राजपुत्रेण रामेणामिततेजसा ॥ आचचक्षे महातेजा राघ
वाय विभीषणः ॥ दशग्रीवो महातेजा राजा वैश्रवणानुजः ॥ भीमकर्मा महोत्साहो रावणो राक्षसाधिपः ॥ तस्यैष वीर्यवान्पुत्रो रा
वणप्रतिमो रणे ॥ वृद्धसेवी श्रुतधरः सर्वास्त्रविदुषां वरः ॥ अश्वपृष्ठे रथे नागे खड्गे धनुषि कर्षणे ॥ भेदे सांत्वे च दाने च नये मंत्रे
च संमतः ॥ यस्य प्रभावः सुमहान्कथ्यते देवदानवैः ॥ तनयं धान्यमालिन्यास्त्वतिकायं महाविदुः ॥ अनेनाराधितो ब्रह्मा तप
सा तपसा भावितात्मना ॥ अस्त्राणि चास्य दत्तानि रिपूणां च पराजयः ॥ सुरासुरैरवध्यत्वं दत्तमस्य स्वयंभुवा ॥ एतच्च कवचं दिव्यं रथ
श्चैष भास्करः ॥ एतेन शतशो देवा दानवाश्च पराजिताः ॥ रक्षितानि च रक्षांसि यक्षाश्च युधि सूदिताः ॥ वज्रं विष्टंभितं बाणैः
रणे शक्रस्य धीमता ॥ पाशः सलिलराजस्य युद्धे प्रतिहतः पुरा ॥ एषोतिकायो बलवान्राक्षसानां महारथः ॥ राक्षसानां मह

तेधीमान्देवदानवदर्पहा ॥ तस्मिन्क्रियतां यत्नः क्षिप्रं पुरुषपुंगव ॥ पुरा वानरसैन्यानि क्षयं नयति सायकैः ॥ ततोतिकायो बलवान्प्र
विश्य हरिवाहिनीं ॥ विस्फारयामास धनुर्ननाद च मुहुर्मुहुः ॥ तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरं ॥ अभिपेतुर्महात्मानः प्रधाना ये व
नौकसः ॥ द्विविदः कुमुदो मैंदो नीलः सरभ एव च ॥ पादपैर्गिरिशृंगैश्च युगपत्समुपाद्रवन् ॥ तेषां वृक्षांश्च शैलांश्च शरैः कनक
भूषितैः ॥ अतिकायो महातेजाश्चिच्छेदास्त्रविदां वरः ॥ तांश्चैव सर्वान्स हरीन् शरैः सर्वायसैर्बली ॥ विव्याधाभिमुखान्सं
ख्ये भीमकर्मा निशाचरः ॥ तेर्दिताः शरवर्षेण भिन्नगात्राः प्लवंगमाः ॥ न शेकुरतिकायस्य पुरतः स्थातुमाहवे ॥ तत्सैन्यं ह
रिवीराणां त्रासयामास राक्षसः ॥ मृगयूथमिव क्रुद्धो हरिर्यौवनदर्पितः ॥ स राक्षसेंद्रो हरिसैन्यमध्ये नायुध्य
मानं निजघान कंचित् ॥ उपसृत्य रामं स महाधनुष्मान्सगर्वितो वाक्यमिदं बभाषे ॥ अयं रथस्थोहं शरचापपाणिर्न प्राकृतं कंचन यो
धयामि ॥ यस्यास्ति शक्तिर्व्यवसाययुक्तो ददातु मे शीघ्रमिहाद्य युद्धं ॥ तत्तस्य वाक्यं ब्रुवतो निशम्य चुकोप सौमित्रिरमित्रहंता ॥
अमृष्यमाणश्च समुत्पपात जग्राह चापं च ततः स्मयित्वा ॥ पुरस्तादतिकायस्य विचकर्ष महद्धनुः ॥ पूरयित्वा महीं शैलान्
आकाशं सागरं दिशः ॥ ज्याशब्दो लक्ष्मणस्यास्य त्रासयामास राक्षसान् ॥ सौमित्रेर्धनुर्घोषं श्रुत्वा प्रतिभयं तदा ॥ विसि

 स्त्रियेमहात्मेश्च राक्षसंग्रामहावली॥ अथातिकायः कुपितो दृष्ट्वा लक्ष्मणमग्रतः॥ आदायनिशितं बाणमिदं
१०१४ स्वनमब्रवीत्॥ बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः॥ गच्छ किं कालसदृशं मांयोधयितुमिच्छसि॥ नहि
९८ मद्बाहुसृष्टानां शराणांनलपर्वणां॥ सोढुमुत्सहते चैमं मंतारिक्षमथोमही॥ सुखसंप्रसुप्तं कालाग्निं प्रबोधयि
तुमिच्छसि॥ न्यस्य चापं निवर्तस्व यःप्राणान्स्त्वंविमोक्ष्यसे॥ अथवा त्वं प्रतिष्टभा द्धनानिवर्तितुमर्हसि॥ तिष्ठप्रा
णान्परित्यज्यगमिष्यासियमक्षयं॥ पश्यमेनिशितान्बाणानरिदर्पनिषूदनान्॥ ईश्वरायुधसंकाशा
न्तप्तकांचनभूषणान्॥ सीतपीतारुणस्तीक्ष्णमुक्ताविद्रुमभूषणः॥ एषतेसर्पसंकाशो बाणःपास्यतिशो
णितं॥ मृगराजइवक्रुद्धो गजराजस्यशोणितं॥ यद्यपित्वां वधिष्यामि नामकीर्तिर्भविष्यति॥ अज्ञातवद्
वीर्यस्यख्यातस्यात्रदिवालये॥ कामंतुयदिवा कामो मांयोधयितुमाहवे॥ यद्वालूरहाणस्वशरान्नूनं नः
स्यक्षासिजीवितं॥ अत्यातिकायस्यवचः सरोषं सगर्वितं संयगिराजपुत्रः॥ स्वैयचुक्रोधवदेयंधेतात्माउवा १००४
९९

नादयन्परमं तूर्णं राघवंप्रतिजग्मिवान्॥ पूरितास्तेनशब्देन नद्योगिरिसकंदराः॥ संचचालमही सर्वा त्रस्तः सिंहमिवद्विपः॥ सविस्फा
र्यमहाचापं किरीटीमृष्टकुंडलः॥ नामविश्रावयामास ननादचमहास्वनं॥ तेनासिंहप्रणादेन नामसंश्रावणेनच॥ ज्याशब्देनचभी
मेन त्रासयामासवानरान्॥ ते तस्यरूपमालोक्य निकृत्तास्वस्वविक्रमात्॥ भयार्तावानरात्रस्ता विद्रवंत्तदिशोदिशः॥ अतिका
यंसमासाद्य सर्वेतेमूढचेतसः॥ शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे॥ ततोतिकायं काकुत्स्थोरथस्थं पर्वतोपमं॥ ददर्शधन्वि
नांवेगात्तर्जंतकालमेघवत्॥ तं दृष्ट्वा समहाघोरं राघवोपिविसिस्मिये॥ वानरान्सांत्वयित्वाच विभीषणमुवाचह॥ कोयंपर्वतसंका
शोधनुष्मान्हरिलोचनः॥ युक्ते खरसहस्रेण विशाले स्यंदने स्थितः॥ शरैः शूलैः शितैः खड्गैः मुद्गरैः सपरस्वधैः॥ सो
र्चिषाभिर्वृतोभातिभूतैरिवमहेश्वरः॥ कालजिह्वाप्रकाशाभिर्यएषोत्रविराजते॥ आवृतोरथशक्तीभिर्विद्युद्भिरिवतोयदः॥
धनूंषिचास्यसज्जानि हेमपृष्ठानि सर्वतः॥ शोभयंतिरथश्रेष्ठं शक्रचापमिवांबुदं॥ कोयंराक्षसशार्दूलोरणभूमिं विराजयन्॥
त्रिनतं मेघसंकाशं हेमपृष्ठमलंकृतं॥ इंद्रस्येवधनुस्तस्य कार्मुकं भातिबिभ्रतः॥ सध्वजः सपताकस्य सोनुकर्षो महारथः॥ चापा
द्भिः समायुक्तो मेघस्तनितनिस्वनः॥ विंशतिर्दशचद्वेच तूणीरथवराः स्थिताः॥ कार्मुकाणिचभीमानि गदाश्चैवाग्रदर्शनाः॥

र्षयस्तदा ॥ गुह्यकाश्च महात्मानः युद्धं ददृशुस्तदा ॥ ततोतिकायः कुपितो धनुष्याधाय सायकं ॥ लक्ष्मणाय प्रचिक्षेप
संक्षिपंतमिवांबरं ॥ तमापतंतं विशिखं शरमाशीविषोपमं ॥ अर्धचंद्रेण चिच्छेद लक्ष्मणः परवीरहा ॥ तं निकृत्तं शरं दृष्ट्वा कृ
त्तभोगमिवोरगं ॥ अतिकायो भृशं क्रुद्धः पंच बाणान् समाददे ॥ तान् शरान् संप्रचिक्षेप लक्ष्मणाय निशाचरः ॥ तानप्राप्ता
ञ्छरैस्तीक्ष्णैश्चिच्छेद युधि लक्ष्मणः ॥ स तान् छित्वा शरान् तीक्ष्णान् लक्ष्मणः पुरुषर्षभः ॥ आददे निशितं बाणं ज्वलंतमिव ते
जसा ॥ तमादाय धनुःश्रेष्ठे योजयामास लक्ष्मणः ॥ विचकर्ष च वेगेन ससर्ज स च राक्षसे ॥ पूर्णायतविसृष्टेन शरेणान
तपर्वणा ॥ ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान् ॥ ललाटे च शरो मग्नस्तस्य भीमस्य रक्षसः ॥ ददृशे शोणितेनाक्तः प
न्नगेंद्र इवाहवे ॥ राक्षसः प्रचकंपाथ लक्ष्मणेषु प्रताडितः ॥ रुद्रबाणहतं घोरं यथा त्रिपुरगोपुरं ॥ चिंतयामास चाश्वस्य
विमृश्य च महाबलः ॥ साधु मुक्तेन बाणेन श्लाघनीयोसि मे रिपो ॥ इत्येवं साधु निश्चित्य निगृह्य च भुजावुभौ ॥ स रथो
पस्थमास्थाय चापमादाय चोत्तमं ॥ त्रीन् पंच सप्तेति सायकान् राक्षसर्षभः ॥ आददे संदधे चापि विचकर्ष ससर
एकं

र्ज च ॥ ते बाणाः कालसंकाशा राक्षसेंद्रधनुश्च्युताः ॥ हेमपुंखा रविप्रख्याश्चक्रुर्दीप्तमिवांबरं ॥ ततस्तान् राक्षसान् दृष्ट्वा शरौघा
न् राघवानुजः ॥ असंभ्रांतः स चिच्छेद बहुभिर्निशितैः शरैः ॥ तान् शरान् युधि संप्रेक्ष्य निकृत्तान् रावणात्मजः ॥ चुकोपात्रिसु
रेंद्रारिर्जग्राह च शितं शरं ॥ तं संधाय महातेजा विससर्ज महाबलः ॥ ततः सौमित्रिमायांतमाजघान स्तनांतरे ॥ अतीव तेन सौ
मित्रिस्ताडितो युधि वक्षसि ॥ सुस्राव रुधिरं भूमिमत्त इव द्विपः ॥ स चकारात्मानं विशल्यं सहसा भुवि ॥ जग्राह च शरं ती
क्ष्णं तमस्त्रेणाभिसंदधे ॥ आग्नेयेन महातेजा मोक्षयित्वा विचक्षणः ॥ स जज्वाल महाबाणो धनुष्यस्य महात्मनः ॥ ततः स ज्व
लंतं तीक्ष्णं लक्ष्मणः शरमंजसा ॥ अतिकायाय चिक्षेप यमदंडमिवापरं ॥ अतिकायाय तेजस्वी सौरमस्त्रं समादधे ॥ तेन बाणं
भुजंगाभं हेमपुंखमयोजयत् ॥ उत्ससर्ज च वेगेन दीप्तसूर्यास्त्रसंयुतं ॥ ततस्तावंबरे बाणावन्योन्यमभिजघ्नतुः ॥ तेजसा संप्रदीप्ता
ग्रौ क्रुद्धाविव भुजंगमौ ॥ तावन्योन्यं विनिर्भिद्य पेततुर्धरणीतले ॥ तावुभौ शरौ दीनौ न भ्राजेते स्म संयुगे ॥ ततोतिकायस्त्वै
षीकं ससर्जास्त्रं निशाचरः ॥ तच्चिच्छेद सौमित्रिरस्त्रेणैंद्रेण वीर्यवान् ॥ ऐषीकं निहतं दृष्ट्वा कुमारो रावणात्मजः ॥ या
म्येनास्त्रेण संक्रुद्धो योजयामास सायकं ॥ ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः ॥ वायव्येन तदस्त्रेण निजघान स ल

क्ष्मणं॥ अभिसंध्याय शराभिधाराभिरिव तोयदः॥ प्रववर्ष सुसंक्रुद्धो लक्ष्मणो रावणात्मजं॥ याम्येनास्त्रेण संक्रुद्धो योजया
मास सायकं॥ ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः॥ वायव्येन तदस्त्रेण निजघान स लक्ष्मणः॥ अथैनं शरधाराभि
र्धाराभिरिव तोयदः॥ प्रववर्ष सुसंक्रुद्धो लक्ष्मणो रावणात्मजं॥ याम्येनास्त्रेण संक्रुद्धो योजयामास सायकं॥ तेतिकायस्य
संप्राप्य कवचं वज्रविग्रहं॥ भग्नाग्रशल्याः सहसा निपेतुर्भुवि सायकाः॥ तान्मोघानभिसंप्रेक्ष्य लक्ष्मणः परवीरहा॥ अभ्य
वर्षत बाणानां अयुतेन महायशाः॥ स वर्ष्यमाणो बाणौघैरतिकायो महाबलः॥ अभेद्यकवचः संख्ये राक्षसो नाभ्यविव्य
थे॥ न शशाक रुजं कर्तुं युधि तस्य महाशरैः॥ अथैनमभ्युपागम्य वायुर्वाक्यमभाषत॥ ब्रह्मदत्तवरो ह्येष अभेद्यकवचावृतः॥
ब्रह्मास्त्रेणैव हंतव्य स्तद्वाक्यं च दृढ शास्थितं॥ ततः सुवाक्यं स निशम्य वायोः सौमित्रिरिंद्रप्रतिमानवीर्यः॥ समाददे बाण
ममोघवीर्यं स ब्राह्मणास्त्रेण युयोज चैव॥ तस्मिन्वराख्ये विनियुज्यमाने सौमित्रिणा बाणवरे शिताग्रे॥ दिशश्च सर्वे कम
हाघनन्भोगतास्त्रे सुरसा सचोर्वी॥ तं लक्ष्मणो लक्ष्ममोघवंतं समापतंतं ज्वलितप्रकाशं॥ तीक्ष्णाग्रधारो भतज्ञित्रपुरवे

वेचेन सततो महात्मा॥ न वाक्यमात्रेण भवान्प्रधानो न कत्थनात्सत्पुरुषा भवंति॥ मयि स्थिते धन्विनि बाणपाणौ निदर्शय
स्वात्मबलं दुरात्मन्॥ कर्मणा दर्शयात्मानं न विकत्थितुमर्हसि॥ पौरुषेण हि यो युक्तः स च शूर इहोच्यते॥ सर्वायुधसमायुक्तो
धन्वी रथवरे स्थितः॥ शरैर्वा यदि वाप्यस्त्रैर्दर्शयस्व पराक्रमं॥ ततः शरांस्ते निशितैः पातयिष्याम्यहं शरैः॥ मारुतः कालसंपृ
क्तं वृंतात्तालफलं यथा॥ अद्य ते मामका बाणाः तप्तकांचनभूषणाः॥ पास्यंति रुधिरं देहात्पुरा देवाय यथामृतं॥ बालोयमिति वि
ज्ञाय मामवज्ञातुमर्हसि॥ बालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे॥ किं दष्टः कालसर्पेण बालेन न विपद्यते॥ एकेन हि शरेण
त्वां हंतुं शक्तोस्मि राक्षस॥ दर्शयस्व मिदानीं मे वीर्यमस्त्रबलं तथा॥ ततः स्त्वां नाशयिष्यामि दृष्ट्वा पौरुषविक्रमं॥ लक्ष्म
णस्य वचः श्रुत्वा हेतुमत्परमार्थवत्॥ अतिकायः प्रचुक्रोध बाणं चापि समाददे॥ तमापतंतं सौमित्रि स्तेधा विच्छेद लाघवा
त्॥ रावणिः पापमर्षात् शरैरेनमुपाद्रवत्॥ ततः शरसहस्रेण संछाद्य रघुनंदनं॥ विभीषणं च सामात्यं यूथपांश्चापि दुद्रु
वे॥ स चास्य वानरीं सेनां शरवर्षैर्महाभुजः॥ लक्ष्मणो राक्षसश्रेष्ठं शरैः शशिसमप्रभैः॥ ततो विघा वरो भृता देवो देवं

१००२

ततोतिकायः समरे ददर्श ॥ ततोतिकायः समरे ददर्श । तं प्रेक्ष्यमाणः सहसातिकायो जघान बाणैर्निशितैरनेकैः ॥
स सायकस्तस्य सुपर्णवेगः ततोतिवेगेन जगाम पार्श्वं ॥ तमागतं प्रेक्ष्य तदातिकायो बाणं प्रदीप्तान्तककालक
ल्पं ॥ जघान शक्त्यृष्टिगदाकुठारैः शूलैर्हलैश्चाप्यविपन्नचेष्टः ॥ तान्यायुधान्यद्भुतविग्रहाणि मोघानि
कृत्वा स शराग्निकल्पः ॥ प्रसह्य तच्चारुकिरीटजुष्टं ततोतिकायस्य शिरो जहार ॥ तच्छिरः सशिरस्त्राणं ल
क्ष्मणेनच मर्दितं ॥ पपात सहसा भूमौ शृंगं हिमवतो यथा ॥ ततो हतान् राक्षसपुंगवांस्तान् सकुंभकर्णातिरथा
तिकायान् ॥ रक्षोगणा वीरहतावशिष्टास्ते रावणाय त्वरिताः शशंसु ॥ इति युद्धकांडे अतिकायस्य वधः ॥ ॥
ततो हतांस्तान् संनिशम्य राजा मुमोह शोकाश्रुपरिप्लुताक्षः ॥ भ्रातुर्वधं पुत्रवधं च घोरं विचिंत्य शूरः सुमुहुः प्रगाढं ॥
ततस्तु राजानमवेक्ष्य वीरं शोकार्णवे संपरिवर्त्तमानं ॥ रथर्षभो राक्षसराजसूनुस्तमिंद्रजिद्वाक्यमिदं बभाषे ॥
न तात मोहं प्रतिपत्तुमर्हसि यत्रेंद्रजिज्जीवति नैर्ऋतेंद्र ॥ नेंद्रारिबाणाभिहतो हि कश्चित् प्राणान् समर्थो युधि

साधयंतुयः ॥ पश्याद्यरामंसहलक्ष्मणेनमद्बाणनिर्भिन्नविकीर्णदेहं ॥ गतायुषंभूमितलेशयानंशितैःशरैःशाचितसर्व
गात्रं ॥ इमांप्रतिज्ञांशृणुशक्रशत्रोः सुनिश्चितांपौरुषदैवयुक्तां ॥ अद्याहरामंसहलक्ष्मणेनसंतर्पयिष्यामिशरैरमो
घैः ॥ यथेंद्रवैवस्वतविष्णुमित्राः साध्याश्चवैश्वानरचंद्रसूर्याः ॥ द्रक्ष्यंतिमेविक्रममप्रमेयंत्रिविक्रमेविक्रममेव
विष्णोः ॥ इत्येवमुक्त्वात्रिदशेंद्रशत्रुः आपृच्छ्यराजानमदीनसत्वः ॥ समारुरोहानिलतुल्यवेगः रथंहयश्रेष्ठस
हस्रयुक्तं ॥ तमास्थायमहातेजा रथंहरिरथोपमं ॥ जगामसप्रभुस्तत्र यत्रयुद्धमरिंदमः ॥ तंप्रस्थितंमहात्मा
नमनुजग्मुर्महाबलाः ॥ संस्पर्धमानाबहवः धनुःप्रासासिपाणयः ॥ गजस्कंधगताःकेचित् केचित्हयगता
स्तथा ॥ धारामुद्गरनिस्त्रिंशपरस्वधधराःपरे ॥ शंखनादैश्चपुण्यैश्चभेरीणांचमहास्वनैः ॥ जगामत्रिदशेंद्रा
रिस्तूयमानःसपत्नजित् ॥ सशंखशशिवर्णेनछत्रेणरिपुसूदनः ॥ रराजप्रगृहीतेननभश्चंद्रमसायथा ॥ ततस्तु
तंस्तुविविधजुर्भीमंमेघाभंहेमभूषितं ॥ चारुचामरमुख्यैश्चमुख्यंसर्वधनुष्मतां ॥ ततःश्रीमंद्रजित्लंकांसूर्यप्रति

१।आ स्वला

तेजसा ॥ रराजत्व निर्वीर्येण घोरिवार्केण फ्रिजस्म ॥ सत्वुद्धष्ट्वा विनिर्यांतं बलेन महता वृतं ॥ राक्षसाधिपति
र्नाम रावणः पुत्रमब्रवीत् ॥ त्वमप्रतिरथः पुत्र जितः स्ते युधि वासवः ॥ किंपुनर्मानुषं दृष्टं न वधिष्यसि राघवं ॥
स तथोक्तो राक्षसेण प्रतिगृह्य महाशिषः ॥ रथेनाश्वयुजा वीरः शीघ्रं गत्वा निकुंभिलं ॥ स्थापयामास रक्षांसि र
थ्यांश्चैव समंततः ॥ सर्वतोग्निं परिस्तीर्य शस्त्रपत्रैः सबिभ्रेरः ॥ जुहाव सर्वकृष्णस्य कंठाच्छागस्य जीवितं ॥ सकृद्देवस
धूमस्य विधूमस्य महार्चिषः ॥ ततस्तं हुतभोक्तारं हुतभुक् सदृशप्रभः ॥ अजुहोत् राक्षसश्रेष्ठो मंत्रार्थविधिपूर्वकं ॥
सहा विहैर्भि लाजाद्यैर्माल्यगंधसुसंस्कृतैः ॥ अजुहोत् पावकं तत्र राक्षसेंद्रः प्रतापवान् ॥ सोस्त्रमावाहयामास ब्रा
ह्ममस्त्रविदांवरः ॥ धनुः शरान् रथं चैव सर्वतत्राभ्यमंत्रयत् ॥ तस्मिन् आहूयमाने च हूयमाने च पावके ॥ सार्कचंद्र
ग्रहनक्षत्रा वित्रासमहीतदा ॥ स पावकं पावक तुल्यतेजा जुहाव शक्र प्रतिमप्रभावः ॥ स चाप बाणाश्व रथा
श्वसूतः खेंतर्दधे आत्मनमचिंत्यरूपः ॥ ससैन्यमुत्सृज्य समुत्ससर्ज बाणान् रणे वानरवाहिनीषु ॥ अंत

दृश्यमानः शरजालमुग्रं ववर्ष नीलांबुधरो यथांबु॥ ते शक्रजिद्बाणविकीर्णदेहाः मायाहता विस्वरमुन्न

१००८ दंतः॥ मायानिगूढं सुरराजशत्रुं न तत्र रक्षोधिपतिं व्यपश्यन्॥ ततः स रक्षोधिपतिर्महात्मा सर्वासु दिक्ष्वभिवर्षमाणः॥ वे

प्रच्छादयामास रविप्रभां वै विषादयामास च वानरेंद्रान्॥ स शूलनिस्त्रिंशपरश्वधानि दीप्तानलोल्कार्कघनिस्सप्रभाणि॥

सधिस्फुलिंगोज्वलपावकानि ववर्ष तीव्रं प्लवगेंद्रसैन्ये॥ ततः स पावकसंकाशैः शरैर्वानरपुंगवाः॥ पीडि

ताः पृथिवीं जग्मुः क्रांता इवाचलाः॥ तेन्योन्यमभिसर्पंतो निनदंतश्च विस्वरं॥ राक्षसेंद्रास्त्रनिर्भिन्ना

निपेतुर्वानरर्षभाः॥ संवीक्ष्यमाणा गगनं केचिन्नेत्रेषु ताडिताः॥ शरैर्विविशुरन्योन्यं निपेतुर्धरणीतले॥ सु

ग्रीवं स हनूमंतं अंगदं गंधमादनं॥ जांबुवंतं सुषेणं च वेगदर्शिनं च वानरं॥ मैंदं च द्विविदं नीलं गजं गवयमेव च॥ धू

म्रं शरभं विधकदंष्ट्रं केसरिणं हरिलोमानमेव च॥ सूर्याननं दधिमुखं तथा ज्योतिर्मुखं हरिं॥ प्रवेगाक्षं नलं चैव कुमु

दं चैव वानरं॥ उल्कामुखमंच हरिं पनसमेव च॥ धूम्रं शतबलिं हंतारं गवाक्षमपरान्हरीन्॥ बाणैः शूलैः शि

तैः खड्गैः भिंडिपालैः परश्वधैः॥ विव्याध कपिशार्दूलान्सर्वांस्तान्राक्षसोत्तमः॥ स तांस्तदा वानररा १००८

तसादितयोरणाग्रेमुमोहसैन्यंहरियूथपानां॥ सर्वंविपन्नंविगतप्रभावंनवापिकिंचित्प्रतिपेदिरेस्म॥ ततोविपन्नंसमवे
क्ष्यसैन्यंविभीषणोबुद्धिमतांवरिष्ठः॥ उवाचशाखामृगराजवीरान्माभैष्टनास्त्यत्रविषादहेतुः॥ यदार्यपुत्रौविवशौ
विषण्णौस्वयंभुवोवाक्यमभिप्रपन्नौ॥ यन्नुच्छादितौविंद्रजितास्त्रजालैस्तस्मैहिदत्तंपरमास्त्रमेतत्स्वयंभुवोवाक्य
मजिह्ममोघवीर्यं॥ तन्मानयंतौयदिराजपुत्रौविषादितौनात्रविषादकालः॥ सब्राह्ममस्त्रंतधीमान्मानयित्वास
मारुतिः॥ विभीषणवचःश्रुत्वाहनूमानिदमब्रवीत्॥ अस्मिन्नस्त्रहतेसैन्येवानराणांतरस्विनां॥ योयोधारयतेप्राणांस्तं
तमाश्वासयावहे॥ तावुभौयुगपद्वीरौवायुपुत्रविभीषणौ॥ उल्काहस्तौतदारात्रौरणशीर्षेविचेरतुः॥ छिन्नलांगूलह
स्तैश्चविप्रकीर्णशिरोधरैः॥ स्रोतोभिःक्षतजंचापिप्रस्रुवद्भिःसमंततः॥ पतितैःपर्वताकारैरभिसंकुलां॥ शस्त्रैश्च
पतितैर्दीप्तैरभिकीर्णावसुंधरा॥ सुग्रीवंसांगदंनीलंकुमुदंगंधमादनं॥ जांबुवंतंसुषेणंचवेगवंतंदरीमुखं॥ ज्योतिर्मुखंनलं
मैंदंद्विविदंपनसंगजं॥ गवाक्षंगवयंधूम्रंवृषभंविनतंहरिं॥ एतांश्चान्यांश्चसुबहून्वानरेंद्रान्महाबलान्॥ विभीषणह
नूमंतौददृशातेहतान्रणे॥ सप्तकोटिहताःकोट्योवानराणांतरस्विनां॥ पश्चिमेनार्धशेषेणवरदानैःस्वयंभुवः॥ साग

रौघनिभंघोरंदृष्ट्वाव्यापादितंबलं॥ विभीषणहनूमंतौस्फिशालेहतान्नरक्षौ॥ जांबुवंतमथेयतुः॥ स्वभावाज्जरयायुक्तंवृद्धंश
रशतैःश्चितंगप्रजापतिसुतंवीरंशाम्यंतमिवपावकं॥ अथैनमुपसंगम्यपौलस्त्योवाक्यमब्रवीत्॥ कच्चिदार्यशरैर्घोरैर्नप्रा
णाहिंसितारणे॥ विभीषणवचःश्रुत्वाजांबुवान्प्लवगर्षभः॥ कृच्छ्रेणधारयन्प्राणान्इदंवचनमब्रवीत्॥ नैरृतेंद्रमहावी
र्यस्वरेणत्वाभिलक्षये॥ पीड्यमानःशितैर्बाणैर्नत्वांपश्यामिचक्षुषा॥ अंजनासुप्रजायेनमातरिश्वाचनैरृतः॥ कच्चिद्धा
व रयतिप्राणान्हनूमान्प्लवगर्षभः॥ श्रुत्वाजांबुवतोवाक्यंअब्रवीत्तंविभीषणः॥ स्वभावंतस्यजिज्ञासुःजांबुवंप्राज्ञसेवि
तः॥ किंत्वयामहयेकृत्स्नमय्यमलंवचनोबलं॥ तावार्यपुत्रावुत्सृज्यकस्मात्पृच्छसिमारुतिं॥ नैवराजनिसुग्रीवेनांगदेनापिच
राघवे॥ आर्येणदर्शितस्नेहोहनूमतिविदर्शितः॥ वानरेंद्रान्महाकायान्अतिक्रम्यमहाबलः॥ बहून्न्यान्समकंतुयस्मा
त्पृच्छसिमारुतिं॥ विभीषणवचःश्रुत्वाजांबुवानिदमब्रवीत्॥ शृणुनैरृतशार्दूलयस्मात्पृच्छसिमारुतिं॥ हनूमतिग
तप्राणेजीवंतोपिमृतावयं॥ तस्मिन्जीवतितिदुर्धर्षहतमप्यहतंबलं॥ एतच्छ्रुत्वारभंवाक्यंप्रत्युवाचविभीषणः॥

पृयतेमारुतिमाहनिस्तातमारुतिस्तातमारुत प्रतिमोजस्वे॥ वैश्वानरसमंतेजो धारयन्लवगर्षभः॥ सतेमार्गसमायातोमया
स्वघसहस्रभो॥ ततोवृधमुपागम्य विनयेनाभिनंद्यन्॥ आवुवंतमहातेजाहनूमान्मारुतात्मजः॥ श्रुत्वाहनुमतोवाक्यंत
थासंभ्रमथितेंद्रियः॥ पुनर्जातमिवात्मानंमेनेप्लवंगपुंगवः॥ ततोब्रवीन्महातेजाहनूमंतंमरुतात्मजन्॥ आगछहरि
शार्दूल वानरांस्त्रातुमर्हसि॥ भवान्युधिक्रमसंपन्नस्त्वमेवस्त्वमेवापरमात्मनि॥ त्वत्पराक्रमसमालोक्यनान्यपश्यामिकिं
चन॥ ऋक्षवानरवीराणामनीकानिप्रहर्षय॥ विशल्योकुरुवाप्येतौ भ्रातरौरामलक्ष्मणौ॥ गत्वापरममध्वानंमुपर्युपरिसा
गरं॥ हिमवंतंनगश्रेष्ठहनूमन्गंतुमर्हसि॥ ततःकांचनमत्युग्रमृषभंपर्वतोत्तमं॥ तस्यवानरशार्दूल शैलशोमूर्ध्निसुप्र
भाः॥ ओषधीर्द्रक्ष्यसेवीरदीपयंतीर्दिशोदश॥ मृतसंजीवनींचैव विशल्यकरणींतथा॥ सवर्णकरणींचैव संधानींचमहौ
षधीं॥ गृहीत्वाहनुमन्सर्वाः शीघ्रमागंतुमर्हसि॥ आश्वासयहरीन्सर्वान्प्राणैर्गंधवहात्मज॥ श्रुत्वाजांबवतोवाक्यंह
नूमान्हरिपुंगवः॥ आपूर्यतबलौघेन तोयवेगैरिवार्णवः॥ सपर्वततटाग्रस्थःपीडयन्पर्वतोत्तमान्॥ हनुमानभव १००१०
न्नद्वितीयइवपर्वतः॥ हरिपादविनिर्भग्नस्तुनिषसादसपर्वतः॥ नशशाकतदात्मानं तरोद्धुंधर्षितंतलैः॥ तस्यपेतुर्न

जवीरान्निर्भिद्यबाणैःशुल्पर्णीयपुंखैः॥ ववर्षशरवर्षअमंदैः सलक्ष्मणंवज्रसमप्रवेगैः॥ सबाणवर्षैरभि
वृष्यमाणोधाराभिपातैरिवपर्वतेंद्रः॥ नवीक्ष्यमाणःपरमाद्भुतश्रीः रामस्तदालक्ष्मणमित्युवाच॥ असौपुनर्पुनर्लक्ष्मण
राक्षसेंद्रो ब्रह्मास्त्रमाश्रित्यसुरेंद्रशत्रुः॥ संछादयन्सर्वबहरिसैन्यमेतत् आवांरथस्थोविहृणाति वीरः॥ स्वयंभुवादत्तवरोदुरा
त्माखमाश्रितोंतर्हितभीमदेहः॥ कथंनुशक्योयुधिनष्टदेहो निहंतुमद्येंद्रजिदस्त्रपाणिः॥ मन्येस्वयंभूर्भगवानचिंत्यो
मन्येमदस्त्रंहुतभुक्चदेवः॥ नयःसमस्तामममंत्रधैर्यंमायाबलाछादयतेरणाग्रे॥ प्रछादयत्येषहिराक्षसेंद्रः सर्वादिशः
सायकशूलजालैः॥ एतच्चशैलंप्रविभज्यसर्वंप्रभूद्भूतवानरराजसैन्यं॥ आवांतुदृष्ट्वापतितौविसंज्ञौ निवृत्तयुधोचसमजात
हर्षः॥ प्रयातिभीमःपुनरेवलंकांप्रहर्षयन्राक्षससैन्यमेतत्॥ ततःसुतावृष्टभिनोस्त्रजालैर्बभूवतुस्तत्रतदाविषाणोः॥
सराघवोनोबलिनौविषाधनमादहर्षोतयुधिराक्षसेंद्रः॥ सतत्तदावानरराजसैन्यंसरामसौमित्रिमथाप्रमथ्य॥ वि
धायसर्वसहसाववेशपुरीदशाग्रीवभुजाभिगुप्तां॥ संस्तूयमानोभुविराक्षसेंद्रः पित्रेचसर्वंहृष्टधियोभ्युवाच॥ तयोस्त

श्वेतैरजतसंकाशैः शिखरैश्चारुदर्शनैः ॥ ततः समासाद्य महानगेंद्रं अतिप्रवृद्धोत्तमघोरशृंगं ॥ ददर्श पुण्यानि तपोवनानि सु
र्षिसंघोत्तमसेवितानि ॥ स ब्रह्मकोशं रजतालयं च शक्रालयं रुद्रशरप्रमोक्षं ॥ हयाननं ब्रह्मशिरश्च दीप्तं ददर्श वैवस्व
तकिंकराणां ॥ वज्रालयं वैश्रवणालयं च सूर्यप्रभं सूर्यनिबंधनं च ॥ ब्रह्मासनं शंकरकार्मुकं च ददर्श नाभिं च वसुंधरायाः ॥
कैलासमुग्रं हिमवच्छिलां च तथर्षभं कांचनशैलमुग्रं ॥ दीप्तं च सर्वौषधिसंप्रयुक्तं सतं समीक्ष्यानलसंप्रदीप्तं ॥ विस्मि
तस्मिन् वायुवरस्य सूनुः आप्लुत्य तं चौषधिपर्वतेंद्रं ॥ तत्रौषधीनां विचयं चकार ॥ स योजनसहस्राणि समाक्रम्य महा
कपिः ॥ अविश्रांतो महातेजाः संविचेरुर्महौषधीः ॥ ततस्ताः कामरूपिण्यो महौषध्यो महाकपिं ॥ विज्ञायार्थिनमायांतं
ततो जग्मुरदर्शनं ॥ स ताः अपश्यन् भृशमात्तकोपो नूत्वा चित्तनवक्त्रः ॥ अमृष्यमाणश्चाग्निसमेनेत्रः नगेंद्रराजानमु
वाच कोपात् ॥ किं मेनदेयं सुविनिश्चितं ते यद्राघवेनासि त्वनथानुकंपा ॥ पश्याद्य मद्बाहुबलाभिभूतं वीकीर्णमात्मानमि
हाद्रिराज ॥ सतस्य शृंगं सनगं सनागं सकांचनं सानुसहस्रजुष्टं ॥ विकीर्णकूटं ज्वलिताग्रसानुं प्रसह्य वेगात्सहसोद्दधर्ष ॥
स तत्समुत्पाद्य खमुत्पपात वित्रास्य लोकान् ससुरासुरेंद्रान् ॥ संस्तूयमानः सुरसिद्धसंघैः जगाम वेगाद्दिनचंडवेगः ॥
सततशैलेनभृशाररराज शैलोत्तमगंधवहस्य सूनुः ॥ सहस्रधारेण सपावकेन चक्रेण खे विष्णुरिवार्पितेन ॥ सभास्कराध्वानम
नुप्रपन्नस्तच्छृंगसुराभं शिखरं प्रगृह्य ॥ बभौ तदा भास्करसंनिकाशो रवेः सकाशे प्रतिभास्करस्सः ॥ तं वानराः प्रेक्ष्य मुदा वि
नेदुः स चापि तान् प्रेक्ष्य समुन्ननाद ॥ तेषां समुत्कृष्टरवं निशम्य लंकाभिता भीमरवं ननाद ॥ ततस्तु गृहीत्वा निपपात तस्मिन्
सैन्य नगोत्तमं वानरसैन्यमध्ये ॥ हर्युत्तमेभ्यः शिरसाभिवाद्य विभीषणं तत्र च सस्वजे सः ॥ ततस्तु तौ मानुषराजपुत्रौ तं गंधमाघ्राय मह
हौषधीनां ॥ बभूवतुस्तत्र तदा विशल्यौ सरूद सर्वत्र सनष्टशोकौ ॥ ततः स वेगं धवहस्य सूनुः संगृह्य हैमं शिखरं प्रगृह्य ॥
जगाम वेगात् हिमवंतमेव पुनश्च रामेण समागतश्च ॥ इत्यौषधिआनयनं नाम सर्गः ॥ ॥ ततोऽब्रवीन्महातेजाः सुग्रीवो वानरा
धिपः ॥ अर्थविज्ञानसंपन्नो हनूमंतं महाबलं ॥ यतो हतः कुंभकर्णः कुमाराश्च सहानुगाः ॥ नेदानीमुपसंहारं रावणो दातु
मर्हति ॥ द्वाराणि संवृतान्येव सुगुप्तानि निशाचरैः ॥ व्यतिक्रांतश्च नः कालो न चार्थं क्षिप्रमाचर ॥ ये य महाबलाः सर्ववीर्य
वंतश्च वानराः ॥ लंकामभिपतंत्वाशु प्रगृह्योल्काः सहस्रशः ॥ ततोऽस्तंगत आदित्ये रौद्रे तस्मिन्निशामुखे ॥ लंकामभिमुखा ज
ग्मुः सोल्काः सोहरिपुंगवाः ॥ उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः ॥ आरक्षास्ते विरूपाक्षाः राक्षसास्ते प्रदुद्रुवुः ॥ गो
गोपुरेषु प्रतोलीषु चर्यासु विविधासु च ॥ प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनं ॥ तेषां गृहसहस्राणि ददाह हुतभुक्तत

हा॥ राक्षसानां समासाद्य सर्वेषां द्वाररक्षिणां॥ हेमचित्रतनुत्राणां शक्रसंघातभेदिनां॥ गदासिरत्नहस्तानां खड्गलांगुल
मपि॥ शयनेषु महार्हेषु शायिताना तथैव च॥ तस्तानां गच्छतां चैव पुत्रानादाय सत्वरं॥ तेषां दश सहस्त्राणि रक्षसां पुरवा
सिनां॥ अदहत्पावकः तत्र जज्वाल च पुनः पुनः॥ सारवंति महार्हाणि गंभीरगुणवंति च॥ हेमचित्रार्धचंद्राणि स्पर्नीयानि भा
नि च॥ रत्नचित्रगवाक्षाणि साधिष्ठानानि सर्वशः॥ मणिविद्रुमचित्राणि स्पृशंतीव च माधवं॥ क्रौंचबर्हिणवीणानां भूष
णानां च निस्वनैः॥ नादितान्यचलाभानि वेश्मान्यग्निर्ददाह वै॥ ज्वलनेन परीतानि तोरणानि चकाशिरे॥ विद्युद्भिरिव
नद्धानि मेघजालानि घर्मगे॥ सधूममालावद्दीप्तार्चिः संबभूव हुताशनः॥ युगांत इव भूतानि दिधक्षुरतुलप्रभः॥
ज्वालामालापरिक्षेपैर्दहद्धि पवनानिलैः॥ कृष्णवर्त्मा ततो घोरो लंकां रावणपालितां॥ तस्यां तु दह्यमानायां लंकायां
वानरोत्तमाः॥ बभूवुर्हृष्टमनसो ननदुश्च महाबलाः॥ ते राक्षसा नु बहवस्तत्र श्रेष्ठगृहाग्निपुंगवाः॥ चिक्षिपुर्ज्वलने दीप्ते
केचिद्दग्धा भयातुराः॥ दृष्ट्वा ज्वलंतं च तदा शब्दो भवनानां विरूक्षवे॥ धूमजालपरीतानां विषमं चित्रभानुना॥ क
चित्संभूषितानीव ददृशुस्ते भवनानि वा॥ वसुरत्नसमाकीर्णानि नानाधातुसमन्वितां॥ ददाह हुतभुक् लंकां ती १००१२

गत्राण्युग्राश्चापि जज्वलुः॥ शृंगाणि च शिलाश्चैव निपेतुश्च समंततः॥ तस्मिन्निपीड्यमाने तु भग्नद्रुमशिलातटे॥ न शेकुर्वानरा
स्थातुं तूर्यमाने नगोत्तमे॥ संचूर्णितमहाद्वारा प्रभग्नगृहगोपुरा॥ लंका संभ्रांतरक्षौघा प्रवात कदली यथा॥ पृथिवीधरसंका
शानि वीक्ष्य पृथिवीधरं॥ पृथिवीं क्षोभयामास अर्णवान्मारुतात्मजः॥ स द्रुमं शैलं समारुह्य दशयोजनमुच्छ्रितं॥ ननाद सविस्फूर्जि
तं त्रासयन्निव राक्षसान्॥ तस्य नादं च घोरं स श्रुत्वा मिनदमुत्तमं॥ लंकायां राक्षसाः सर्वे न शेकुः स्पंदितुं भयात्॥ नमस्कृत्य स
दैवेभ्यो मारुतिर्भीमविक्रमः॥ राघवार्थे परं कर्म कर्तुमिच्छति सत्वरः॥ स पुच्छमुद्यम्य भुजंगकल्पं विनम्य पृष्ठं श्रवणौ निकुं
च्य॥ विवृत्य वक्त्रं भृशमुग्रनादः समुत्पपाताथ तु चंडवेगः॥ तस्य चरणवेगेन रसा जहार शैलान्शिलांश्च शिलाः प्राकृत पर्वतेभ्यः॥
वृक्षरूपादोधत संप्रणुन्नाः स्तेक्ष्णवेगाः स छिन्नाः प्रपेतुः॥ स तोयसंस्पर्शनभोगकल्पो भुजो भुजंगारिरिव काशवीर्यः॥
ददर्श मेरुं सुरराजकल्पो दिशः प्रकर्षन्निव वायुसूनुः॥ आविद्धवेगास्ससहसा जगाम चक्रं यथा विष्णुभुजप्रमुक्तं॥ स
पर्वतान्वृक्षगणान्सरांसि नदीस्तडागानि पुरोत्तमानि॥ स्फीतान्जनान्संपरयन्स जगाम वेगाद्वितिचंडवेगः॥
आदित्यपथमासाद्य स जगाम गतक्लमः॥ स ददर्श महातेजा हिमवंतं महाकपिः॥ नानाप्रस्रवणोपेतं बहुकंदरनिर्झरं॥

ना:॥ प्रतिबिंबं जले दृष्टा तम ग्नी रितिमिवान्तरे॥ प्रासादेषु च दीप्ताग्रेषु प्रदीप्ताग्निर्व्यराजत॥ लंकं दृष्टुमिवाश्चद्रात्‌ धाने
र्विभावसु:॥ साबभूव मुहूर्तेन हरिभि: पीडपीडिता॥ लोकस्यास्य क्षयो घोरे प्रदीप्तेव वसुंधरा॥ स्त्री पुंसास्त्वापि मोह
हून्यशिनिर्गतासर्ग ह तरस्फ़ुरषो॥ नादितानु वरांगत्र रूक्षभु वेदत्रायोजनं॥ प्रदीप्तकायानु सभेर प्रदीप्ताकाशसमानशिरि:॥
सहसानुपपेतुस्तान् क्रोता तोहरयोभ्यरा॥ उत्कृष्टं वानराणां च राक्षसानां च स्वन:॥ दिशो दश समुद्रं च पृथिवीं च व्य
नादयत्॥ विक्लान्त्योच महात्मानौ तावुभौ रामलक्ष्मणौ॥ असंभ्रान्तौ जगृहतु: धनुषी धन्विनां वरौ॥ ततो विस्फारयामा
स रामस्त्वधनुरुत्तमं॥ भगवानिव संक्रुधो रुद्रो चिदं मयं धनु:॥ वानराकुष्ट घोषश्च राक्षसानां च निस्वन:॥ ज्याघोषश्च
विरामस्य त्रयो व्यापुर्दिशो दश॥ तस्य कार्मुक मुक्तैश्च शरैस्तत्पुरगोपुरं॥ पावकेन च निर्दग्धमपतत्‌ शतशो भुवि॥ ततो
रामशरान्‌ दृष्ट्वा विमानेषु गृहेषु च॥ संनाहो राक्षसेंद्राणां तुमुल: समपद्यत॥ तेषां संदह्यमानानां सिंहनादं श्च कुर्वतां॥
सर्वरी राक्षसेंद्राणां तुमुला समपद्यत॥ आदिष्टा वानरेंद्रास्तु सुग्रीवेण महात्मना॥ आसन्ना द्वारमासाद्य युध्यध्वं प्लवगा युध

कांक्षिण:॥ यश्च वाचितसं कुर्यात तत्र तत्र व्युपस्थित:॥ संहत्य व्योभिसंहत्य वलवान्मय: पलायते॥ इत्येवं निश्चितार्थेषु सु
रेष्वाश्वरा वार्णेषु॥ स्थितेषु द्वारमाश्रित्य रावणं मन्युराविशत्॥ तस्य जृंभित विक्षेपात भुजाना भिनि संकुल:॥ स्व
यानि व रुद्रस्य मन्युर्गात्रेषु अयत॥ स निकुंभं च कुंभं च कुंभकर्णात्मजावुभौ॥ प्रेषयामास संक्रुध: संग्रामे राक्षसाधिप:॥
सत्वासर्वेव स वानर सरा क्षसान्‌ सुमहाबल:॥ वरितं गच्छतेस्येवं क्रुध: सिंहो इवोन्नदन्॥ तेन संबोधितास्तेतु तदा प्रज्वलितायुधा:॥ ल
कायानिर्ययुद्धीरन दंतो भीमविक्रमा:॥ कुंभकर्णात्मजो वीरा परिगृह्य समंतत:॥ बहुसैन्य परीवारो चीष्ठराव णनोदितौ॥ तौ वराभर
णस्याभि: भाभिस्ताभिश्च सर्वत:॥ चक्रुस्ते सप्रभं व्योम हरयश्चाग्निना पुन:॥ तत्र ताराधिपस्याभा स्तारणानां तथैव च॥ तयो
राभरणानां च वर्ज्यौ समभासयत्॥ तत्र चार्धप्रदीप्तानां गृहाणां सागर: पुन:॥ भाराः संसक्तपाताल चलोर्मि स्फ़ुराभे
शं॥ तेष्टानरैव ल घोरं राक्षसानां तथा वलं॥ ध्वजैरुज्वलितप्रासं किंकिणी शतनादितं॥ भीमातिमत्तमातंगह
यवाहनसंकुलं॥ दीप्तशूलगदाशक्ति खड्गभुसुंडिधारिच॥ हेमजालाञ्चितव्योमनीराशानानपरश्वधं॥ आ
घूर्णितमहास्त्रै संधनसंसक्तकार्मुकं॥ माल्यगंधसमुत्सेक समाधिस्तमहावलं॥ घोरस्त्रसंभावकोणमहद

बुद्धिनिस्वनं॥ तदृष्ट्वबलमायांतं राक्षसानां महन्तदा॥ संचचाल कपीनांच बलमुच्चैर्ननादच॥ अवेनो सस चपुनः तल
उरक्षसांमहतु॥ अभिपेतुः कपिश्रेष्ठाः पतंगाइव सर्वतः॥ तेषांभुजपरामर्शव्याम्रष्टपरिघांबुदः॥ राक्षसानां
मभतत्रमेघानां सुनिलाभवत्॥ तत्रोन्मत्ताइवापेतुः कपयः सांयुगुत्सवः॥ वृक्षहीनस्तरुश्रेष्ठैः मुष्टिभिः
॥ दन्तैर्नखैः कर्णाशलाविक्तमस्तकाः॥ सर्वे तेबालधिन्नापि चेरुस्तत्र राक्षसाः॥ नथैवापतंतां तेषां कपीनां भिरु म
शिलाः॥ प्रवीरानभितोजघ्नु राक्षसास्तत्र रश्मिनः॥ घ्नंतमन्योजघानान्यं पतितोन्यमपातयत्॥ गर्हमाणं जगर्हन्यो दशं
समदशान्तदा॥ देहीत्यन्यो ददात्यन्यो ददामीत्यपरः पुनः॥ किंक्लेशयसि किंमां हिंसीति तत्रान्योन्यमभाषत॥ तदुद्यतगदाप्रास
मुष्टिशूलासिसंकुलं॥ प्रावर्त्ततमहारौद्रं युद्धं वानररक्षसां॥ राक्षसान्दशसप्तैव वानरानजघ्नुराहवे॥ वानरान्
पि सप्तापि दश राक्षसपुंगवाः॥ प्रतिलंघिवस्त्राश्च विमुक्तकवचायुधान्॥ राक्षसान् प्रतिलंघ्याशु वानराः पर्यवा
रयन्॥ वानरा राक्षसाश्चैव व्यतिषक्ताः परस्परं॥ आविष्टा एव विध्यंत चक्रुस्तुमुलमद्भुतं॥ प्रवृत्तसंकुले सर्वं तस्मि १०.१४

प्रवामुरसमीरितः॥ युगांताग्निसमो वन्हिः कृष्यितरोमहर्षणं॥ ददर्श व्योम निलया लंकायां सुहिताभ्र
रा॥ कांचनानि विमानानि मुक्तावैडूर्यवंतिच॥ दह्यमानानि राजंते द्रुतेश्च सम्निवन्तदा॥ धूमजालपरीतांग्या
वहुनादहतार्द्दिताः॥ राक्षस्यो विनदंतिस्म वान्हिज्वालाभयाकुलाः॥ विमानेषु प्रसुप्ताश्च दह्यमाना वरांगनाः॥ त्यक्त
त्वाभरणसंयोगान् हाहेत्युच्चैः प्रचुकुशुः॥ काश्चिन् भर्तॄन् समालिंग्य निद्राणा नच संगताः॥ यथा सुप्तास्तथा दग्धाः
शयनेषु वरांगनाः॥ काश्चिन्निद्रापरीतास्या विमर्घनयनान्यथ॥ आदीप्तं गृहमालोक्य वालमादाय दुद्रुवुः॥ तत्रा
ग्निनापरीतानि भवंति भवनान्यथ॥ वज्रेणेव समाहतानि वशिराशिखराणि धराभृतां॥ तानि निर्दह्यमानानि हर
तः प्रचकाशिरे॥ हिमवच्छिखराणीव दह्यमानानि सर्वतः॥ हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वालितैस्तथा॥
रात्रे सा दृश्यते लंका सपुष्पैरिव किंशुकैः॥ त्राव्दैर्मुक्तगजैर्मुक्तैर्मुक्तैश्च तुरगैरपि॥ बभूव लंका लोकांते भ्रां
ग्राहइवार्णवः॥ अश्वं मुक्तं गजो वेगात् कश्चिद्द्रुतवेगतः॥ भीतः सोपि गजं दृष्ट्वा क्वचिदश्वोन्यवर्तत॥ अपरे हर्म्य
कक्षाश्च संनधाववारणाः॥ त्रस्ता वंधान् समाक्षिप्य येनतेन प्रदुद्रुवुः॥ पानीयं पातुमिच्छंतः परिभ्रमणतर्षि

साधवेवेप्रिशैलां ॥ तमापतंतं वेगेन कुंभश्चत्रिशिरायसैः ॥ त्रिभिश्चान्यैर्बिभेदाशु मातंगमिव तोमरैः ॥ सत्त्वरो घाविभि
न्नांगो वालिपुत्रः सपादपं ॥ शिलावर्षमचिंत्यात्मा ववर्ष रुचिरं रिपो ॥ ततश्चिच्छेद तान्वृक्षान् बिभेद च शिला शरैः ॥
कुंभकर्णात्मजः शूरो वालिपुत्रः समाहितः ॥ समुद्यतां शिलां क्रुद्ध आपतंतीं सुवेगिनं ॥ स्तनौ विव्याध बाणाभ्यां उ
ल्काभ्यामिव कुंजरं ॥ अंगदः पाणिना नेत्रे विमृज्य रुधिरोक्षिते ॥ शालमासन्नमेकेन परिजग्राह पाणिना ॥ नमि
दुकेनु प्रतिमं शाखं च भुजो वली ॥ उत्ससर्जांगदो वेगात् तं ददर्श द्रुमं च वक्ष्यत्व ॥ स चिच्छेद शितैर्बाणैः सपत्रैः साय
कारिभिः ॥ कुंभकर्णात्मजो वृक्षं सुपुंखैर्दशभिस्तदा ॥ ततः स कुंभः संधाय शरानग्निशिखोपमान् ॥ अंगदस्य
महावेगात्सुमोचोरसि राक्षसः ॥ स बध्यमानो निःसस्वर्णैः शरैः कांचनभूषणैः ॥ धिक्षितः शरवेगार्त्तः पपात च मुमोह च ॥
अंगदं पतितं दृष्ट्वा सीदंतमिव कुंजरं ॥ दुर्धर्षं राजपुत्रं प्रत्याघ्रेयवपद्यत ॥ रामः शिलाहस्तः कोपसंरक्तलो
चनः ॥ रिरक्षुरभ्यपात् अंगदं वानरर्षभः ॥ जांबुवांश्च सुषेणश्च वेगदर्शी च वानरः ॥ कुंभमभ्यद्रवन् दृष्टाः मेघा गिरि
मिवाशितुं ॥ समीक्ष्यपतः स्तांस्तु वानरेंद्रांस्तरस्विनः ॥ आवारयत्स बाणौघैर्यथा घोरानिवांबुदान् ॥ तस्य बाणपथं
प्राप्य नशेकुरतिवर्जितुं ॥ वानरेंद्रा महात्मानो वेलामिव महोर्मयः ॥ तांस्तु दृष्ट्वा हरीन् सर्वान् शरजालैः समावारितान् ॥
अंगदं पृष्ठतः कृत्वा भ्रातृपुत्रं महाहवे ॥ अभिदुद्राव सुग्रीवः कुंभकर्णात्मजं रणे ॥ शैलसानुचरं नागं वेगवानिव केसरी
यथा ॥ उत्पाट्य विविधान्वृक्षान् अश्वकर्णान्धवानपि ॥ अन्यांश्च विविधान्वृक्षान् संप्रक्षिपद्राक्षसे ॥ तां छा
द्यंतीमाकाशं वृक्षवृष्टिं दुरासदां ॥ कुंभकर्णसुतश्चित्रैः शरैश्चिच्छेद नैकधा ॥ अभिलक्ष्येण तीव्रेण कुंभेनाभिनि
तैः शरैः ॥ आचिता स्ते द्रुमा रेजुः यथा घोराः शतघ्नयः ॥ द्रुमवर्षं तु तं छिन्नं दृष्ट्वा कुंभेन वीर्यवान् ॥ वानराधिपतिः
श्रीमान्महासत्त्वो न विव्यथे ॥ निर्भिद्यमानः सहसा सहमानश्च तान्शरान् ॥ कुंभस्य धनुराक्षिप्य बभंजेंद्रायुधोपमं ॥
अवप्लुत्य ततः शीघ्रं कृत्वा कर्म सुदुष्करं ॥ अब्रवीत्कुपितः कुंभं भग्नशृंगमिव र्षभं ॥ निकुंभाग्रज वीर्यं ते बलं च महदद्भु
तं ॥ सन्नतिश्च प्रभावश्च तव वा रावणस्य च ॥ प्रभावस्त्वं तु नद्धमायायां लोकविशारद ॥ एकस्त्वमिह अज्ञातो पितुश्च ब
लवत्तरः ॥ त्वमेकोहि महावीर्य शक्रः ह सोरिमर्दनः ॥ त्रिदशानापि संक्रुद्धो निर्जितारणमर्धनि ॥ वरदानात्पि

तृत्यस्ते समेतान् देवदानवान्॥ कुंभकर्णस्य वीर्येण सहते चाबुधा नभ॥ धनुर्वेदं जितस्तुत्य: प्रतापाद्रावणस्य च॥
त्वमेको राक्षसानां ध्य श्रेष्ठोसि बलवीर्यत:॥ विमर्दमावयोरेनं समेतस्य ममत्वया॥ अद्यपश्यंतु भूतानि शक्रशंब
१००१६ रयोरिव॥ कृतमप्रतिमंकर्म दर्शितं चालकौशलं॥ पतिताश्च प्रवीरास्ते वयानुपमतेजस:॥ उपालंभभयाच्चैव नासि
धीरहतो मया॥ कृतकर्मा परिश्रांतो विश्रांत: पश्यमेबलं॥ तेन सुग्रीववाक्येन सावमानेन मानित:॥ अग्नेराज्य
हुतस्येव तेजस्तस्य प्रवर्धत॥ तत: कुंभ: समुत्पत्य सुग्रीवमभिपद्य च॥ आजघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना॥
चर्मप्रस्फुटितं चैव प्रसुस्राव च शोणितं॥ सतु मुष्टिर्महावेग: पतितो प्यास्थि संचये॥ वेगेनमहतस्तस्य तेज: समुत्पप
मि तत॥ वज्रनिष्पेषसंजाता: ज्वाला मेरोर्यथा हरे:॥ सतस्याभिहतस्तेन सुग्रीवो वानरेश्वर:॥ मुष्टिं संवर्तयामास
वज्रवेगं महाबल:॥ ज्वलितानलसंकाशं रविमंडलसंनिभं॥ मुष्टिं सपातयास कुंभस्योपरि वानर:॥ मुष्टिनाभिह
तस्तेन निपपातातुरो राक्षस:॥ लोहितांग इवाकाशात् दीप्तरश्मिर्यदृच्छया॥ कुंभस्य पततो रूपं भग्नस्योरसि मुष्टि
ना॥ रुधिरेणाभिपन्नस्य दधूरुर्गोपतेरिव॥ ततो हते तेन पराक्रमेण प्लवंगमानामृषभेन संयुगे॥ महासरे

नृवीरवरक्षये॥ अंगदाकंपनं वीरं आससाद रणोत्कट:॥ आहूय सोंगदमपि ताडयामास वेगत:॥ गदयाकंपन: श्रीमान्स
पपाताचलोपम:॥ संज्ञां प्राप्य च तेजस्वी चिक्षेप शिखरं गिरे:॥ मूर्ध्नि तत्राप तत्तस्य सपपात हतो भुवि॥ हतप्रवीरा भाथि
ता राक्षसं दृश्य साचमू:॥ जगामाभिमुखी तूर्णं कुंभकर्णसुतो यत:॥ आपतंतीं च वेगेन तां कुंभो सांत्वयं चमूं॥ अथोद्दृष्ट्वा
महावेगे लब्धलक्ष्ये: प्लवंगमे:॥ स धनुर्धारिणां श्रेष्ठो विकृष्यापि समाहित:॥ मुमोचाशीविषप्रख्यान् शरान्मूहस्य वै
र्यवान्॥ तस्य तत् शुशुभे भूय: सशरं धनुरुत्तमं॥ विद्युदैरावतार्चिष्मन् द्वितीयेंद्रधनुर्यथा॥ तेन हाटकवर्णेन पत्रि
णा चित्रवाससा॥ आकुंडलविकृष्टेन विव्याध द्विविदं बली॥ सतथाभिहतस्तेन विप्रमुक्तपदस्त्वरन्॥ निपपातात्रि
कूटाभो द्विविदो गाढवेदन:॥ मैंदस्तु भ्रातरं दृष्ट्वा विकलं गाढवेदनं॥ कुंभमभ्यपतत् वेगात्प्रगृह्य महतीं शिलां॥
तां शिलां सन्नताजालो नमोचिक्षेप राक्षसे॥ तां बिभेद तदा कुंभ: पतितां पंचभि: शरै:॥ संधाय सायकं तीक्ष्णं
मुमोच सुसमाहित:॥ वक्षस्युपरि चितेवासौ मैंदं विव्याध राक्षस:॥ स वानरवरस्तेन मैंदस्तु दृढमाहत:॥ रुधि
रक्तस्ततो भूमौ निपपाताभिमूर्छित:॥ ततोंगदस्तौ पतितौ मातुलौ वभिजौ जांबवान्॥ अभिदुद्राव वेगेन कुंभम

१००१६

परिघं भास्करप्रभं॥ बलवीर्यवतस्तस्य पातयामास वक्षसि॥ स्थिरे तस्योरसि व्यूढे परिघः शतधा गतः॥ विकीर्यमाणः
प्रभयाप्युल्काशतानिरिवांबरे॥ स तु तेन प्रहारेण विचचाल महाकपिः॥ परिघेण समाधूतो यथा भूमिचले ऽचलः॥
स तथाभिहतस्तेन हनूमान्प्लवगर्षभः॥ मुष्टिं संवर्त्तयामास वज्रवेगोपमं बली॥ तमुद्यम्य महावीर्यो निकुंभस्यानिज
घवान्॥ अभिसंपातयामास सवेगवान्समिमर्दिषु॥ ततः प्रस्फोट्य चर्मास्य प्रसुस्राव च शोणितं तदा॥ मुष्टिनातेन संज
ज्ञेऽथालाविघ दिवोत्थिता॥ स तु तेन प्रहारेण व्यजंभत मुहुर्मुहुः॥ अथ चस्यायुधि जग्राह हनूमंतं स राक्षसं॥ ततो रक्षोभि
रत्युकृष्टं भीमं लंकागतैरपि॥ निकुंभेनोद्धृतं दृष्ट्वा हनूमंतं जयैषिणा॥ स तथा ह्रियमाणोपि कुंभकर्णसुतं तदा॥ नि
जघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना॥ उत्क्षिप्य स हनूमंतं निपिष्येषाग्नीर वीर्यवान्॥ मोक्षयित्वात्मनात्मानं क्षि
तिमभ्यवपद्यत॥ जहौ निष्पत्य तु उत्पपात निकुंभं मारुतात्मजः॥ निजघान महावीर्यो मुष्टिना राक्षसोत्तमं॥ स तथाह
न्यमानोपि कुंभकर्णात्मजो बली॥ आजघानानिलसुतं वज्रकल्पेन मुष्टिना॥ स तथाभिहतस्तेन प्रगृह्य घनयनेकपिः॥

समुत्पत्य स वेगेन निपपातास्य वक्षसि॥ परिगृह्य च बाहुभ्यां आवृत्य च शिरोधरं॥ अपातयत्तस्य शिरो भैरवं निनदं स्वरं॥
अथ विनर्दति संहते निकुंभे पवनसुतेन बभूव तत्र युद्धं॥ दशरथसुतराक्षसेंद्रसून्वोर्भृशतरमायत रोषयोः सुभीमं॥
इति निकुंभवधो नाम सर्गः॥ ॥निकुंभं निहतं दृष्ट्वा कुंभं चैव निपातितं॥ रावणः परमामर्षी प्रजज्वाल यथानलः॥
नैर्ऋतः क्रोधशोकाभ्यां याभ्यां तु परिमूर्छितः॥ ततः संचिंत्य मनसा दशग्रीवश्चिरात्स्वयं॥ खरपुत्रं विशालाक्षं मकराक्ष
मनोदयत्॥ गच्छ पुत्र मयाज्ञप्तो बलेन महता वृतः॥ राघवं लक्ष्मणं चैव जहि तौ च वनौकसः॥ शल्यमुधर्मोक्षिप्तं
रूपो रुषमुपाश्रितः॥ अयं ते राक्षसैर्वीरैः पृष्ठतो नुगमिष्यति॥ खरस्य सदृशो वीर्ये त्वमस्यामितविक्रमः॥ त्वं हि हि
यास्त्रविद्वश्च मायायां रणविशारदः॥ एवमुक्तस्तु रावणेन सुतः समुत्थाय सनाद्भुतं॥ स च यं गंधैश्च माल्यैश्च वा सोभिज्ञर्य सं
३०० मर्षयत्॥ रावणस्य वचः श्रुत्वा खरपुत्रोऽरावणात्मजः॥ वाटमित्यब्रवीद्धृष्टो मकराक्षो निशाचरः॥ सोभिवाद्य दश
१२३ ग्रीवं कृत्वा चापि प्रदक्षिणं॥ रथमानीयतां क्षिप्रं सैन्यं चेत्यब्रवीत्तदा॥ तस्य तद्वचनं श्रुत्वा बलाध्यक्षो निशा

चरः॥ सोभिवाद्यदशग्रीवं कृत्वाचाभिप्रदक्षिणं॥ रथआनीयतांक्षिप्रं सैन्यंचेत्यब्रवीत्तदा॥ तस्य तद्वचनं
श्रुत्वाबलाध्यक्षोनिशाचरः॥ स्यंदनंचबलंचैव समीपंसमुपानयत्॥ प्रदक्षिणं रथंकृत्वाह्यारुरोहनिशाचरः॥ सूतं
संचोदयामास शीघ्रंमास्तत्रवाहय॥ अथतान् राक्षसान्सर्वान् मकराक्षोब्रवीदिदं॥ आगच्छतत्रयास्यामोपुरो
ममराक्षस॥ अहंराक्षसराजेन रावणेनमहात्मना॥ आज्ञप्तः समरेहंतुं तावुभौरामलक्ष्मणौ॥ अद्यरामंवधिष्यामि
लक्ष्मणंचनिशाचराः॥ शाखामृगंचसुग्रीवं वानरांश्चशरोत्तमैः॥ अद्यशूलनिपातैश्चवानराणांमहाचमूं॥ प्रदहि
ष्यामिसंप्राप्यशुष्कंधनमिवानलः॥ मकराक्षवचः श्रुत्वातेतुघोरानिशाचराः॥ सर्वेनानायुधोपेताः बलवंतोऽति
वेगिनः॥ तेकामरूपिणः शूराः दंष्ट्रिणः पिंगलेक्षणाः॥ मातंगाइवनर्दंतोध्वस्तकेशानिशाचराः॥ परिवार्यमहा
वीरंमहाकायंखरात्मजं॥ अभिजग्मुः सहाहृष्टाश्चालयंतोवसुंधरां॥ शंखभेरीसहस्राणां आहतानांतुसर्वतः॥
क्ष्वेडितास्फोटितानांतु तत्रशब्दोमहानभूत्॥ प्रभ्रष्टोथकरात्तस्य प्रतोदः सारथेस्तदा॥ पपातसहसाचैव

महीसंतोलयंचित्रचालसागराभयंचरक्षसांत्याधिकंसमाविशत्॥ इतियुध्धयुध्धकांडेकुंभवधोनामसर्गः॥ ॥निकुंभोभ्रा
तरंदृष्ट्वासुग्रीवेणनिपातितं॥ प्रदहन्निवकोपेन सुग्रीवंप्रत्यवैक्षत॥ ततःस्रग्दाममाल्यंचदत्तपंचांगुलंशुभं॥ आ
ददेपरिघंवीरोमहेंद्रशिखरोपमं॥ विनध्रमायसैः खड्गैः हेमैर्ज्वलितमायसं॥ यमदंडोपमंघोरंरक्षसांभयनाश
नं॥ तमाविध्यमहातेजामहाशक्रायुधोपमं॥ विननादविवृत्तास्योनिकुंभोभैरवस्वरं॥ उरोगतेननिष्केणभुजस्थैर
पिचांगदैः॥ कुंडलाभ्यांसुमृष्टाभ्यांमालयाचसुविचित्रया॥ निकुंभोभूषणैर्भातिपरिघेणायसेनच॥ यथेंद्रधनुषा
मेघः सविद्युत्स्तनयित्नुमान्॥ परिघाग्रेणतस्याथपवनग्रंथिमहास्वनं॥ जज्वालचसधूमोग्निसंघर्षादिवपावकः॥
नगर्याविटपावत्या गंधर्वनगरेरपि॥ सहैवचामरावत्यासर्वैश्चभुवनैःसह॥ सतारागणनक्षत्रंसचंद्रंसमहाग्रहं॥ निकुं
भपरिघाघूर्णंभ्रमतीवनभस्तलं॥ दुरासदः सुसंकोपात्परिघाभरणप्रभः॥ कोपेन्धितोनिकुंभोग्निर्युगांताग्निरिवो
त्थितः॥ राक्षसावानराश्चैवनशेकुःस्पंदितुंभयात्॥ हनूमांस्तुविवृत्योरस्तस्थौप्रमुखतोबली॥ परिघोपमबाहुस्तु घो

हृष्टाः युध्यन्तोजितकाशिनः ॥ विद्रुवत्सु तदा तेषु वानरेषु समंततः ॥ रामः स्तान्वारयामास शरवर्षेण राक्षसान् ॥ वारि
तान्राक्षसान्दृष्ट्वा मकराक्षो निशाचरः ॥ क्रोधानलसमाविष्टो वचनंचेदमब्रवीत् ॥ स्थासौरामः सु
दुर्बुद्धिर्येन मे निहतः पिता ॥ जनस्थाने गतः पूर्वं सानुजः सपरिच्छदः ॥ अद्य गतोस्मि वैरस्य पारं वै रजनीचराः ॥
तयोः शोणितनिष्यंदे करिष्ये सलिलक्रियां ॥ एवमुक्त्वा महाबाहुः युधे सुरजनीचरः ॥ आलोकयत्ततः सर्वं वलंरा
मदिदृक्षया ॥ आहूयमानो बहुभिः वानरैर्बहुशालिभिः ॥ युधाय स महातेजाः रामादन्यैर्न इच्छति ॥ मार्गमाणस्तदारा वे
मं बलवान्रजनीचरः ॥ रथेनांबुदघोषेण विचचारामनीकिनीं ॥ दृष्ट्वा राममदूरस्थं लक्ष्मणं च निशाचरः ॥ सेषुणा
पाणिनाहूय इदं वचनमब्रवीत् ॥ तिष्ठ राम मया सार्धं द्वंद्वयुद्धं प्रयच्छ मे ॥ त्वांप्राणांस्त्याजयिष्यामि धनुर्मुक्तैः शितैः श साज
रैः ॥ यत्तदा दंडकारण्ये पितरं हतवानसि ॥ अनागसं स्वकर्मस्थं श्रुत्वा कोपोभिवर्त्तते ॥ दह्यंते चापि चांगानि दुरात्म
न् मम राघव ॥ यन्मया हि न दृष्टस्त्वं तस्मिन् काले महाहवे ॥ दिष्ट्यासि गोचरो राम त्वमद्य मम गोचरे ॥ कांक्षि
तस्य क्षुधार्त्तस्य सिंहस्येव वने मृगाः ॥ अद्य मद्बाणवेगेन प्रेतानां विषयं गतः ॥ येत्वया निहतास्तत्र तैः सहत्वं

समेष्यसि ॥ बहुनात्र किमुक्तेन शृणु राम वचो मम ॥ पश्यंतु लोकाः सकलाः त्वां मां चैव रणाजिरे ॥ अस्त्रैर्वा गदया वापि
बाहुभ्यां वा महाहवे ॥ अभ्यस्तं मे न यद्राम वर्त्ततां तेन नो मृधं ॥ तेन मां प्रतियुध्यस्व येन ज्ञातोसि सत्कुले ॥ अद्य मद्बाण
क्षि निर्भिन्नस्त्वस्तांसं क्षितिंजोक्षितं ॥ क्रव्यादसंघाः कर्षंतु रणे रेणुपरिष्कृतं ॥ मद्बाहुगोचरगतः सांप्रतं न भविष्यति ॥ भक
राक्षसवचः श्रुत्वा रामो दशरथात्मजः ॥ अब्रवीत्प्रहसन्वाक्यं उत्तरोत्तरवादकं ॥ चतुर्दशसहस्राणि रक्षसां त्वत्पिता च
सः ॥ त्रिशिरा दूषणश्चैव हता मे दंडके वने ॥ स्वादितास्तत्र मांसेन गृध्रगोमायुवायसाः ॥ भविष्यंत्यद्य वै पाप तीक्ष्णतुंडनख
युधाः ॥ रुधिरार्द्रमुखा हृष्टा रक्तपक्षाश्चरंति हि ॥ खगता वसुधांचे भ्रमिष्यंति समंततः ॥ कत्थसे किं वृथा भद्र बहून्यस
दृशान्यपि ॥ न रणे शक्यते जेतुं विना युद्धेन वाग्बलात् ॥ एवमुक्तस्तु रामेण खरपुत्रो निशाचरः ॥ बाणौघान् सुमुचे तस्मै
राघवाय रणाजिरे ॥ तान्शरान् शरवर्षेण रामश्चिच्छेद नैकधा ॥ निपेतुर्भुवि ते छिन्ना रुक्मपुंखाः सहस्रशः ॥ तद्युद्ध
मभवत्तत्र समेत्यान्योन्यमोजसा ॥ खरराक्षसपुत्रस्य रामस्य च महात्मनः ॥ जीमूतयोरिवाकाशे ज्याघाततलयो
स्तयोः ॥ धनुर्मुक्तस्य नोद्घुष्टः श्रूयते हि रणाजिरे ॥ देवदानवगंधर्वाः किन्नराः समहोरगाः ॥ अंतरिक्षगताः

सर्वे द्रष्टुकामाः स्तदद्भुतं ॥ विधूमन्योन्यगात्रेषु द्विगुणं वध्यते परः ॥ कृतप्रतिकृतेऽन्योन्यं कुर्वाणौ तौ रणाजि
रे ॥ शरौघसंततः सर्वा दिशः दिशः सविदिशास्तथा ॥ संछिन्नाव सुधा चैव समंतान्न प्रकाशते ॥ समम्
र्षात्सुतान् बाणान् राक्षसो विच्छिन्न द्रुणे ॥ रक्षोमुक्तांश्च रामो वै नैकधा प्राच्छिनच्छरैः ॥ ततः क्रुद्धो महाबाहुर्ध
नुश्चिच्छेद सायकैः ॥ अष्टाभिरथ नाराचैः सूतं विव्याध राघवः ॥ भित्वा परं रथं रामो रथाश्वान् मोक्षयन् ॥ वि
रथो वसुधां प्राप्य मकराक्षो निशाचरः ॥ अधिकं क्रोधसंपन्नः शूलं जग्राह पाणिना ॥ त्रासनं सर्वभूतानां युगांत
ग्निसमप्रभं ॥ परिभ्राम्याथ तच्छूलं प्रज्वलत् सा निशाचरः ॥ क्रोधात् संप्राहिणो — त्तस्मै राघवाय महात्मने ॥
आपतंतं ज्वलंतं तु खरपुत्रकरच्युतं ॥ बाणैः सत्रिभिराकाशे शूलं चिच्छेद राघवः ॥ तच्छिन्नं च हृधा शूलं दिव्यहा
टकभूषितं ॥ विदायतं महोल्केव रामबाणार्दितं शरं ॥ तच्छूलं निहतं दृष्ट्वा रामेणाद्भुतकर्मणे ॥ साधु साध्विति
भूतानि व्याहरंत नभस्तले ॥ तत् दृष्ट्वा विफलं शूलं मकराक्षो निशाचरः ॥ मुष्टिमुद्यम्य काकुत्स्थं तिष्ठति

राक्षसस्य रथाद्वसः ॥ तस्य ये रथयुक्तास्ते हयविक्रमवर्जिताः ॥ चरणै राकुले गत्वा साश्रुपातमुखाययुः ॥ प्रवाति पवनस्त
स्य सपांशुः खरनिस्वनः ॥ निर्याणे याति रौद्रेण मकराक्षस्य दुर्मतेः ॥ तानि दृष्ट्वा निमित्तानि राक्षसा वीर्यसंमताः ॥ अस
चिंत्य गताः सर्वे यत्र तौ रामलक्ष्मणौ ॥ घनगजमाहिषांगतुल्यवर्णाः समरमुखेष्वसकृद्गदासिभिन्नाः ॥ अहम
हमिति युद्धलालसास्ते रजनिचराः परिबभ्रमुर्नदंतः ॥ इति मकराक्षनिर्याणो नाम सर्गः ॥ निर्गतं मकराक्षं ते दृ
ष्ट्वा वानरपुंगवाः ॥ आप्लुत्याप्लुत्य सहसा ययाक्रम्य व्यवस्थिताः ॥ ततः प्रवृत्तं युद्धं तु तुमुलं रोमहर्षणं ॥ निशाच
रप्लवंगानां देवानां दानवैरिव ॥ शरशूलनिपातैश्च शिलापरिघपातनैः ॥ अन्यान्य पोथयंतस्म तदा कपिनि
शाचराः ॥ शक्तिशूलगदाखड्गैः तोमरैश्च निशाचराः ॥ पट्टिशैर्भिंडिपालैश्च बाणपातैश्च संततं ॥ पाशमु
द्गरखड्गैश्च निर्घातैस्तथापरैस्तदा ॥ कदनं कपियूथानां चक्रुस्ते रजनीचराः ॥ शरैर्ब्रभिंडिपालैश्च खरपुत्रेण वा
नराः ॥ संभ्रांतमनसः सर्वे दुद्रुवुर्भयपीडिताः ॥ तान् दृष्ट्वा वानरान् सर्वान् द्रवमाणान्वनौकसः ॥ नेदुस्ते सिंहवत्

निशाचराः॥ वभ्रमुर्नष्टसंज्ञाश्च मत्ताः पर्वतशादिताः॥ भग्नजंघोरुपृष्ठाश्च केचित् विनिहताभुवि॥ अभ्यद्रवंत
सहसाराक्षसाभीमविक्रमाः॥ भिन्नोष्ठाभिन्नहनवोराक्षसाभिन्नमस्तकाः॥ सुस्रुवुः शोणितंभूरि नागागैरि
कधातुवत्॥ निहतैर्हन्यमानैश्च पतद्भिः पर्वतैरपि॥ स्वनद्भिर्वृक्षचेष्टैश्च क्रूरमायोधनंबभौ॥ राक्षसाबहवस्तत्र निहता
वानरैरपि॥ आधावंतः परस्थल्यां लंकामेव निशाचराः॥ तेषांप्रद्रवतांलंका प्रचकंपे समंततः॥ वानरास्तेभयार्ता
नांराक्षसानांसमंततः॥ इंद्रजित्तु ततः क्रोधात्महात्मा समहाबलः॥ वानराणांशरीराणि व्यधिधद्रावणात्म
जः॥ शरेणैकेनचहरीन्नवसप्तचपंचच॥ बिभेदसमहान्क्रुधो ~~महात्मासमहाबलः~~ राक्षसानुसंप्रहर्षयन्॥ स
शरैः सूर्यसंकाशैः शातकुंभविभूषितैः॥ वानरान्समरेभीमः प्रममाथसुदुर्जयः॥ ततोष्टादशभिर्बाणैः द्विविधंगंध
मादनं॥ विव्याधदशभिश्चैवनलंदूरादवस्थितं॥ सप्तभिश्चमहावीर्यो नीलंमर्मविदारणे॥ पंचभिर्निशितैश्चैवग
जंविव्याधमार्गणैः॥ अपरैः सप्तभिर्बाणैः वानराश्चसरणाजिरे॥ अपविध्यतचैकैकं सप्तभिः सप्तभिः शरैः॥
ततः स्तेवानराः शूराः भिन्नदेहाविचेतसः॥ व्यथिताविद्रवंतिस्म रुधिरेण समुक्षिताः॥ केचिच्छिन्नोरश्चरस्त्व

क्रूर्विभिन्नावानरारणे॥ रक्षोबाणहताः केचित्निपेतुश्चगतासवः॥ तेहन्यमानाबाणौघैः स्तेनामित्रेण संयुगे॥ श
रुभाइवसंपेतुर्वानराः सर्वतोदिशं॥ केचिदारुरुहुर्वृक्षान् केचिच्चधरणीधरान्॥ केचिदाप्लुत्यसहसा वानरास्तुगता
वः॥ केचिच्चतत्रयुध्यंतेयोधव्रतमनुव्रताः॥ ततद्रावयोधिनस्तस्य संग्रामे हृष्टविक्रमाः॥ विद्राव्यवानरान्सर्वानिंद्र
२ जित्समितिंजयः॥ रणात्पर्ययौशीघ्रंस्वांपुरींरावणात्मजः॥ हतेषुतेषुरक्षःसु रावणोराक्षसाधिपः॥ आदिदेशाथ
संक्रुद्धोरणायेंद्रजितंपुनः॥ जहिवीर्यमहावीर्यौरणेरावणलक्ष्मणौ॥ अहत्वयोदृश्यमानौच सर्वथात्वंबलाधिकः॥
वानरंचैवसुग्रीवं वानरार्यंबिभीषणं॥ त्वमप्रतिमकर्माणमिंद्रंजयसिसंयुगे॥ किंपुनर्मानुषौदृश्यौनहनिष्यसिपुत्रक॥
तथोक्तोराक्षसेंद्रेणपरिगृह्यपितुर्वचः॥ यज्ञभूमौसविधिवत् जुहावाग्निमथेंद्रजित्॥ जुहृतश्चापितत्राग्निं रक्षसा
भीमकर्मणः॥ आजग्मुस्तत्रविक्रांताः राक्षसायत्ररावणिः॥ दर्भाश्चशरपत्राणि समिधोथबिभीतकाः॥ लोहितानिच
वासांसि स्रुवंकार्ष्णायसंतथा॥ सर्वाग्निंसमास्तीर्य शरपत्रैः सतोमरैः॥ छागस्यकृष्णात्कंठस्यछित्वाअग्राहतो
ता

णितं॥ जुहावसमहातेजाः ततोयत्रेमहार्चिषः॥ बभूवुस्तानिलिंगानि विजयं चिजयं प्रतितस्यवै॥ प्रदक्षिणावर्त्तशिखः स
तप्तहाटकसंन्निभः॥ हविः स्तत्प्रतिजग्राह पावकस्वयमुत्थितः॥ हुत्वाग्निंतर्पयित्वाच देवदानवरक्षसान्॥ आरुरो
हरथंदीप्तं अंतर्धानगतंशुभं॥ सवाजिभिश्चतुर्भिश्च बाणैश्चनिशितैर्युतः॥ जाज्वल्यमानोवपुषा तपनीयविभूषितः॥
शरैश्चंद्रार्धचंद्रैश्च सरथः समलंकृतः॥ जांबूनदमहाकंचु दीप्तपावकसंन्निभः॥ बभूवेंद्रजितः केतुर्वैडूर्य समलंकृतः॥
तेनचादित्यसंकल्पेन ब्रह्मणास्त्रेणपालितः॥ सबभूवदुराधर्षो रावणिः समहाबलः॥ भुजवीर्येणचश्रीमान् अस्त्रेणच
समायुतः॥ सोभिनिर्यायनगरात् इंद्रजित्समितिंजयः॥ हुत्वाग्निंराक्षसैर्मंत्रैः अंतर्धानगतोब्रवीत्॥ अद्याहंतौमहा
वीर्यौमिथ्याप्रव्रजितौरणे॥ जयंपित्रेप्रदास्यामि हत्वातौ रामलक्ष्मणौ॥ अद्यनिर्वानरीमुर्वी हत्वराघवलक्ष्मणौ॥ करिष्ये
परमक्रुध्दइत्युक्त्वांतरधीयत॥ उत्पपातससंक्रुद्धोरावणेनप्रणोदितः॥ तीक्ष्णकार्मुकनाराचैःपर्जन्यइववृष्टिमान्॥
ततोवैहायसंप्राप्य सरथंरामलक्ष्मणौ॥ धनुषीविततेकृत्वादिव्याण्यस्त्राणिचक्रतुः॥ प्रच्छादयंतोगगनं शरजालैर्म १.२२
हाबलौ॥ तौबाणैः सूर्यसंकाशैर्नैवजघ्नुः सुरासुरं॥ सबाणवृष्टिं विविधां तच्चनप्रच्छादयन्नभः॥ सचादिश्श्चस

हतिचाब्रवीत्॥ सत्तंदृष्ट्वापतंतंतु प्रहस्यरघुनंदनः॥ पावकास्त्रंततोरामः संदधेस्वशरासने॥ तेनास्त्रेणहतंरक्षः काकु
त्स्थेनतदारणे॥ सभिन्नहृदयस्तत्रपपातचममारच॥ ततस्तेराक्षसाः सर्वेमकराक्षेनिपातिते॥ लंकामेवाभ्यधावंतरा
मबाणार्दितास्तदा॥ दशरथतनयपुत्रबाणैर्कोरजनिचरंनिहतंरवराभ्मजंतं॥ ददृशुरतिबलंसुराःप्रहृष्टाःगिरिमि
वव्रजहतंक्षणाद्विशीर्णं॥ इतिमकराक्षवधोनामसर्गः॥ निहतंमकराक्षंतु दृष्ट्वारामेणसंयुगे॥ शक्रजित्सुमहा
नक्रुद्धोविवेशरणसंकटं॥ ततोयुद्धंसमभवद्रक्षसांवानरैःसह॥ निघ्नतांतत्रचान्योन्यं निशाचरवनौकसां॥ आ
जौडुमिवरुद्रस्यततः कालान्तयेपरहन्॥ रावणिस्तुसुसंक्रुधो तानुवाचनिशाचरान्॥ युध्यंतसर्वेतोहृष्टाः वा
नराणांजिघांसया॥ ततस्तेराक्षसाः सर्वेनदंतोयुधयुद्धकांक्षिणः॥ अभ्यवर्षंस्तदाघोरा वानरान् शरवृष्टिभिः॥
तेवध्यमानाः समरे वानराः पादपायुधाः॥ अभ्यद्रवंतः सहसाराक्षसान्भीमविक्रमाः॥ केचित्शृंगाणिसं
गृह्य मुष्टिमुद्यम्यचापरे॥ वानराः समरेतस्मिन् राक्षसान्जघ्नुराहवे॥ जानुभ्यांनिहताकेचित् वानरैस्ते

तुः शतशः स्तरः च्चबहिनो धरणीतले ॥ लक्ष्मणस्तत्र संभ्रांतः क्रुद्धो भ्रातरमब्रवीत् ॥ ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं स
र्वरक्षसां ॥ तमुवाच ततो रामो लक्ष्मणं शुभलक्षणं ॥ नैकस्य हेतो रक्षांसि सर्वाणि हंतुमर्हसि ॥ अयुध्यमानं प्रच्छ
न्नं प्रांजलिं शरणागतं ॥ बालं प्रसुप्तं मत्तं वा नत्वं हंतुमिहार्हसि ॥ अस्यैव तु वधे यत्नं करिष्यामि नरर्षभ ॥ आदेक्ष्या
मो महावेगान् कामगान् हरियूथपान् ॥ एतच्च मार्गयिष्यंति दृष्ट्वा वानरपुंगवाः ॥ अयं च भूमिं विशते दुरात्मा रसातलं
वा यदि नभस्तलं वा ॥ यदाहि निरुद्धो हि मदस्त्रदग्धः पतिष्यते भूमितले गतासुः ॥ इत्येवमुक्त्वा वचनं महायशाः
रघुप्रवीरः प्लवगर्षभैर्वृतः ॥ वधाय रौद्रस्य नृशंसकर्मणः तदा महात्मा त्वरितं निरीक्षत ॥ इंद्रजिदादेत्रा सर्गः ॥
विज्ञाय मतिं तस्य राघवस्य महात्मनः ॥ संनिवृत्याहवात्तस्मात् प्रविवेश महापुरीं ॥ सोकरोच्च वधं तेषां राक्षसानां त
रस्विनां ॥ रोषताम्रेक्षणो वीरो निर्जगाम पुनर्बली ॥ सपश्चिमेन द्वारेण प्रययौ राक्षसेश्वरः ॥ इंद्रजित्परमोद्वि
ग्नः परेषां जनयन् भयं ॥ मेघनादस्ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ॥ रणायाभ्युद्यतौ वीरौ मायां चैवाकरो

त्तदा ॥ रथं ततो व्यवस्थाप्य रावणी राक्षसैर्वृतः ॥ सीतां मायामयीं कृत्वा तस्यां वधमरोपयत् ॥ स सर्वेषां तु हितार्थं तु
कृत्वा बुद्धिं सुदुर्मतिः ॥ हंतुं सीतां व्यवसितः कपीनामभितो ययौ ॥ तं दृष्ट्वा तु विनिर्यांतं काननात्काननौकसः ॥ उत्पेतु
रभिसंरब्धाः शिलाहस्ता युयुत्सवः ॥ हनूमान् पुरतस्तेषां जगाम हरियूथपः ॥ उद्यम्य सुमहच्छृंगं पर्वतस्य दुरास
दं ॥ स ददर्श निरानंदां स्थितामिंद्रजितो रथे ॥ एकवेणीधरां सीतां रक्षोहरणकर्शितां ॥ पतिशोकैकवसनां मंडनार्हाम
मंडितां ॥ रथे रेणुसमादिग्धां भर्तारं कांक्षतीं वराननां ॥ रजोमलाभ्यामालिप्तसर्वगात्रीं वरांगिनीं ॥ ददर्श हनुमान्स्त
त्रसपंकामिव पद्मिनीं ॥ मुहूर्तमिव संतीर्य मिति निश्चित्य वानरः ॥ अपश्यदिव संदृष्टा ह्रितेन साजनकात्म
जां ॥ तां दीनां मलदिग्धांगीं रथस्थां लक्ष्य मैथिलीं ॥ बाष्पपर्याकुलमुखो हनूमान् व्यथितो भवत् ॥
अभीतां चैव शोकार्तां निरानंदां तपस्विनीं ॥ दृष्ट्वा सीतां रथस्थस्य रावणेः सुदुरात्मनः ॥ किंचि

कीर्तितमस्योक्तिचिंतयन्नूसमहामतिः ॥ सहैवर्वामेरः सर्वेरभ्यापेचनवारवर्णिणं ॥ तद्दृष्ट्वाम्बर बलदृष्ट्वा रावणिः क्रोधमूर्छित

१०२४ कृत्वाविकोशांनि स्त्रंतो प्रजहास महास्वनं ॥ अग्रस्थ्चच सकेत्रोषु रावणिर्जनकात्मजां ॥ क्रोशंती रामरामेति दृष्टूमा

यामयींतदा ॥ प्रववर्तमसिंगृह्य कटापुक्षपरामृशत् ॥ ग्रहीतांतांतदादृष्टूहनूमान्दैन्यमागतः ॥ सुदुःखवारिने

त्राभ्यां उत्सृजन्नूपवनात्मजः ॥ अब्रवीत्सरसक्रुधो रावणिपर्यसर्त्संयन् ॥ नृशंसा नार्दुतिशुद्रपापविनिश्चय ॥

ब्रह्मर्षीणांकुलेजातां राक्षसीं योनिमास्थितं ॥ धिकृत्वा पापसमाचारं यस्यतेमनिरीदृशी ॥ अकार्यं नाद्यतेधा

यें ईदृशंमुविगर्हितं ॥ च्युतोरामाद्रामहस्ता व्योमस्थितो ॥ अनागसंतुविवशां अपापांकिंजिघांससि ॥

सीतांहत्वाचनचिरात् जीवितंमा हसेप्रियं ॥ वधार्हकर्मणानेनममहस्तागतोह्यसि ॥ येचैवं स्त्रीघा

तिनोलोकापैर्वेबाबावद्यघातिनः ॥ इहजीवितमुत्सृज्य प्रेत्यतानुपभोक्ष्यसे ॥ एवंब्रुवाणंह १०२४

कृद्धानीकाहरैर्तिमराकृतः ॥ नैवज्याघोषनिर्घोषो नापिवाजिखुरस्वनः ॥ शुश्रुवेचरतस्तस्य नचरूपंप्रकाश्यते ॥ रथेननातिमिरा

वृतेनरणा ॥ ओरंध्योम्निसमाश्रितेन ॥ भर्तुः सशारवामृगयूथपानांचकार कृत्स्नानिरणेप्रहृष्टः ॥ इन्द्रजितयुद्धनामसर्गः ॥ ॥

घनांधकारतिमिरे शिलावर्षमभूत्सुनः ॥ ववर्षसमहाबाहुः नाराचशरवृष्टिमान् ॥ सरामंसूर्यसंकाशैः घोरैश्वसितैःशि

तैः ॥ विभेदसमरेक्रुद्धः सर्वगात्रेषुरावणिः ॥ तौहन्यमानौनाराचैः धाराभिरिवपर्वतौ ॥ हेमपुंखान्नरव्याघ्रौ बाणान्मुमुचतुः

शरैः ॥ अंतरिक्षात्समासाद्यरिपुंकंकपत्रिणः ॥ निकृतापन्नगाभूमौ निपेतुः शोणितस्रवाः ॥ अतिमात्रंशरौघेणपीड्यम

नौरघूत्तमः ॥ शरान्संपततोमूर्भौ अथचैकंद्विधाकरोत् ॥ यतोयतोहिददृशेशरान् आपततःशितान् ॥ ततस्ततोदाशर

थिः ॥ घससर्जशरोत्तमान् ॥ रावणिस्तुततोवीरैः रथेनातिरयः पतन् ॥ विव्याधतौराजपुत्रौ रथस्थौनिशितैःशरैः ॥ तौ

नातिविद्धौतौवीरौरुक्मपुंखैःशितैःशरैः ॥ बभूवतुस्तदारक्तौ बंधुजीवसमोपमौ ॥ नास्यवेदगतिंकिंचित् नरूपं

नधनुस्वनं ॥ नचैवास्यगतिंकश्चित् सूर्यस्याभ्रसंप्लवे ॥ तेनविद्धाश्चहरयो निहताश्चगतासवः ॥ निपे

नं॥ रिपुभयजननंनिशम्य तेभयचकिताहरयः प्रकंपिरे॥ तथापि सीतांहत्वा सचकंपमे तोविनिहस दुर्मतिः प्रहृ
ष्टचेताःसबभूवराबणिः॥ प्रहृष्टरूपंचनिरीक्ष्य वानराः विषण्णरूपाः समभिप्रदुद्रुवुः॥ विषण्ण वलिनं बलीय
सो बलाधिकंशत्रु बलप्रमर्द्दनं॥ विहाय संग्रामशिरोगतंतदा प्रतस्थिरे वायुसुते तरक्षिनं॥ इत्यार्षे श्रीरामायणेयु
धकांडे सीतावधोनामसर्गः ॥ ॥ श्रुत्वातंभीमनिर्ह्रादंशक्रचापविनिस्वनं॥ वीक्षमाणादिशः सर्वाः दुद्रुवुर्वा
नरर्षभाः॥ तानुवाचहरीन्सर्वान् हनुमान्मारुतात्मजः॥ विषण्णवदनान्दीनान् त्रस्तान्विद्रवतः पृथक्॥
किमिदं विषण्णवदनाः विद्रवंति प्लवंगमाः॥ त्यक्त्वा युद्धसमुत्साहं शूरत्वं क्व गतं॥ पृष्ठतोनुव्रज ध्वंमामग्र
तोयांतमाहवे॥ शूरैरभिजनोपन्नैः नयुक्तंविनिवर्तितुं॥ इत्येवमुक्ताहरयः समारोपितविक्रमाः॥ शैलशृंगा
णिजगृहुः द्रुमांश्चविविधान्बहून्॥ अभिप्रेयचनर्दंतो राक्षसावानरर्षभाः॥ परिवार्यहनूमंतं अन्वयुस्तेमहाह
वे॥ सर्ववानरमुख्यैस्तु हनूमान्परिवारितः॥ हुताशन इवार्चिष्मान् व्यदहत्शत्रुवाहिनीं॥ सराक्षसानांक
दनंचकारसुमहाबलः॥ वृतोवानरसैन्येन कालांतकयमोपमः॥ सतुशोकसमाविष्टः कोपेनचमहाकपिः॥

हनुमान्राक्षसरथेपातयत्महतीं शिलां॥ तामापतंतीं दृष्ट्वाशु रथः सारथिनासह॥ विधेयाश्वसमायुक्तः सदूर
मपवाहितः॥ तमिंद्रजितमप्राप्य ससारथिरथस्तदा॥ विवेशधरणींभित्वा साशिलाव्यर्थतांगता॥ राक्ष
सानांप्रमथो धर्षोदृष्ट्वेंद्रजितमाहवे॥ मुक्तं वायुसुतात्क्षीरं सारथिंचाप्यकृरयन्॥ पतितायांशिलायांतु रक्षसांव्य
थितंचमूं॥ तामभ्यधावन्शतशोनदंतः काननौकसः॥ तेद्रुमांश्चमहाकायान्गिरीणांशिखराणिच॥ प्रा
क्षिपन्द्विषतांमध्ये वानराभीमविक्रमाः॥ वानरैस्तैर्महावीर्यैर्भीमरूपानिशाचराः॥ वीर्यादभिहतावृक्षैर्वि
नेरुर्धरणीतले॥ स्वसैन्यमभिवीक्ष्याथवानरार्दितमिंद्रजित्॥ प्रगृहीतायुधःक्रुद्धः परानभिमुखोययौ॥ सशरौघा
न्नवानर्दज्य स्वसैन्येनाभिसंवृतः॥ जघानकपिशार्दूलान्सुबहून्चित्रयोधिमान्॥ शूलैरशनिभिः खड्गैः प
ट्टिशैः कूटमुद्गरैः॥ तेनाप्यनुचरास्तस्य वानरान् जघ्नुराहवे॥ सस्कंधविटपैः शालैः शिलाभिश्चमहाबलाः॥
हनूमान्कदनंचक्रे रक्षसांभीमकर्मणां॥ सनिवार्यपरानीकं अब्रवीत्तान्वनौकसः॥ अवर्तानिवर्तध्वंतेनः

सघामिदंचलं॥ त्यक्त्वाप्राणानहियोधारा रामप्रियचिकीर्षया॥ यन्निमित्तंचयुध्यामो हतासाजनकात्मजा॥ इमम
र्थंचाविज्ञाप्यरामसुग्रीवयोर्द्वयोः॥ तौयत्प्रतिविधास्येते तेचकरिष्यामहेपुनः॥ इत्युक्त्वावानरश्रेष्ठोराक्षसान्निवा
रयन् शनैः॥ शनैरसंभ्रांतः सबलः सन्न्यवर्तत॥ ततः प्रेक्ष्यहनूमंतंव्रजंतंयत्रराघवौ॥ निकुं
भिलामथासाद्य जुहावाग्निंतमिंद्रजित्॥ यज्ञभूमौतुविधिनापावकस्तेनरक्षसा॥ हूयमानः प्रजज्वा
लजपहोमवषट्कृतः॥ योऽर्चिष्मान्ददृशेचाथप्रयतःशोणितवान्पुनः॥ संध्यागतइवादित्यः परिवेषस
मन्वितः॥ अथेंद्रजित्राक्षसराजसूनुर्जुहावहव्यंविधिनाविधिज्ञः॥ दृष्ट्वाव्यतिष्ठंतचराक्षसास्तेमहा
समूहेषुनयानयज्ञाः॥ इतिवानरापसर्पणोनामसर्गः॥ राघवश्चापिबलवान्तद्राक्षसवनौकसां॥ श्रु
त्वासंग्रामनिर्घोषंजांबुवंतमुवाचह॥ सौम्यनूनंहनुमतानिसंसंग्राममूर्धनि॥ श्रूयतेहिमहान्भीमः सु
महानायुधस्वनः॥ तद्गच्छकुरुसाहाय्यंस्वबलेनाभिसंवृतः॥ अगच्छत्पश्चिमंद्वारंहनुमान्यत्रवा

हनुमान्बहुभिर्वानरैर्वृतः॥ अभ्यधावतसंक्रुद्धोराक्षसेंद्रसुतंप्रति॥ आपतच्चतदानीकंतदानीकंतदाभी
मंवनौकसां॥ राक्षसोभीमकर्माणंसमरेसहवारयत्॥ तंतुबाणैःसहस्रैस्तुविक्षोभ्यहरिवाहिनीं॥ परिवार्यचह
नूमंतंप्रत्युवाचेंद्रजित्तदा॥ सुग्रीवस्त्वंचरामस्ययन्निमित्तमिहागताः॥ तांहनिष्यामिवैदेहींएषाद्यतवपश्यतः॥
इमांहत्वाततोरामंलक्ष्मणंचापिवानर॥ सुग्रीवंचहनिष्यामितंचानार्यंबिभीषणं॥ नहंतव्याःस्त्रियश्चेतियद्ब्रवी
षिप्लवंगम॥ पीडाकरममित्राणांयत्स्यात्कर्तव्यमेवतत्॥ तमेवमुक्त्वारुदतींसीतांमायामयींततः॥ शित
धारेणखड्गेनजघानेंद्रजित्स्वयं॥ यज्ञोपवीतमार्गेणछिन्नातेनतपस्विनी॥ सापृथिव्यांपृथुश्रोणीपपात
प्रियदर्शना॥ तामिंद्रजित्स्त्रियंहत्वाहनूमंतमुवाचह॥ मयारामस्यपश्येमांकामोपेतांविनाशितां॥ एवंखड्
गेनहत्वातांरुदतींसद्दर्शनां॥ आस्थितःसरथेहृष्टोविननादमहास्वनं॥ यावत्तास्तत्रसन्नताः तेमुग्रभीमदर्शि
नं॥ वानराःशुश्रुवुःशब्दमनुरूपंसमचरस्थिताः॥ तमशानिपदुर्वेगानिःस्वनंचिमंदितोमिंद्रजिताऽमहास्त्रो

भवांश्चधर्मसंयुक्तः नेदंव्यसनमाप्तुवान्॥ तस्यचव्यसनाभावात्व्यसनेश्चागतेत्वयि॥ धर्मेणोपलभेधर्ममध
र्मेणापिधर्मतां॥ यद्यधर्मेणयुध्येरन्नयेष्वध~~र्मः~~र्मः सुदारुणः॥ अधर्मायेषुधर्मश्च नरस्माधर्मोनिर
र्थकः॥ वध्यंतंवधकर्मणायद्यधर्मेणराघव॥ वधकर्महतोधर्मः संहतः किंकरिष्यति॥ अथवाविहिते
नायंहन्यतेहंतिचापर॥ वधेनलिप्यतेतेन तस्मात्पापेनकर्मणा॥ अदृष्टः प्रतिसंहारो यदिपापस्यकर्मणः
कथंशंकांपरप्राप्तो धर्मेणारिविनाशनं॥ अथचेद्दृक्ष्कृत्वा बलधर्मोनवर्धते॥ दुर्बलोहतमर्यादोनसेव्य
इतिमेमतिः॥ बलस्याथदिवाहर्षोगुणभूतः समाश्रयः॥ धर्ममुत्सृज्य वर्गस्वयेथाधर्मस्तथाबले॥ अ
थचेत्सत्यवचनंधर्मः किलपरोमतः॥ अनृतः स्तस्यकरणः किंनबध्यःपितात्वया॥ अथस्वर्गगतंदानंधर्मो
यमितिराघवः॥ धर्ममूलफलंछिन्नंशक्यमत्सृज्यतात्वया॥ अर्थेभ्योहिसमृद्धेभ्यः संभृतेभ्यस्ततः॥ क्रियाः

सर्वाः प्रवर्तंतेपर्वतेभ्यइवापगाः॥ अर्थेनहिवियुक्तस्यपुरुषस्याल्पमेधसः॥ व्युच्छिद्यंतेक्रियाः सर्वाग्रीष्मेकु
सरितोयथा॥ सोयमर्थेपरित्यक्तः सुखकामः सुखंसह॥ पापमारभतेकर्तुंक्षयाद्दोषोहिजायते॥ यस्या
र्थास्तस्यमित्राणियस्यार्थास्तस्यबांधवाः॥ यस्यार्थाः सपुमांल्लोके यस्यार्थाः सचपंडितः॥ यस्यार्थाः स
महाभागोयस्यार्थाः सगुणान्वितः॥ यस्यार्थाः सचविक्रांतो यस्यार्थः सचबुद्धिमान्॥ यस्यार्थास्तस्यसर्वार्था
यस्यार्थाः सोद्यसंभ्रमः॥ यस्यार्थाधर्मकामार्थाः तस्यसर्वंप्रदक्षिणं॥ अधनेनार्थकामेन कर्तुंधर्मोनशक्यते॥
अर्थैरर्थोहिबध्यंतेगजैर्वनगजाइव॥ अर्थस्येवपरित्यागे दोषाज्ञ्यायंतमामया॥ राज्यमुत्सृजताबीरयायु
धिस्त्वयाकृता॥ धर्मःक्रोधश्चकामश्च हर्षोदर्पः श्रमोदमः॥ अर्थादेतानिसर्वाणि प्रवर्तंतेनसंशयः॥ येषा
मर्थेधर्मयुक्तेषु कः चरतांधर्मचारिणां॥ तेनार्थास्त्वयिदृश्यंतेदुर्दिनेषुयथाग्रहाः॥ धनमर्जयकाकुत्स्थध
नमलोकंजगत्॥ विशेषंनाधिगच्छामि निर्धनस्यमृतस्यच॥ चंडालश्चदरिद्रश्च द्वावेतौसदृशौम

मम॥ चंडालस्यनगच्छंतिहरिद्रोनभयच्छति॥ वयमप्रव्रजिनेवीर पितर्युपरतेतथा॥ रक्षसापहृतामाया प्राणेः
प्रियतरासती॥ तवसंप्रमिदंघोरं दुःखमिंद्रजिताकृतं॥ कर्मणाव्यपनेष्यामि तस्मादुत्तिष्ठराघव॥ अहमनघ
तवाभिनेः प्रियार्थं जनकसुतानिधनंच सांन्निरीक्ष्य॥ सरथगजहयान् सराक्षसांन्द्रान् भ्रशमिषुभिर्विनिपा
तयामिलंकां॥ इतिश्रीरामायणे रामाश्वासनोनाम सर्गः॥ रामसमाश्वासयन्त्वेव लक्ष्मणे भ्रातृवत्सले॥ व
केस्थगुल्मान्सकस्थानान्तत्रयातोविभीषणः॥ नानाप्रहरणैर्वीरैः राक्षसैः परिवेष्टितः॥ महामेघानिकाशैस्तै
र्मातंगैरिवयूथपः॥ सोऽभिगम्यमहावीर्यो राघवस्यसमीपतः॥ ददर्शवानरान्दीनान् ससुग्रीवान् सलक्ष्म
णान्॥ राघवंचमहावीर्यं इक्ष्वाकुकुलबांधवं॥ ददर्शमोहमापन्नं लक्ष्मणस्यांकमास्थितं॥ पीडितःशोकसं
तप्तः प्रेक्ष्यरामं विभीषणः॥ अंतर्दुःखेन दीनात्मा किमेतदितिसोऽब्रवीत्॥ तं विषण्णमुखं दृष्ट्वा ध्यायन्
मुखे विभीषणं॥ उवाच लक्ष्मणोवाक्यमिदमश्रुपरिप्लुतः॥ हतामिंद्रजितासीतामद्य श्रुत्वैव राघवं

नरः॥ अथायातंहनूमंतं ददर्शर्क्षपतिः [illegible] पथि॥ वानरैस्त्यक्तसंग्रामैरखसाद्भिरिवसंभृतं॥ दृष्ट्वापथिहनूमंतंह
र्षेक्षबलसंमुखं॥ नीलमेघचयप्रख्यं समेत्यप्रसवर्तीयत्॥ सतेन सहसैन्येन सांन्निकर्षं महात्मनः॥ रघुश्रमा
गम्यरामस्यदुःखितोवाक्यमब्रवीत्॥ यत्तानांयुध्यमानानां भिषक्तां प्रेक्ष्यतांचिनः॥ अथानरुदंतीं सीतां इंद्रजि
त्पापनिश्चयः॥ उद्भ्रांतचेतनां दृष्ट्वाविषण्णोऽहमरिंदम॥ तमसामहताभ्रांतोविज्ञापयितुमागतः॥ तस्यतद्व
चनंश्रुत्वारामोदुःखेनमूर्छितः॥ निपपाततदाभूमौ कृत्तमूलइवद्रुमः॥ तंभूमौदेवसंकाशंपतितंप्रेक्ष्यराघवं॥
अभिपेतुःसमुत्पत्यसर्वतःकपियूथपाः॥ सिषिचुःसलिलेश्चैनं पद्मोत्पलसुगंधिभिः॥ प्रदहंतमसह्यंच सामि
धमिवपावकं॥ लक्ष्मणस्तुतुवाहुभ्यां परिष्वज्यसुदुःखितः॥ उवाचराममस्वस्थं वाक्यंहेत्वर्थसंयुतं॥ शु
चौवर्त्मनितिष्ठंतं त्वामार्यंविजितेंद्रियं॥ अनर्थेभ्योनशक्नोतित्रातुंधर्मोनिरर्थकः॥ भूतानांस्थावराणांचज
गमानांचदर्शनं॥ यथास्तिनतथाधर्मः स्तेनसत्येनसत्येननास्तिसा॥ यद्विधर्मोभवेत्सत्योरावणोनरकंव्रजेत्॥

कर्म प्राणानेष्ठाश्च संयुगे ॥ तस्यते निशिता बाणाः सुपत्राः कंक वाससः ॥ पन्नत्रिणः कंक इवा सोम्याः रा
रु पास्यति शोणितं ॥ ॥ हरि राम महाबाहो लक्ष्मणेशुभ लक्षणं ॥ रक्षसस्तस्य नाशाय वज्रं वज्रधरो यथा
मनुजवर न कालं विप्रकर्षो रिपु निधने परिमार्गितां क्षमं नः ॥ त्वदिति सृज रिपोर्वधाय बाणान् असुरवरो
न्मथनाय वैय थेंद्रः ॥ समाप्त कर्मा हि स दुष्टो सेंद्रो भवसस युधः समरे सुदुर्जय ॥ युयुत्सन्नंतेन समाप्त कर्मेणा
भवेत्सुराणाम पि संशयो महान् ॥ इति बिभीषण समाश्वासनो नाम सर्गः ॥ ॥ तस्य तद्वचनं श्रुत्वा चिंता
शोक परिप्लुत ॥ नोपधारयते व्यक्तं यदुक्तं तेन रक्षसा ॥ ततोधैर्यमवष्टभ्य रामः परपुरंजयः ॥ बि
भीषणमुपासीनं उवाच वचनां वर ॥ नैर्ऋताधिपते वीर त्वयोक्तं किं बिभीषण ॥ पुनस्त्तत् श्रोतुमिच्छामि
ब्रूहि यत्ते विवक्षितं ॥ राघवस्य तु तद्वाक्यं श्रुत्वा वाक्य विशारद ॥ ततः परमिदं वाक्य बभाषे सः बिभाषेस
बिभीषणः ॥ यथाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनं ॥ तत्तथानुष्ठितं वीर त्वद्वाक्य समनंतरं ॥ सैन

न्यकानि सर्वाणि विभक्तानि नि समंततः ॥ न्यस्ताश्च यूथपश्रेष्ठाः यथान्यायं विभागशः ॥ भूयस्तु मम विज्ञाप्यं त्व
मिदं श्रोतुमर्हसि ॥ त्वय्यकारणतस्तोहि संतप्त हृदया वयं ॥ त्यज राजन्निमं शोकं मिथ्या श्रुत्तमुपागतं ॥
मायया तत्कृतं तेन राक्षसेन दुरात्मना ॥ ततः सर्वे त्यजतां चिंतां शत्रुहर्षप्रदायिनी ॥ उद्यमः क्रियतां वीर हर्षः
समुपसेव्यतां ॥ आप्यायदि तं सीता हंतव्याय दितोरिपुः ॥ सेचतंति महाबाहो मद्वाक्य मिदमूर्जितं ॥ साध्वसं या
तु सोमित्रिः सहासेना भिर्नरर्षभ ॥ निकुंभिलां महाबाहो निहंतुं रावणात्मजं ॥ सुविमुक्तैः शरैस्तीक्ष्णैः शरा विष
विषोपमैः ॥ शरैस्तं हंतुं महेष्वासो रावणिं समितिंजयः ॥ तपसा तेन वीरेण वरदानात्स्वयंभुवः ॥ अस्त्रं ब्रह्म
शिरः प्राप्तं कामगाश्च हयोत्तमाः ॥ स एवं विदधे वास्य धीमतः पुण्यकर्मण ॥ निकुंभिलायां संप्राप्तं अहुत्वाग्नि
श्चयोरिपुः ॥ वासा हि षिष्यते युध्येद्रजा शत्रुर्वध ॥ इत्येवं तस्य विहितं वधोपायो दुरात्मनः ॥ स तस्य वधायत
मयस्यैव पुरंदरः ॥ वधोस्य पुरुषो समहेतु भिर्हन्तु महसि ॥ हतेतस्मिं हतं विद्धि रावणं ससुहृज्जनं ॥ बिभीषण

युधकांड च: श्रुत्वा रामो लक्ष्मणमब्रवीत्॥ जानामि तस्य रौद्रस्य मायामेतां दुरात्मनः॥ स हि दिव्यास्त्रवित्वान्नु वैदेहा वा० र्मी
यस गमो रणे॥ करात्म्र्य संज्ञां संग्रामे देवानपि समागतान्॥ तस्यान्तरिक्षे चरतः सरथस्य पर
१२ चपः॥ न गतिर्वेत्ति दुरावयो सूर्यस्येवाभ्रसंप्लवे॥ तं मायागमनप्राप्तं महावीर्यमरिंदम॥ जहि
वाणैरिदं कर्म कुरु सत्यपराक्रम॥ यदृक्षराजस्य बलं तेन सर्वेण संवृतः॥ रक्षो जांबवता सार्धं अने
न च हनूमता॥ महत्त्वराक्षसेंद्रस्य तनूजं जहि लक्ष्मण॥ जेतारं च अहं तस्य समरे च दुरासदं॥ जयं
तं सार्चैव साधं महात्मा रावणानुजः॥ अभिज्ञस्तस्य देशस्य पृष्ठतोनुगमिष्यति॥ स रामस्य वचः
श्रुत्वा लक्ष्मणः परवीरहा॥ जग्राह कार्मुकश्रेष्ठं भीमं भीमपराक्रमः॥ स संनद्धशरी खड्गी क
चीहेमजालवान्॥ रामपादावुपस्पृश्य हृष्टो राघवमब्रवीत्॥ अद्य मत्कार्मुका मुक्ताः रा
राः संभिद्य सर्वाणि॥ लंकामभिपतिष्यंति हंसाः पुष्करिणीमिव॥ अद्य दधक्ष्यंति भि १३०

हनुमद्वचनाद्वीर ततो मोहमुपागतः॥ कथयत्स्वं च सोभित्रिं सन्निधार्य विभीषणः॥ पुष्कलार्थमिदं वाक्यं ससंज्ञं राममब
ब्रवीत्॥ मनुजेंद्र कुरूपेण यदुक्तं तु हनूमता॥ तदयुक्तमहं मन्ये सागरस्येव संक्षयं॥ अभिप्रायं तु जानामि
रावणस्य दुरात्मनः॥ सीतां प्रति महामोहान्न स तां घातयिष्यति॥ याच्यमानो हितार्थं तु वाक्यैर्धर्मार्थसंहितैः
॥ वैदेहीमुत्सृजस्वेति न च तत्कृतवान्वचः॥ नैव साम्ना न दानेन न भेदेन कुतो वधः॥ अनिरस्तेन वैदेही शक्य
मानुं नेशाक्यते॥ यदा च महत्सु संग्रामेमुपयाति स रावणिः॥ चैत्यं निकुंभिलां नाम तत्र हुत्वा प्रतिष्ठति॥ स हुतवैहु
ताशोनु देवैरपि सवासवैः॥ भवसंघर्षकः संप्राप्ते बलवान् रावणात्मजः॥ तेन हव्यनिमित्तार्थं नूनं माया प्रदर्शिता॥
निकुंभिलायां कोकुलस्य त्र होमं नहि न संशयः॥ सबलास्तत्र गच्छामो यावत्तन्न समाप्यते॥ सज्जेन नरशार्दूल
मिथ्यासंतापमात्मनः॥ मुच्यते हि बलं कृत्स्नं त्वाद्दृष्ट्वा शोककर्शितं॥ इह त्वं स्थ [illegible] निष्फलं रावणात्मने
लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः॥ एष तं नरशार्दूलो रावणिं निशितैः शरैः॥ त्याजयिष्यति

परुषं महितं वाक्यं साधनमब्रवीत्॥ अस्य सैन्यस्य महतो भेदने यत लक्ष्मण। राक्षसेंद्रसुतो ध
त्र भिन्ने मैत्र दृश्यो भविष्यति॥ शीघ्रमिंद्रास्त्रान्निकृस्त्रेये राज्ञरोचिकिरनूरा... रैः॥ अभिक्र
म्यान हेयज्ञं तस्य कर्मासिमाहवे॥ विभीषणवचः श्रुत्वा सं प्रहृष्टः स लक्ष्मणः॥ राक्षसेषु
महाभीमं शरवर्षमसृजत्॥ ऋक्षाः शाखामृगाश्चैव दृष्ट्वा शैलाश्शिलायुधाः॥ अभ्यधावंत संहृ
ष्टाः तदानीकं विभित्सवः॥ परे त्वथ शितैः शूलैः असिभिः पट्टिशैः शरैः॥ उद्यतैस्त्वरितास्तत्र कपीन्
पीनभिजिघांसवः॥ स संप्रवृत्तः सुमहान् संग्रामः कपिरक्षसां॥ शब्देन पूरयन्लंकां जलदस्त
नितस्वनः॥ शस्त्रैश्च विविधाकारैः शितशाखैश्च पादपैः॥ उद्यतैः पर्वताग्रैश्च घोरमाका
शमाबभौ॥ राक्षसा वानरेंद्रेषु निकृंतानन बहवः॥ निपातयंत शस्त्राणि चक्रुः सुमहोग्र
णान्॥ केचिद्वृक्षैः शारिलाकैः बलवंतो वनौकसः॥ अभिजग्मुश्च जघ्नुश्च समरे राक्षसर्ष

भाः॥ ऋक्षवानरमुख्यैश्च महाकायैर्महाबलैः॥ रक्षसां वध्यमानानां महद्भयमजायत॥ स्वमनीकं
तु दृष्ट्वा शत्रुभिरर्दितं॥ अस्थाविंद्रजित्शीघ्रं असमाप्येव कर्मतत्॥ स तु कर्मण्यनुष्ठाने मन्युरा न
भिवोहितून्॥ परित्राणं बलं दीनं निःक्रांतस्तु सराक्रिजित्॥ वृक्षांधकारान्निःक्रम्य पूर्वसज्जं सवी
र्यवान्॥ आरुरोह रथं दिव्यं वाजिभिर्मेघसंन्निभैः॥ समीमकार्मुकरथः कालांजनचयोपमः॥ रक्ता
स्यनयनः क्रुद्धो बभौ मृत्युरिवापरः॥ दृष्ट्वैव तु रथस्थं तमभ्यधावंत तद्बलं॥ वानराणां सुभीमानां युधाय
रिपुमाहवे॥ तस्मिंस्तु काले हनुमान् आरुह्य सुदुरासदं॥ धरणीधरसंकाशं महावृक्षं महाबलः॥ रक्षसां
तान्यनीकानि कालाग्निरिव निर्दहन्॥ चकार सुमहतां मार्गान् राक्षसेषु महाकपिः॥ विध्वंसयन्
तरसा राक्षसान्मारुतात्मजः॥ परिवव्रुः सहस्राणि राक्षसानां समंततः॥ सितशूलधराः शूलैः शक्ति
भिश्च परश्वधैः समुद्गरैः॥ घोरैः परश्वधैस्तीक्ष्णैः भिंडिमालैश्च राक्षसाः॥ शक्तिभिः शक्तिहस्ताश्च पट्टि

शैः पट्टिशायुधाः ॥ परस्वधैर्धनुर्भिश्च गदाभिर्मार्गणैरपि ॥ परिघैश्च भुशुंडीभिः चक्रैः सक णपैरपि ॥ शत
शश्च शतघ्नीभिः आयसैरपि मुद्गरैः ॥ मुष्टिभिर्वज्रकल्पैश्च तालैश्चाशनिनिस्वनैः ॥ नरवैर्दंतैश्च वीराणां
अद्रीपैद्रुपमिछतां ॥ अभिजग्मुः समासाद्य समंता सर्वतोलमं ॥ तेषांभभिसुसंक्रुधः श्चकारकदनंमहन् ॥
तमपश्यत्क पिश्रेष्ठमनिशात्मजमिंद्रजित् ॥ स दृष्ट्वातमभित्रघ्नं अभित्रान्मारुतात्मजं ॥ ससारथिमुवाचे
दं अभियाहिमहाकपिं ॥ क्षयमेवहिनः कुर्याद्राक्षसानामुपेक्षितः ॥ इत्युक्तः सारथिस्तेन रथेनाभिययौ
कपिं ॥ वहन्परमदुर्धर्षं स्थितमिंद्रजितंरणे ॥ सोभ्यपेत्य शरान् घोरान् घोरान् पट्टिशासिपरस्वधान् ॥
अपातयत् दुर्धर्षो रावणिः कपिमूर्धनि ॥ हनूमंतं जिघांसंतं समुद्यतशरासनं ॥ रावणात्मजमाचष्ट
लक्ष्मणाय बिभीषण ॥ असौ वासवजेतावै रावणस्यात्मसंभवः ॥ स एव रथमास्थाय हनूमंतं जिघां
सति ॥ तमप्रतिमकर्माणं शरैः शत्रुविनाशनैः ॥ सौमित्रे जीवितछिद्रैः अभिवर्षशरोत्तमैः ॥ इत्येवमु

भिः ॥ तमप्रतिमकर्माणं...णाम्बुता ॥ शरैः ॥ तस्य रौद्रस्य कक्षराशिमिवानलः ॥ इत्येवमुक्त्वा वचनं धृतिमान्
भ्रातुरग्रतः ॥ जिघांसुरावणिं युधे लक्ष्मणो निर्जगाम ह ॥ भ्रातरं सोभिवाद्याथ कृत्वा चाभिप्रदक्षि
णं ॥ निकुंभिलामभिययौ हंतुं स रावणिमाहवे ॥ बिभीषणेन सहितो राजपुत्रः प्रतापवान् ॥ कृतस्वस्त्य
यनो भ्रात्रा लक्ष्मणो निर्ययौ तदा ॥ वानराणां सहस्रैश्च बहुभिर्हनुमान् सह ॥ बिभीषणश्च सामात्यो रा
मभ्रातरमन्वियात् ॥ महाकपिबलौघस्तु संपतन्निवपर्वतः ॥ ऋक्षराजबलं चैव महाभ्रमिवनादयन् ॥
समंताद्दूरमध्वानं सौमित्रिर्मित्रनंदनः ॥ राक्षसेंद्रबलं दूरात् अपश्यद्व्यूहसंस्थितं ॥ स संप्राप्य महा
बाहुः स्वस्ये योगमहाबलः ॥ तस्थौ ब्रह्मास्त्रविधीमान् लक्ष्मणः शुभलक्षणः ॥ विमलं विविधचाप
भास्करं तद्ध्वजगहनं च महारथैश्च गुप्तं ॥ प्रतिभयकरमप्रमेयवेगं स्तिमितमिवद्विषतां बलं निवेश ॥
इति श्रीरामायणे युद्धकांडे लक्ष्मणप्रयाणो नाम सर्गः ॥ अथ तं समवस्थाप्य लक्ष्मणं रावणानुजः ॥

रोत्व्यस्त्वमसिदुर्बुद्धेनिंदनीयश्चसाधुभिः ॥ यस्त्वंस्वजनमुत्सृज्यपरेषाभृत्यतांगतः ॥ नैतच्छिथिल
याबुध्यात्वंवेत्सिमहदंतरं ॥ कचस्वजनसंवासः कचनीचजनाश्रयः ॥ गुणवान्वापरजनः स्वजनो
वापिनिर्गुणः ॥ निर्गुणः स्वजनः श्रेयान्यःपरःपरएवसः ॥ निरनुक्रोशतासेयं ॥ हशीतेनिशाचर ॥ स्व
जनेनचयात्वयाप्रतिष्ठावासुखानिच ॥ यदिलपरुषाण्युक्तः पित्राममनिशाचर ॥ गौरवात्प्रणयाद्वा
पितथैवपरिसांत्वितः ॥ यथैवप्रणयाद्वापिगुरुर्वदतिविप्रियं ॥ तथैवसपुनर्मूढ लालयंसविचारयन् ॥ क्रु
द्धेनेंद्रजितावाक्यंपरुषंरावणानुजः ॥ उक्तः पितृव्यः पुत्रेण प्रत्युवाचविभीषणः ॥ अजानंस्त्विव
मह्मीलंकिंत्वमेवंब्रवीषिमां ॥ राक्षसेंद्रसुतानार्यपरुषंसक्तगौरव ॥ अयुक्तरूपंवचनंपोलस्त्यकुल
पासन ॥ अधर्मेणहतज्ञानो नत्वंवेत्सिगुणागुणान् ॥ कुलेयद्यपिजातोहं रक्षसांक्रूरकर्मणां ॥ गु
णोयःपरमोनृणां तन्मेशीलमराक्षसं ॥ नरमेदारुणेनाहंनरमेपापकर्मणि ॥ भ्राताविषमशीलेन

कथंभ्रात्राविवास्यते ॥ परस्वानांचहरणंपरदाराभिमर्शनं ॥ सुहृदामतिशंकाचत्रयोदोषाः क्षयावहाः
॥ महर्षीणांवधेघोरः सर्वदेवैश्चविग्रहः ॥ क्रोधश्चैवातिमानश्चवैरित्वंप्रतिकूलता ॥ एतैर्दोषैर्मम
भ्रातुर्जीवितैश्वर्यनाशनैः ॥ गुणाः प्रच्छादिताः सर्वेपर्वतास्तोयदैरिव ॥ एतैर्दोषैःपरित्यक्तो नमे
भ्रातापितातव ॥ नेवमस्तिपुरीलंका नैवत्वंनचतेपिता ॥ अतिमानीचबालश्चदुर्विनीतश्चराक्षसः ॥
त्वंकालपाशैर्बद्धश्चब्रूहिमांयद्यदिच्छसि ॥ प्रविष्टुंनत्वयाशक्या न्यग्रोधोयंनिशाचर ॥ धर्षयित्वाचकाकु
त्स्थंनशक्यंजीवितुंत्वया ॥ युध्यस्वनरदेवेनलक्ष्मणेनरणेसमं ॥ नचप्रवेक्ष्यसेलंकांकुतोन्यग्रो
धमद्यहि ॥ विदर्शयत्वंस्वबलंसमुद्यतः कुरुष्वसर्वायुधसाधनव्ययं ॥ नलक्ष्मणस्याद्यहिबाणगोचरं
त्वमद्यजीवन्सबलोगमिष्यसि ॥ इतिश्रीरामायणेयुद्धकांडेइंद्रजितगर्हणोनामसर्गः ॥ ॥
विभीषणवचःश्रुत्वारावणिःक्रोधमूर्छितः ॥ अब्रवीत्परुषंवाक्यंवेगेनाभिससारच ॥ उद्यता

 युधानि स्थितो रथे सुसमलंकृते ॥ कालाश्वयुक्ते महति स्थितः कालांतकोपमः ॥ महाप्रमाणमुद्ध
म्य विपुलं वेगवद्दृढं ॥ धनुर्भीमबलो भीमं शरांश्चानी विषोपमान् ॥ उवाच चेदं सरथः सौमित्रिं स
 बिभीषणं ॥ तांश्च वानरशार्दूलान्पश्यध्वं मत्पराक्रमं ॥ अद्य मत्कार्मुकोत्सृष्टं शरवर्षं सुदुःसहं
मुक्तं वर्षमिवाकाशे धारयिष्यथ संयुगे ॥ अद्य वो मामका बाणा महाकार्मुकनिःसृताः ॥ गात्राणि विध
मिष्यंति तूलराशिमिवानलः ॥ तीक्ष्णसायकनिर्भिन्नान् भिंडिमालासिपट्टिशैः ॥ अद्य वो गमयिष्या
मि सर्वानेव यमक्षयं ॥ क्षिपतः शरजालानि क्षिप्रहस्तस्य संयुगे ॥ जीमूतस्येव नदतः कः स्थास्यति म
माग्रतः ॥ तच्छ्रुत्वा रावणेर्वाक्यं गर्वितं लक्ष्मणस्तदा ॥ अभीतवदिदं क्रुद्धो राक्षसं वाक्यमब्रवीत् ॥ नवाचा
दुर्गमः पारः कार्याणां राक्षसाधम ॥ कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान् ॥ स त्वमर्थस्य हीनार्थो दुरवा
सा पस्य कैश्चन ॥ वचो व्याहृत्य जानीषे कृतार्थोऽस्मि सुदुर्मते ॥ अंतर्धानगतेनाजौ कृत्रिमेण त्वयाहतौ ॥ १०२४

कृतस्तत्र महात्मा बिभीषणेनाति बिभीषणेन ॥ ददर्श तं पर्वतसंन्निकाशं रथे स्थितं भीमरवं नदंतं ॥ इति श्री
रामायणे युद्धकांडे इंद्रजित् दर्शनं नाम सर्गः ॥ ॥ स एवमुक्त्वा सौमित्रिं त्वरमाणो बिभीषणः ॥ नीलजी
मूतसंकाशं न्यग्रोधं घोरमास्थितं ॥ तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत् ॥ इहोपहारं भूतानां बलवान्
रावणात्मजः ॥ उपश्रित्य ततः पश्चात् संग्राममभिवर्त्तते ॥ अदृश्यः सर्वभूतानां ततो भवति राक्षसः ॥ निहंति
चरणे शत्रून् बध्नाति च शरोत्तमैः ॥ तमप्रविष्टं न्यग्रोधं बलिनं रावणात्मजं ॥ विध्वंसय शरैस्तीक्ष्णैः सरथं सर
थं साश्वसारथिं ॥ तथेत्युक्त्वा महातेजा सुमित्रानंदवर्धनः ॥ बभूवावस्थितस्तत्र चित्रं विस्फारयन्धनुः ॥ रथे
नादित्यवर्णेन बलवान् रावणात्मजः ॥ इंद्रजित्कवची खड्गी सध्वजः प्रत्यदृश्यत ॥ लक्ष्मणस्तमुवाचाथ
रावणिं रघुनंदनः ॥ समाह्वये त्वां समरे सम्यग्युद्धं प्रयच्छ मे ॥ एवमुक्तो महातेजाः समरे रावणात्मजः ॥
अब्रवीत्परुषं वाक्यं दृष्ट्वा तत्र बिभीषणं ॥ इह त्वं जातसंवृद्धः साक्षाद्भ्राता पितुर्मम ॥ कथं द्रुह्यसि पु
त्राय पितृव्यो मम राक्षस ॥ न ज्ञातित्वं न सौहृद्यं न जातिस्तव दुर्मते ॥ प्रमाणं न च सौहार्दं न धर्मो धर्मदूषण ॥

कर्मयन्त्राहं श्रद्दध्यां तव कत्थितं ॥ अबुवाणो दहत्यग्निस्तथा तपति भास्करः ॥ मध्नाप्वति पवनो वृक्षान् नच
किंचिद्धि कत्थते ॥ इत्युक्त्वा पंचपर्वाणं आकर्णापूरितं शरं ॥ निचखान महावेगं लक्ष्मणो रावणात्मजे ॥
स्त्रशरेणाहतस्तेन सरोषो रावणात्मजः ॥ सुप्रयुक्तैस्त्रिभिर्बाणैस्त्रिभिर्विव्याध लक्ष्मणं ॥ स बभौ सुमहाभी
मो नरराक्षससिंहयोः ॥ विमर्दस्तुमुलो भूयः परस्परवधैषिणोः ॥ उभौ हि बलसंपन्नावुभौ विक्रमशालि
नौ ॥ उभावपि च विक्रान्तौ सर्वशास्त्रास्त्रकोविदौ ॥ उभौ परमदुर्धर्षौ उभौ परमतेजसौ ॥ युयुधाते महात्मा
नौ महाविव नभोगतौ ॥ बलिशक्राविवायत्तौ युधि दुःप्रतिहर्षणौ ॥ युयुधाते नदा वीरौ व्याघ्रकेसरिणा
विव ॥ शिलानवसृजंतौ च मार्गणौघानवस्थितौ ॥ नरराक्षससिंहौ तौ प्रहृष्टवद्युध्यतां ॥ सुसंप्रविष्टौ
नरराक्षसौ तौ तदातिचंडौ सितशस्त्रपाणी ॥ रणे च तीक्ष्णं समभिप्रपेतुः शरौघवेगेन यथा बलाहकौ ॥
इति श्रीरामायणे इंद्रजितयुद्धे आक्षेपयुद्धं नाम सर्गः ॥ ॥ ततः शरान् दाशरथिः संधायामित्रकर्शनः ॥

ससर्ज रक्षसे घोरान् क्रुद्धाशीविषोपमान् ॥ ततो ज्यातलनिर्घोषमसहन् राक्षसात्मजः ॥ विवर्णवदनो भूत्वा
लक्ष्मणं समुदैक्षत ॥ तं विवर्णमुखं दृष्ट्वा राक्षसं रावणानुजः ॥ सौमित्रिं युद्धसंसक्तं प्रत्युवाच विभीषणः ॥
इंगितान्यनुपश्यामि यान्यस्मिन् रावणात्मजे ॥ त्वरस्व नरशार्दूल भग्न एष निशाचरः ॥ ततः सौमित्रिः शरा संधाय
नग्निशिखास्पर्श शिखोपमान् ॥ मुमोच निशितान् तस्मै सर्पानिव महाविषान् ॥ स च क्रोशानि संस्पर्शैः ल
क्ष्मणेनाहतः शरैः ॥ मुहूर्त्तमभवन्मूढः सर्वसंक्षुभितेंद्रियः ॥ उपालभ्य मुहूर्तेन संज्ञां प्रत्यागतेंद्रियः ॥ ददर्शाव
स्थितं धीरं आजौ दशरथात्मजं ॥ सोभिचक्राम सौमित्रिं क्रोधसंरक्तलोचनः ॥ अब्रवीच्चैनमासाद्य पुनश्च
परुषं वचः ॥ किं न स्मरसि तं युद्धे प्रथमे मत्पराक्रमं ॥ निरस्य त्वं सह भ्रात्रा यदा युधि विवेष्टितः ॥ युवां युद्धे वज्रा खलु मया
शनिसमाश्च नैः ॥ बाधितौ प्रथमं भूमौ विसंज्ञौ सपुरःसरौ ॥ स्मृतिर्नैवास्ति ते व्यक्तं त्यक्तं वा यमसादनं ॥
गंतुमिच्छसि येन त्वं मां धर्षयितुमिच्छसि ॥ यदि ते प्रथमं युद्धे न दृष्टो मत्पराक्रमः ॥ अद्य ते दर्शयिष्यामि तिष्ठे

दानींस्थिरोभव॥ इत्युक्त्वा सप्तभिर्बाणैः रभिविव्याधलक्ष्मणं॥ दशभिस्त्वथहनूमंतं तीक्ष्णधारैः शरोत्तमैः॥ ततः
शरशतेनैव सुप्रयुक्तेन वीर्यवान्॥ क्रोधाद्द्विगुणसंरब्धो निर्बिभेद विभीषणं॥ सदृष्ट्वा राक्षसेंद्रस्य कर्मरा
मानुजः स्तदा॥ अचिंतयित्वा प्रहसन् नैतत्किंचिदिति ब्रुवन्॥ अब्रवीत्तरशरान्घोरान् उद्यम्यनरपुंगवः॥ अभी
तवत्सुसंरब्धो रावणिं लक्ष्मणो युधि॥ नैवंशूराः प्रहरंति निशाचर॥ तएवश्लाघ्यवीर्याश्च सुखास्तेमे
शरास्तव॥ नैवंतु शूरायुध्यंते युद्धे विजयकांक्षिणः॥ इत्येवमुक्त्वावचनं शरैरेनमवाकिरन्॥ अस्यबाणैरपध्वस्तं
कवचंकांचनप्रभं॥ विशीर्यत रथोपस्थे ताराजालमिवांबरात्॥ विधूतवर्मा नाराचैर्बभूव सकृतव्रणः॥ इंद्रजित्
समरेशूरः प्ररूढइव सानुमान्॥ अभीक्ष्णं निःश्वसंतौ हि युध्यमानौ महामृधे॥ शरसंकृत्तसर्वांगौ सर्व
तोरुधिरोक्षितौ॥ बभूवतुः स अंतौहि मार्गणान्भीमकर्मणः॥ तयोर्बभूवतुमुलः सन्निपातोमुहुर्मुहुः॥ प्रच्छ
तयोर्यथाकाले नीलयोरिवमेघयोः॥ अस्त्राण्यस्त्रविदांश्रेष्ठौ दर्शयंतौ [illegible]ः पुनःपुनः॥ शरैरुच्चावचैस्तैः १३६

तस्कराचरितोमार्गः नचैवशूरनिषेवितः॥ तदाहवमनुप्राप्य स्थितोहं तवराक्षस॥ दर्शयस्वाद्ययत्तेजो वाचा
किं बहुकत्थसे॥ एवमुक्तोधनुर्भीमं परामृश्यमहाबलः॥ विससर्ज शिलान्बाणान् इंद्रजित्समितिं
जयः॥ तेनोत्सृष्टा बलवता शरास्ते विषोपमाः॥ संप्राप्यलक्ष्मणंपेतुः श्वसंतइवपन्नगाः॥ शरैरती
महावेगैर्वेगवान्राक्षसोत्तमः॥ सौमित्रिमिंद्रजिद्युद्धे विव्याधशुभलक्षणं॥ सशरैरतिविद्धांगो रु
धिरेणविभूषितः॥ शुशुभेलक्ष्मणःश्रीमान् विधूमइवपावकः॥ इंद्रजित्त्वात्मनः कर्म प्रसमीक्ष्याथराक्षसः॥
विमर्द्यसुमहानादं इदंवचनमब्रवीत्॥ अद्यमत्कार्मुकोत्सृष्टाः शरास्तीक्ष्णसुपत्रिणः॥ आदास्यंतिश
रीरात्ते जीवितंजीवितच्छिदः॥ अद्यगोमायुसंघाश्च श्येनसंघाश्चलक्ष्मण॥ गृध्राश्चाभिपतंतुत्वां गतासुंनि
हतंमया॥ क्षत्राधमः सदुष्टात्मा रामः परमदुर्मतिः॥ भक्तंभ्रातरमद्यत्वां द्रक्ष्यतीहमयाहतं॥ अपास्तकवचो या
भूमौ व्यपविद्धशरासनः॥ हृतोत्तमांगो व्यथितः स्वप्स्यसित्वंमयाहतः॥ इतिब्रुवाणंपरुषं राक्षसंरावणा
त्मजं॥ हेतुमद्वाक्यमत्यर्थं लक्ष्मणः प्रत्युवाचह॥ अकृत्वाकत्थसेकर्म किमर्थमिहराक्षस॥ कुरुतत्

विरेजुः सर्वगात्राणि दीप्ता इवपावकाः॥ तयोस्तुसुमहान्कोपो व्यतीतोयुध्यतोरणे॥ नचतौयुधवैषम्यं
श्रमंवाप्यनिजघ्नतुः॥ अथसमरपरिश्रमंविहातु समरमुखेष्वजितस्यलक्ष्मणस्य॥ प्रियहितमुपपा
द्यनूमहौजाः समरमुपेत्य विभीषणोपतस्थे॥ इतिश्रीरामायणे संसक्तयुद्धंनामसर्गः॥ युध्यमानौतु तौ
दृष्ट्वा संसक्तौनरराक्षसौ॥ शूरः सरावणभ्राता तस्थौसंग्राममूर्धनि॥ विस्तारयामासतदामहद्धनुरवस्थि
तः॥ उत्ससर्जचतान्तीक्ष्णान् शरान्बर्हिणवाससः॥ तेशराः शिखिसंकाशाः निपतंतो समाहिताः॥ रा
क्षसान्दारयामासुः वज्रानगनयोयथा॥ विभीषणस्यानुचराः तेपिशूलासिपट्टिशैः॥ चिच्छिदुः सम
रेवीराः राक्षसान्राक्षसोत्तमाः॥ राक्षसैस्तैः परिवृतः सतदाभूद्विभीषणः॥ वभौमध्येरदाथौनौ कलभा न्
नामिवद्विपः॥ ससंनोदयमानस्तु हर्यक्षान्वानरान्रणे॥ उवाचवचनंकाले कालज्ञोरक्षसांवरः॥ एकोयंरा
क्षसेंद्रस्य पारायणमवस्थितः॥ एतच्छेषंबलंतस्य तिष्ठध्वंकिंप्लवंगमाः॥ अस्मिन्विनिहतेपापे राक्षसेरा

णमूर्धनि॥ रावणोविनिहंतव्यः शेषमस्यबलंहतं॥ प्रहस्तोनिहतोवीरो निकुंभश्चमहाबलः॥ कुंभकर्णश्चधू
म्राक्षोनिकुंभश्चमहाबलः॥ कुंभकर्णश्चधूम्राक्षो निकुंभश्चमहाबलः॥ अकंपनः सुपार्श्वश्च वज्रमौलि
श्चराक्षसः॥ महोदरश्चरक्ताक्षो लंबकर्णोमहाहनुः॥ मकराख्योतिकायोच त्रिशिराश्चापिवीर्यवान्॥ प्रलंबो
जंबुमालीच महापार्श्वश्चवेगवान्॥ यज्ञकोपोविरूपाक्षो वज्रमुष्टिश्चवीर्यवान्॥ सुप्तघ्नश्चाग्निकेतुश्चरश्मि
केत्वादयः स्थिताः॥ एतान्निहत्यसंग्रामे बहून्राक्षससत्तमान्॥ बाहुभ्यांसागरंतीर्त्वा लंघ्यतांगोष्पदंलघु॥ ए
तावदेवशेषंतु हन्यतामिहवानराः॥ घ्नतः सर्वेसमागम्य राक्षसंबलदर्पितं॥ अयुक्तंनिधनंकामं मयापुत्रस्य
वानराः॥ ननुमेरामतुष्ट्यर्थं अकार्यंभुविविद्यते॥ वधोपायोवधश्चेति समदोषमिदंद्वयं॥ तत्पलकमुपामा
र्ते समासिद्धिंप्रयोजयन्॥ घृणामपास्यरामार्थे हन्म्येवभ्रातुरात्मजं॥ प्रहर्तुकामस्यतुमे वैक्लव्यंजायतेमह
तु॥ तदेवैनंमहाबाहुः लक्ष्मणः शमयिष्यति॥ वानराश्चाथसंभ्रम्य सागरस्यसमीपगाः॥ इतितेनाभिहि

रसा राक्षसेनाभिनोदिता:॥ वानरेंद्राश्च जहृषुर्मेघान् दृष्ट्वेव बर्हिण:॥ नेलध्वलक्षा: कपय: प्रेक्ष्य युधे विभीषणं॥
भूयो जहृषिरे कामं लांगूलानि विचिक्षिपु:॥ जांबुवानपि तै: सार्धं यूथपैरभिसंवृत:॥ अस्त्रद्रयन् पर्वताग्रैर्न
खैर्दंतैश्च राक्षसान्॥ निघ्नंतमृक्षाधिपतिं राक्षसा: सचिवै: सह॥ परिवव्रुर्भयं त्यक्त्वा तमेकं विविधायुधै:॥
घोरै: परश्वधै स्तीक्ष्णैर्भिंडिमालैश्च राक्षसा: सचिवै: सह॥ परिवव्रुर्भयं त्यक्त्वा तमेकं विविधायुधै:॥ घोरै: पर
श्वधैस्तीक्ष्णैर्भिंडिमालैश्च राक्षसा:॥ जाजघ्नुर्ऋक्षाधिपतिं निघ्नंतं राक्षसीं चमूं॥ स संप्रहारस्तुमुल: संजज्ञे
कपिरक्षसां॥ देवासुराणां युधानां यथा भीम: पुराभवत्॥ हनुमांश्चापि संक्रुद्ध: शालमुत्पाट्य वीर्यवान्॥ र
क्षसां कदनं चक्रे दंडहस्त इवांतक:॥ विभीषणश्च संक्रुद्धो धनुष्पाणिर्महाबल:॥ सामात्यस्तत्र संग्रामे ज
घ्नु रक्षोगणांस्तथा॥ दत्वा तु तुमुलं युद्धं पितृव्यस्येंद्रजित्तया॥ लक्ष्मणं परवीरघ्नं पुनरेवाभ्यधावत॥ तौ प्रयु १०२९
द्धौ पुनर्वीरौ रणे लक्ष्मणराक्षसौ॥ शरवर्षं विवर्षतौ जघ्नतुस्तौ परस्परं॥ अभीक्ष्णमंतर्दधतु शरजालैर्महाबलौ

रंतरिक्षं बबंधतु:॥ व्यपेतदोषमन्योन्यं लघु चित्रं च सुष्ठु च॥ दर्शयंतौ महाभीमं संग्रामं नरराक्षसौ॥ तयो: पृथक्पृ
थक् भीम: सुश्रुवे तलनिस्वन:॥ सुघोरयोर्निष्टनतोर्यथाकाशे च काले मेघयो:॥ सुवर्णपुंखैर्नाराचैर्बलवंतौ
कृतव्रणौ॥ प्रसुस्रुवाते रुधिरं जलं प्रस्रवणादिव॥ तयोस्तु मुक्ता गात्रेषु रुक्मपुंखा: शरायुधि॥ असृक्दिग्
धा गंधा विनिर्भिद्य विविशुर्धरणीतलं॥ अन्ये सुनिशिता बाणा आकाशे ज्योतिषा वृता:॥ बभंजुश्च चिच्छिदुश्चैव त
योर्बाणा: सहस्रश:॥ संबभूव समंतात्तु तयोर्बाणसमाश्रया:॥ अग्निर्भ्यामिव दीप्ताभ्यां जज्ञे बाणसमाश्रया:॥
तयो: कृतव्रणौ कीर्णौ देहौ शुशुभाते महात्मनो॥ सुपुष्पाविव निष्पत्रौ यथाशाल्मलि किंशुकौ॥ तयोर्गात्रेषु
संलग्ना भांति नाराचसंश्रया॥ तयो: कृतव्रणौ देहौ शु शु भाते महात्मनो॥ गात्रेषु संलग्ना भाति नाराचसंश्र
या:॥ नक्षत्रपंक्तयो व्योम्नि विमले च यथोदिता॥ समौ हि परमेष्वासौ शस्त्रविद्याविशारदौ॥ लक्ष्मणो राव
णिं युद्धे रावणिश्चापि लक्ष्मणं॥ अन्योन्यं तौ विनिघ्नंतौ॥ आविव जयाद्धृतौ॥ बाणजालै: शरैरस्त्रै: अ
वगाढ स्तौ शरस्चितौ॥ शुशुभाते रणे तौ तु प्ररूढाविव पर्वतौ॥ तयो: शोणितसिक्तानि संवृतानि शरैर्भृशं॥

चंद्रादिसाविवोष्णांतेयथामेघैरुराश्विनौ ॥ शरौघानूविसृजंतौतु रुरुभातेरुभाननौ ॥ विकर्षंतौच मेघा
ऽविवमहावलौ ॥ नादानेन्नचसंधानेधनुषोनपरिग्रहे ॥ नविप्रमोक्षेबाणानांविकर्षेनचविग्रहे ॥ नमुष्टिप्रति
तू संधानेनलक्ष्यप्रतिपादने ॥ अदृश्यततयोः शीघ्रौं युध्यतोः पाणिलाघवं ॥ वायुवेगप्रमुक्तैश्च बाणजालैः
समंततः ॥ अंतरिक्षेप्रतिछन्नेनरूपाणिचकाशिरे ॥ तमसापिहितंसर्वं आसीत्तुभीष्मतरंभृशं ॥ नतदाप्रव
वौवायुर्नचजज्वालपावकः ॥ स्वस्त्यस्तुलोकेभ्यइति ऊचुस्तत्रमहर्षयः ॥ संपेतुश्चापिगंधर्वाः संत्रस्ताः
का ला सहचारणैः ॥ अथराक्षससिंहस्यंनकनूकभूषिणः ॥ शरैश्चतुर्भिः सौमित्रिर्विव्याधचतुरोहयान् ॥ ततः
प्रशस्तंसौमित्रिर्नाराचमभिलक्ष्यतं ॥ शत्रुवीर्यप्रमथनं सर्पक्रुधमिवाहवे ॥ सतेन बाणाशनिना तल
सारथेः शब्दानुनादिना ॥ धनुर्मैत्रप्रसृतेनयंतुर्जौर्विलमाददे ॥ सयंतरिमहानेजानिहतेरावणात्मजः ॥ प्रजहौ
चसमुधर्षंविषण्णश्चबभूवह ॥ विषण्णवदनंदृष्ट्वारावणिंहरियूथपाः ॥ प्रहर्षमतुलंगत्वारथमस्यव्यपो

थयत्॥ ततः प्रमाथी क्रथनः स भीमो मेघनिस्वनः॥ अभ्यष्यमाणाश्चत्वारः चक्रुर्वेगं हरीश्वराः॥ तेतस्य हयमु
रव्येषु तूर्णमुत्पत्य वानराः॥ ववर्षुसुमहावीर्याः निपेतुः सहसाबलात्॥ तेषामधिष्ठितानां तैर्वानरैः पर्वतोप
मैः॥ मुखेषु शोणितं तत्र हयानां संप्रवर्तितं॥ ते निहत्य हयास्तस्य निर्ममंथू रथस्य च॥ पुनरावृत्य वेगेन सौ
मित्रेस्तस्थुरग्रतः॥ स हताश्वादवप्लुत्य रथात्पतितसारथिः॥ बाणानस्यंतमभ्यग्रे बाणैः सौमित्रिमर्दयत्॥ त
तः स सौमित्रिमथाप्रमत्तं स्थितिं पदातिं निहितैस्तुरंगैः॥ स ह जंतमाजौ निशितान्पृषत्कान्भृशातुरं बाणशते
श्चकार॥ इति श्री वाल्मीकि रामायणे युधकांडे रथमर्दनोनाम सर्गः॥ ॥ स हताश्वो महातेजा भूमौ तिष्ठन्नि
शाचरः॥ इंद्रजित्परमं क्रुद्धः संप्रजज्वाल तेजसा॥ तौ धन्विनौ जिघांसंतावन्योन्यमभिनस्थितौ॥ विज
यायाभिनिःक्रांतौ वने गजवृषाविव॥ निगर्हतौ च अन्योन्यं तौ राक्षसवनौकसौ॥ भर्त्तारौर जनुर्युद्धेसं
पतंतौ ततस्ततः॥ सतक्रोधात्त्वितव्यस्य क्रुद्धश्चापि हतौ हयौ॥ प्रगृह्य चाप्यर्दयच्चापं शरैर्लक्ष्मणमिंद्रजित्॥

सर्वांस्तानू हरियूथपानू॥ तस्मैदृढधनुः क्रुधोहताश्वायबिभीषणः॥ वज्रस्पर्शसमांनू स्त्रीनूससर्जेनिशि
तानूशरानू॥ तेस्यकायंविनिर्भिद्य रु[illegible]पुंखवानू बर्हिस्थिताः॥ बभूवुर्लो[illegible]हितादिग्धाः रक्ताइवमहोरगाः॥
सपितृव्यायसंक्रुधः इंद्रजित् शरमाददे॥ उत्तमंरक्षसांमध्येयमदत्तंमहाबलं॥ तंसमीक्ष्यमहातेजामहे
षुंतेनसंहितं॥ लक्ष्मणोप्याददेबाणं अन्यंभीमपराक्रमं॥ कुबेरेणस्वयंदत्तं स्वप्नेबाणंमहात्मना॥ दुर्जयं
दुर्विषह्यंचसर्वैरपिसुरासुरैः॥ ताभ्यांतुधनुषारत्नसंहितौसायकौतभौ॥ विकृष्यमाणौबलिनौश्रेविवि
ज्वलतुस्तदा॥ तौभासयंतौ अन्योन्यं धनुर्भ्यांविशिखौच्युतौ॥ मुखेनमुखमाहत्य विनिपेततुराहवे॥ सु
महाग्रहसंकाशौ अन्योन्यमभिहन्यतः॥ पततुः सहसाभूमौ अन्योन्यंशतधाकृतौ॥ शरौप्रतिहतौदृष्ट्वा
तावुभौरणमूर्धनि॥ निहतौरोषजातौतु लक्ष्मणेंद्रजितावुभौ॥ सौमित्रिरथसंक्रुद्धः संदधेस्त्वसुदा

रुणं॥ रौद्रंसचेंद्रजित्क्रुद्धो असृजत्समनंतरं॥ तयोः सुतुमुलेयुद्धे प्रवृत्तेलोमहर्षणे॥ गगैस्थानि न
भूतानि लक्ष्मणंपर्यवारयन्॥ भैरवाभ्यरुतेयुद्धेभीमेवानरराक्षसां॥ भूतैर्बहुभिराकाशं विस्मितैश्चावृतंबभौ॥
ऋषयः पितरोदेवाः गंधर्वागरुडोरगाः॥ शतक्रतुंपुरस्कृत्य ररक्षुर्लक्ष्मणंरणे॥ तथान्यंमार्गणश्रेष्ठंसं
दधेराघवानुजः॥ हुताशनसमस्पर्शं रावणात्मजदारणं॥ दृढंनम्रजुवृत्तांगंसुपर्वाणंसुसंस्थितं॥ सुप
र्णविकृतंवीरंशरीरांतकरंपरं॥ दुराधर्षंदुर्विषहंराक्षसानांविदारणं॥ आशीविषसमस्पर्शं वेगसंपन्नम
र्चितं॥ येनशक्रः प्रयुद्धोभूत् दानवांतकरः प्रभुः॥ पुरादेवासुरेयुद्धेवीर्यवानू हरिवाहनः॥ तमिंद्रदत्तं
सौमित्रिः समरेष्वपराजितं॥ शरश्रेष्ठंधनुःश्रेष्ठे नरश्रेष्ठोभिसंदधे॥ संधायामित्रमथनं व्यपकृष्य
शरासनं॥ संधीयमानंदुर्धर्षं कालंलोकक्षयेयथा॥ संधायाथधनुःश्रेष्ठे विकर्षन्निदमब्रवीत्॥ छ

क्ष्मीवान्लक्ष्मणोवाक्यं अर्थसाधनमात्मनः॥ धर्मात्मासत्यसंधश्चरामोदाशरथिर्यथा॥ पौरुषेचाप्रतिद्वंद्वः
स्तस्यैनंजहिराक्षसं॥ इत्युक्त्वाबाणमाकर्णात् व्यकृष्यत्तमजिह्मगं॥ लक्ष्मणः समरेवीरः ससर्जेंद्रजितंप्र
ति॥ संधायचाप्रमेयंनरक्षसांशातनेनच॥ रौद्रेणास्त्रेणसंयोज्य लक्ष्मणः परवीरहा॥ सशरः सशिरस्त्रा
णंश्रीमज्ज्वलितकुंडलं॥ प्रमथ्येंद्रजितः कायात् पातयामासभूतले॥ तद्रावणतनूजस्यस्कंधाच्छिन्नंशि
रोमहत्॥ तपनीयनिभंभूमौददृशेरुधिरोक्षितं॥ हतः सनिपपातोर्व्यां धरण्यांरावणात्मजः॥ कवचीसश
रीखड्गी विध्वस्तसशरासनः॥ चुक्रुशुस्तेततः सर्वेवानराः सविभीषणाः॥ प्रहृष्टंनिहतेतस्मिंदेवावृत्रे
वधेयथा॥ अथांतरिक्षेभूतानांऋषीणांचमहात्मनां॥ बभूवतत्रसन्नादोगंधर्वाप्सरसामपि॥ पतितंरा
वणिंज्ञात्वासाराक्षसमहाचमूः॥ वध्यमानाप्रदुद्रावहरिभिर्जितकाशिभिः॥ तेवध्यमानाहरिभि

युद्धमिंद्रजितातत्रशरजालमसिसृजत्॥ अवारयदसंभ्रांतोमहत्परमदुःसहं॥ लक्ष्मणेंद्रजितौवीरौनि
र्द्दोतौमहाबलौ॥ चक्रतुर्घोरमन्योन्यंशरजालाकुलंरणं॥ ललाटेलक्ष्मणंबाणैः सुघोरैस्त्रिभिरिंद्रजित्॥
अभेद्यकवचंमत्वाविव्याधलघुहस्तवत्॥ शतैस्त्रिभिरदीनात्मा ललाटस्थैः शरोत्तमैः॥ लक्ष्मणः शुशुभेवी
रः त्रिशृंगइवपर्वतः॥ अर्दितस्त्वथबाणौघैस्तेनामित्रेणलक्ष्मणः॥ उद्ववर्हशरान्घोरान् रावणात्मजवा
रणान्॥ तमाशुप्रतिविव्याधलक्ष्मणः पंचभिः शरैः॥ किंचित्रोषपरीतात्मारावणिंवदनेशुभे॥ ततः
शोणितदिग्धांगौ लक्ष्मणेंद्रजितावुभौ॥ रणेविरेजतुर्वीरौपुष्पिताविवकिंशुकौ॥ तौपरस्परमभ्येत्यस
र्वगात्रेषुधन्विनौ॥ शितैर्विविधतुर्बाणैः कृतभावावुभौजये॥ ततः परमवेगेनकुपितोरावणात्मजः॥ वि
भीषणंत्रिभिर्बाणैर्विव्याधवदनेशुभे॥ मुखेतंचत्रिभिर्विध्वालक्ष्मणंशुभलक्षणं॥ एकैकेनाभिविव्याध

शस्त्राण्युत्सृज्यराक्षसाः ॥ लंकामभिमुखाः सस्रुः नदंतोनष्टचेतसः ॥ दुद्रुवुः सहितावीराः राक्षसाः
सर्वतोदिशं ॥ त्यक्त्वाप्रहरणान्याशु पट्टिशासिपरश्वधान् ॥ केचिल्लंकामभिमुखाप्रविष्टावानरा
र्दिताः ॥ समुद्रंपतिताःकेचित् केचिन्शैलान् समाश्रिताः ॥ हतमिंद्रजितंदृष्ट्वा शयानंधरणीतले ॥
राक्षसानांसहस्रेषु नकश्चिदवतिष्ठते ॥ ततोविनेदुः संहृष्टाः समरेहरियूथपाः ॥ चिक्ष्वेडुःर्मुमुचुश्चै
वलांगूलानिप्रहर्षिताः ॥ यथास्तंगत आदित्ये नावतिष्ठंतिरश्मयः ॥ तथातस्मिन्निपतिते नावतिष्ठं
तिराक्षसाः ॥ शीतरश्मिरिवादित्यो निर्वाणइवपावकः ॥ बभूवसमहाबाहुः समरेगतजीवितः ॥ प्रशां
तःपरुषोवायुः नष्टानिष्टप्रहर्षवान् ॥ बभूवपतितेलोकौराक्षसेंद्रसुतेतदा ॥ जहर्षशक्रोभगवा
न् सहसर्वैः सुरासुरैः ॥ यजामनिहतेतस्मि राक्षसेपापकर्मणि ॥ शुभाआपोनभःश्चैवजहर्षुर्दै

रामायण

युधकांड

वदानया: ॥ विज्वराश्चसुराज्ञाना: हतेतस्मिंस्तुराक्षसे ॥ ततोभ्यनंदंनूसौमित्रिंसमरेहरियूथपा: ॥
तमप्रतिवलंदृष्ट्वा हतंनैर्ऋतपुंगवं ॥ बिभीषणोथहनुमान्जांबुवांश्चापिवानर: ॥ विजयेनाभि
नंदंतप्रशशंसुश्च लक्ष्मणं ॥ क्ष्वेडंतश्चप्रवल्गंतश्चगर्जंतश्चप्लवंगमा: ॥ लब्धलक्षंरघुसुतंप
रिवार्यावतस्थिरे ॥ लांगूलानिप्रविध्यंत: स्फोटयंतश्चवानरा: ॥ लक्ष्मणोजयतीत्येवं वाचंव्याश्रा
वयंस्तत: ॥ अन्योन्यंचसमाश्लिष्य कपयोहृष्टमानसा: ॥ चक्रुरुच्चावचगुणा: राघवाश्रयजाकथा: ॥
तदसुकरमवाप्यसंप्रहृष्टा: प्रियसुहृदो युधिलक्ष्मणस्यकर्म ॥ परममुपगतामन: प्रहर्षंविनिहत
मिंद्ररिपुंनिशम्यदेवा: ॥ इतिइंद्रजिद्वधोनामसर्ग: ॥ रुधिरक्लिन्नगात्रस्तुलक्ष्मण: शुभलक्ष
ण: ॥ बभूवराक्षसंहत्वा शक्रजेतारमाहवे ॥ महानुभाववलंचराजलक्ष्मणसंमित: ॥ बभूववीक्षि
तवानु: समरेतेनरक्षसा ॥ तत: संसरभंवीरंजांबवंतंचवीर्यवान् ॥ सांन्निवर्त्यमहावेगोतोश्चस

यीं तं राक्षसेश्वरं॥ बलेनाहं समासाद्य हनिष्यामि रणे रिपुं॥ त्वया लक्ष्मण नाथेन सीता च पृथिवी मम॥ नदुःप्रापा हतस्त्व
घ शक्रजित्सु महाबलः॥ स तं भ्रातरमास्थाय परिष्वज्य च पीडितं॥ रामः सुषेणं मुदितः समवेक्ष्य तमब्रवीत्॥
सशल्योयं महाप्राज्ञ सौमित्रिर्मित्रनंदनः॥ यथा भवति निःशल्यः तथा त्वं कर्तुमर्हसि॥ विशल्यकारणीं नाम
वने हेमवती शुभा॥ लक्ष्मणाय ददौ वीरः सुषेणः परमौषधीं॥ स तस्या गंधमाघ्राय विशल्यः समपद्यत॥ तथा
निर्वेदनश्चैव संरूढव्रण एव च॥ बिभीषणमुखानां च सुहृदां राघवाज्ञया॥ तामौषधीम महाभीमः सुषेणः
प्रददौ तदा॥ ऋक्षवानरयोधानां पर्वत द्रुमयोधिनां॥ समरे प्रतियोधानां हरीणां च महाबलः॥ ततः प्रकृतिमा
सेदुः हतशल्या गतक्लमाः॥ तुष्टुवुर्वानराः सर्वे संहृष्टौ रामलक्ष्मणौ॥ सौमित्रिप्रमुखाः सर्वे वानरए विगतज्व
राः॥ बभूवुर्मुदितास्तत्र प्राप्यामृतमिवामराः॥ लक्ष्मणस्तु तदा हृष्टः स्ते च वानरयूथपाः॥ उत्साहं द्विगुणं प्रा
पुःस्तथा वीरपराक्रमाः॥ ततस्तु रामः प्लवगाधिपस्तथा विभीषणश्चर्क्षपतिश्च जांबवान्॥ अवेक्ष्य सौमित्रि

मदीनमुत्थितं तदा ससैन्याः सुचिरं जहर्षिरे॥ अथ जयकर्म च लक्ष्मणस्य तत्सुदुष्करं दाशरथिर्महाम
तिः॥ बभूव हृष्टश्च सुदुरासदं तदा निशम्य तं शक्रजितं निपातितं॥ इति श्री विजयाख्यो नाम सर्गः॥ ॥
ततः पौलस्त्यसचिवा विज्ञायेंद्रजितं हतं॥ विज्ञापयामासुरथो रावणं सहितास्तदा॥ न्यवेदयंश्च दुःखार्ता
वधमिंद्रजितस्तुते॥ बिभीषणसहायेन लक्ष्मणेन दुरात्मना॥ जयमाकांक्षितो राजन् सुयुद्धेन तवात्मजः॥
शूरः संगम्य शूरेण संयुगे विनिपातितः॥ विषण्णवदनास्ते तु रावणायाचचक्षिरे॥ स स्वयं इंद्रजित्यातः
शरैः संतर्प्य लक्ष्मणं॥ स तद्वधं ज्ञातिभयं श्रुत्वा पुत्रस्य रावणः॥ घोरमिंद्रजितः संख्ये कश्मलं महदाविशत्॥
स पुत्रवधसंतप्तः शूरः क्रोधवशं गतः॥ जहौ संज्ञां महाबाहुर्मोहं च समूर्छितः॥ संप्राप्य तु चिरात्संज्ञां
राजा परमदुःखितः॥ पुत्रशोकार्दितो दीनो विललापाथ रावणः॥ हा राक्षसचमूमुख्य मम वत्स महा

रथ॥ इंद्रजित् कथमद्यत्वं लक्ष्मणस्य वशंगतः॥ यस्त्वं कालमपि क्रुद्धो भिंद्याद् इषुभिराहवे॥ मंदरस्यापि शि
खरं किं पुनर्लक्ष्मणं रणे॥ अद्य वैवस्वतो राजा भूयो बहुमतो मम॥ येनत्वं योजितस्तात महता कालधर्मणा॥
अभेद्योसि यतः संख्ये देवासुरगणैरपि॥ येन वैह न्यते शक्रः स पुमान् स्वर्गमश्नुते॥ अद्य देवगणाः सर्वे लोकपा
लामहर्षिभिः॥ हतमिंद्रजितं श्रुत्वा सुखं स्वप्स्यंति निर्भयाः॥ अद्य लोकास्त्रयाः कृत्स्नाः पृथिवी च सकानना॥
एकेनेंद्रजिता हीना शून्या वै प्रतिभांति मे॥ अद्य नैर्ऋतकन्यानां श्रोष्याम्यंतःपुरे वयं॥ करेणुसंघस्य यथा
निनादं गिरिगह्वरे॥ यौवराज्यं च लंकां च रक्षांसि च परंतप॥ मातरं मां च भार्यां च क्व नु संत्यज्य गच्छसि॥ न
नु त्वयेंद्रजित् मह्यं गंतव्यं यमसादनं॥ प्रेतकार्याणि सर्वाणि विपरीतः प्रवर्त्तते॥ स त्वं जीवति सुग्रीवे ल
थारामे स लक्ष्मणे॥ मम शल्यमनुद्धृत्य कस्माद् गच्छसि पुत्रक॥ इति बाष्पं समं तस्य वचांसि विलपतस्य
च॥ तन्मध्यगतमासीनं राक्षसानां राक्षसाधिपं॥ आविवेश महान्कोपः पुत्रव्यसनसंभवः॥ १४३

वानरौकसः॥ आजगाम प्रहृष्टात्मा यत्र सुग्रीवराघवौ॥ बिभीषणमवष्टभ्य हनूमंतं च वीर्यवान्॥ ततो
राममभिक्रम्य सौमित्रिरभिवाद्य च॥ तस्थावदूरतो भ्रातुः सोमस्येव बृहस्पतिः॥ आचचक्षे स धर्मात्मा
राघवाय बिभीषणः॥ छिन्नमिंद्रजितः शीर्षं लक्ष्मणेन महात्मना॥ निवेदयित्वा रामाय तस्थौ हृष्टो बिभीषणः॥
बिभीषणवचः श्रुत्वा हर्षव्याकुललोचनः॥ बिभीषणं पुरस्कृत्य हनूमंतं च राघवः॥ जांबुवंतं च सुग्रीवं सर्वां
श्चैव वनौकसः॥ एहिमिंक्ष्वाकुशार्दूल रामाश्वासयतानुजं॥ स भद्रं सम भ्राता लक्ष्मणं शुभलक्षणं॥ उप
वेश्य तदुत्संगे परिष्वज्य च पीडितं॥ पीडितं सायकैर्दृष्ट्वा राघवो दुःखितोभवत्॥ दुःखहर्षयुतो रामः संमूर्छित
इवाबभौ॥ उपलभ्य ततः संज्ञां समुद्वीक्ष्य लक्ष्मणं॥ मूर्ध्नि चैनं समाक्रम्य रामः शूरमुवाच तं॥ भ्रातरं परमे
ष्वासं आश्वास्य पुरुषर्षभः॥ कृतं सुकृतकर्माणं कर्मेदं दुष्कृतं त्वया॥ दुरवापं प्रमघा घवधेनेंद्रजितो रणे॥
निरमित्रः कृतोस्म्य वे निर्यास्यति च रावणः॥ बलव्यूहेन महता श्रुत्वा पुत्रं निपातितं॥ तं पुत्रवधसंदिग्धंमि

घोरप्रकृत्या रूपं च तस्य कोपाभिमूर्छितं ॥ बभूव भीमं रुद्रस्य क्रुद्धस्येव दुरासदं ॥ तस्या निर्दशतो दंतान् शु
श्रुवे स निस्वनः ॥ यंत्रस्यावेष्ट्यमानस्य महतो धीवरस्य च ॥ तस्य प्रकृतिरक्तांते भूयः क्रोधाग्निना तथा ॥ रा
वणस्य महाघोरे रक्तनेत्रे बभूवतुः ॥ तस्य क्रुद्धस्य चक्षुर्भ्यां प्रापतन्नश्रुबिंदवः ॥ दीप्ताभ्यामिव दीप्ताभ्यां सार्चि
षः स्नेहबिंदवः ॥ राजा काल इव क्रुद्धो यां दिशं समवेक्ष्यते ॥ तस्यां तस्यां भयत्रस्ताः राक्षसाः संविलिल्यिरे ॥
तमंतकमिव क्रुद्धं चराचरविषादिषुं ॥ वीक्ष्यमाणं दिशः सर्वा राक्षसा नोपचक्रमुः ॥ प्रेक्ष्यापांगेन तेजस्वी सं
रब्धांस्तानुपागतान् ॥ अब्रवीन्नैर्ऋतान् तान् विरत्तं भयिषु राहवे ॥ महावर्षसहस्राणि चरतो दुश्चरं तपः ॥ तेषु तेषु दे
वकामेषु स्वयंभूश्च प्रसाधितः ॥ तस्य चैव तपसो व्युष्टा तत्प्रसादाच्च स्वयंभुवः ॥ न सुरेभ्यो न भूतेभ्यो भयं मम कदा
चन ॥ कवचं ब्रह्मदत्तं च यच्च मे बुधसंनिभं ॥ देवासुरमनुष्येषु अभिन्नं वज्रवृष्टिभिः ॥ तेन मामद्य संनद्धं
रथस्थमिह संयुगे ॥ कः प्रतीयात् नृपधे जातु साक्षादपि पुरंदरः ॥ यत्तदस्याभिप्रसादेन सशरं कार्मुकं महत् ॥

देवासुरविमर्देषु महद्दत्तं स्वयंभुवा॥ अद्यतूर्यनिनादेन धनुरुत्थापयंतु तत्॥ रामलक्ष्मणयोरेव वधायपरमा
हवे॥ सपुत्रवधसंतप्तः शूरः शत्रुवशंगतः॥ समीक्ष्य रावणो बुद्ध्या वैदेह्या रोचयद्वधं॥ प्रत्यवेक्षत तान्सर्वा
न् राक्षसान्घोरदर्शनान्॥ दीनान्दीनमुखांश्चैव तानुवाच निशाचरान्॥ मायया मम वत्सेन त्रासार्थं च
वनौकसां॥ किंचिदेव हि हत्वा यन् सीतेयमिति दर्शिता॥ तदिदं सत्यमेवाहं करिष्येप्रियमात्मनः॥ वैदेहीं सूदयि
ष्यामि क्षत्रबंधुमनुत्तमं॥ इत्येवमुक्त्वा सचिवान् खड्गमारुह्य पराक्रमः॥ उद्धृत्य गुणसंपन्नं विमलाम्बरदर्शनं॥
निष्पपाताशु स भार्यसचिवैः सह॥ रावणः पुत्रशोकेन भृशमाकुलचेतनः॥ तं खड्गं रौद्रमुद्यम्य प्रययौ
यत्र मैथिली॥ व्रजंतं राक्षसं प्रेक्ष्य सिंहनादं प्रचुक्रुशुः॥ ऊचुश्चान्योन्यमालिंग्य संक्रुद्धं प्रेक्ष्य राक्षसाः॥
अद्यैनं तावुभौ दृष्ट्वा निहनिष्यति राघवौ॥ लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः॥ बहवः शत्रवश्चान्ये
क्रुद्धेनानेन निर्जिताः॥ तेषां संजल्पमानानां अशोकवनिकागतां॥ अभिदुद्राव वैदेहीं रावणः क्रोधमू

धिष्यतिरावणः॥ अहोधिङ्‌मन्त्रितोयं विनाशो राजपुत्रयोः॥ हनूमतोहितद्वाक्यं नकृतं सुहृदयामया॥ यद्य
हं तस्य पृष्ठेन तदा यास्यन्निमितन्ता॥ नाद्यता वत्तुरो चिष्यं भ्रष्टानिष्टांगतिं गतौ॥ मन्येनैतस्या यद्धृदयं [illegible]
स्वस्य वामे स्फुरिष्यति॥ निशाचरहतेपुत्र द्वाश्राधृमय्चेतना॥ अग्निमारोक्ष्यतेनूनं प्रायं चोपगमिष्यति॥
धिगस्तु दासीमसतीमिथसंपापदर्शनं॥ यन्निमित्तं महद्दुःखं कौशल्याप्रतिपद्यते॥ इत्येवं मैथिली प्रेक्ष्य
विलपंतीतपस्विनी॥ रोहिणीमिवचंद्रेण विनाग्रह वशंगता॥ सुपार्श्वो नाममेधावी रावणं राक्षसेश्वरं॥
निवार्यमाणं सचिवे रिदं वचनमब्रवीत्॥ कथंनाम दशग्रीव साक्षात् विश्रवसः सुतः॥ हंतुमिच्छसि वैदेही
कोपाद्धर्ममनुस्मरन्॥ विद्यावेदव्रतस्नातस्वधर्मनिरतः सदा॥ स्त्रियः कामात् वधं राजन् मन्यसेरा
क्षसाधिप॥ एष यज्ञस्य भवतोः कुलेजातस्यचोत्तमे॥ स्त्रीवधोनानुरूपो वैविशेषेणमनस्विनः॥ मैथि
ली रूपसपन्नां अपास्यच सुदर्शनां॥ अस्मिन्नेव रणेदीप्ते राघवे कोपमुत्सृज॥ अभ्युत्थानं त्वमद्यैव

कृष्णपक्षेचतुर्दशी॥ कृत्वानिर्याह्यमावास्यां विजयाय बलैर्वृतः॥ निःसंशयः शरीखड्‌गी वरेण्यरथमास्थितः॥
हत्वादाशरथिं रामं राजन् प्राप्स्यसि मैथिलीं॥ एवमुक्तातु तोष्याथ बलात्संगृह्यवीर्यवान्॥ अपाकर्षतवैदेह्याः
सकाशाद्राक्षसेश्वरं॥ समवेक्ष्य तुवैदेह्याः रूपं वीर्यं गुणात्मकं॥ ननाशकेपदंशोषा रावणस्य दुरात्मनः॥ सतद्दुरा
त्मचिनिर्वादितो वाचः सुधर्म्यं प्रतिगृह्य रावणः॥ गृहंजगामाथमनाश्च वीर्यवान् पुनः सभांवाभिययो सुहृद्वृ
तः॥ इतिसुपार्श्ववाक्यंनाम सर्गः॥ ॥ सप्रविश्यसभांराजा दीनः परमदुःखितः॥ निषसादासने मुख्ये
सिंहक्रुद्ध इवश्वसन्॥ उवाचसतदामुख्यान् बलमुख्यान्महाबलः॥ रावणः प्रांजलीवाक्यं पुत्र
व्यसनकर्शितः॥ सर्वेभवंतः सर्वेण सहवाश्वेनदंशिताः॥ निर्यांतु रथसंघैश्च पदातैश्चापि शोभिताः॥ एकंस
मं प्रतिक्षिप्य समरे हंतुमर्हथ॥ प्रवृष्टानारवर्षेण प्रावृषीवबलाहकः॥ अथवाहंशरैस्तीक्ष्णैर्भिन्नमर्माणमाह
वे॥ सहसर्वैर्भवद्भिस्तं रामंवक्ष्यामिसंयुगे॥ इत्येवं वाक्यमादाय राक्षसेंद्रस्य राक्षसाः॥ निर्ययुस्ते रथैः शीघ्रैर्नाग
नीकैश्चभूषिताः॥ ससंग्रामोभवद्भूमिः सूर्यस्योदयनंप्रति॥ रक्षसां वानराणांच तुमुलः समपद्यत॥ तेगदा

भिर्विचित्राभि प्रासै खड्गैः परश्वधैः ॥ अन्योन्यं समरे जघ्नुस्तदा वानरराक्षसाः ॥ हतानां युधि वीराणां तत्र वा
नररक्षसां ॥ संख्या न शक्यते कर्तुं बहुत्वाच्च तदा तदा ॥ मातंगरथशार्दूलरथमस्य ध्वजद्रुमाः ॥ शरीरसंघात
वहाः प्रसस्रुः शोणितापगाः ॥ ध्वजवर्मरथानागा नाना प्रहरणानि च ॥ प्रहृत्य प्रहृत्य समरे वानरेंद्राश्च भंजिरे ॥
केशाकर्णललाटानि नासिकाश्च प्लवंगमाः ॥ रक्षसां दशनैस्तीक्ष्णै नखैश्च विचकर्तिरे ॥ एकैकं राक्षसं संख्ये
शतवानरपुंगवाः ॥ अभ्यधावंत वल्गिनो वृक्षं शकुनयो यथा ॥ गदाभिश्च खड्गैश्च पट्टिशैः परिघैस्तथा ॥ निज
घ्नुर्वानरान्घोरान् राक्षसाः पर्वतोपमाः ॥ प्रविष्टं राक्षसं सैन्यं घनैः सूर्यमिवावृतं ॥ नाभिजघ्नुस्तदा रामं निर्दहंतं
शरार्चिषा ॥ निकृंतायुधि रामेण घोरास्ते रजनीचराः ॥ रणे रामस्य ददृशुः कर्माण्यसुकराणि ते ॥ कालयंतम
नीकानि क्षिपंतम महारथान् ॥ नैतदृहुः शरं रामं निर्दहंतं शरार्चिषा ॥ निकृंतायुधि रामेण घोरास्ते रजनीचराः ॥
~~स्मे समरज्ञ सदृशुः~~ वातं न स्मतं यथा ॥ छिन्नं भिन्नं विपर्यस्तं प्रभग्नं शस्त्रपातितं ॥ बलं रामेण ददृशुः न रामं शी
घ्रकारिणं ॥ प्रहरंतं शरीरेषु न तं पश्यंति राघवं ॥ इंद्रियार्थेषु वर्तंतं भूतात्मानमिव प्रजाः ॥ एष हंति गजा

...ष्ठितः ॥ वार्यमाणो बहुविधं सुहृद्भिर्हितबुद्धिभिः ॥ अभ्यद्रवत वैदेहीं ग्रहः खे रोहिणीमिव ॥ कंपयन् वसु
धां लोकान् पादन्यासैर्द्रुतं द्रुमान् ॥ पुत्रशोकसमाक्रांतः स्त्रीवधकृतमानसः ॥ मैथिलीं रक्षमाणास्तु राक्ष
सीभिरनिंदिता ॥ चिंतये शरणगतं राघवं सानुजं सती ॥ तं तथा क्रोधदीप्ताक्षं आयांतं जनकात्मजा
नि वार्यमाणं सचिवैः मनसैव व्यचारयत् ॥ तथात्वरममभिक्रुद्धः समभिक्रुद्धः समभिद्रवति स्वयं ॥ हंतुमिच्छ
ति पापात्मा सनाथां मामनाथवत् ॥ बहुशो नादयानोहि भर्त्तारं मामनुब्रवीत् ॥ भार्या मम भव स्वेति निरस्त
श्च ततो मया ॥ सोऽयं मदनवस्थाना व्यर्थां नैरस्यतां गतः ॥ कामक्रोधसमाविष्टो मां हंतुमुपसर्पति ॥ अथवा
राजपुत्रौ तौ भ्रातरौ रामलक्ष्मणौ ॥ मन्निमित्तं मनार्येण समरेऽद्य निपातितौ ॥ संप्रसेव हि लंकायां रक्षसां तु
मुलस्वनः ॥ बहूनामिव हृष्टानां मया प्राक्रोशतां श्रुतः ॥ अथवेंद्रजितं श्रुत्वा लक्ष्मणेन रणे हतं ॥ संततः
पुत्रशोकेन मां हंतुमुपसर्पति ॥ अथवा राजपुत्रौ तौ विनाश्य कृतनिश्चयः ॥ तथैवामर्षसंपूर्णो मां च

नीकं एषहंतिमहारथान्॥ एषहंतिशरैस्तीक्ष्णैपदातीन् वाजिभिःसह॥ अथरामोमहातेजायुध्यमानश्चरक्ष
सां॥ प्रज्ञांव्यपाहरत्तत्रमोहस्त्रबलेनच॥ तेविमूढाविसंज्ञाश्चरामाश्चितमिदंजगत्॥ ददृशूराक्षसास्तत्रततोजघ्नुःपरस्प
रं॥ अन्योन्यंराक्षसाजघ्नुःशक्तिशूलपरश्वधैः॥ मोहिताःपरमास्त्रेणगांधर्वेणमहात्मना॥ ततोददृशिरेरामंनिघ्नंतम
रिवाहिनीं॥ ततोरामसहस्राणिरणेपश्यंतिराक्षसाः॥ पुनःपश्यंतिकाकुत्स्थंएकमेवमहाहवे॥ भ्रमंतींकांचनींकोटिं
कार्मुकस्यमहात्मनः॥ अलातचक्रप्रतिमांददृशुस्तेनिशाचराः॥ सूर्यमंडलसंभूतरश्मिजालमिवांबरे॥ शरजालंद
दृशिरेराघवस्यधनुश्च्युतं॥ शररश्मिसहस्राढ्यंमध्याह्नादित्यसन्निभं॥ चरंतंदिक्षुसर्वासुनशेकुस्तमुदीक्षितुं॥ शरीर
नाभिसत्वार्चिचापनेमिस्चनोधृतं॥ ज्याघोषतलनिर्घोषंतेजोगुबुद्धिगुणप्रभं॥ दिव्यास्त्रगुणसंपन्नंतथाशतशरा
कुलं॥ रामचक्रंविवर्त्ततंकालचक्रमिवापरं॥ ददृशुःसर्वभूतानिदहंतंसर्वराक्षसान्॥ अनीकंशतसाहस्रंरथानांवात
रंहसां॥ अष्टादशसहस्राणिगजानांवातरंहसां॥ चतुर्दशसहस्राणिसारोहाणांचवाजिनां॥ पूर्णेशतसहस्रेद्वे
पदातीनांचरक्षसां॥ निमेषांतिमात्रेणशरैरग्निशिखोपमैः॥ हतान्येकेनरामेणलीलयाविदितात्मना॥ तेहताश्वा

हतरथाहृतहतसूताःगतध्वजाः॥ अभिपेतुः पुरीं लंकां हतशेषानिशाचराः॥ निहतेरथपादातेस्तब्धभूवरणाजि
रं॥ आक्रीडमिवरुद्रस्य क्रुद्धस्येव महात्मनः॥ ततोदेवाः सगंधर्वाःसिद्धाश्चपरमर्षयः॥ साधुसाध्विति रामस्य कर्म
तत्समपूजयत्॥ अब्रवीच्चतदारामः सुग्रीवं समनंतरं॥ एतदस्त्रबलं सौम्य ममवात्र्यंबकस्यवा॥ निहत्यतां राक्षस
वाहिनीं च रामस्तदाशक्रसमोमहात्मा॥ अस्त्रेण दिव्येन जितक्रमश्च संस्तूयते देवगणैः प्रहृष्टैः॥ इति श्रीराम
स्त्रयुद्धं नाम सर्गः॥ तानिनागसहस्राणि सारोहाणांचवाजिनां॥ रथानामग्निवर्णानां सध्वजानांवरूथिनां॥
रक्षसांचसहस्राणिगदापरिघयोधिनां॥ अतीवचारुरूपाणां कांचनध्वजवर्मिणां॥ निहतानिशरैर्दीप्तैस्त
सकांचनभूषणैः॥ रावणेनप्रयुक्तानि रामेणाक्लिष्टकर्मणा॥ दृष्ट्वा श्रुत्वाचसंत्रस्ता हतशेषानिशाचराः॥
राक्षस्यस्तु संगम्य दीनाश्चिंतापरायणाः॥ विधवाहतपुत्राश्च क्रोशंत्योहतबांधवाः॥ राक्षस्यः सहदुःखार्ताः सं
गताः पर्यदेवयन्॥ कथंशूर्पणखावृद्धाः कराला निम्नतोदराः॥ आससादवने रामं कंदर्पसमरूपिणं॥
सुकुमारं महासत्वं सर्वभूतहितेरतं॥ तं दृष्ट्वा लोकवंध्या सा कथं रामं मकामयत्॥ कथं सर्वगुणोपेतेर्हीना १२६

स्थ:॥ सुग्रीव: प्रापितोराज्यंपर्य्याप्तंतन्निदर्शनं॥ धर्मार्थसहितंवाक्यंसर्वेषांरक्षसांहितं॥ युक्तंबि
भीषणेनोक्तंमोहात्तस्यनरोचते॥ विभीषणवच: कुर्य्याद्यदिवाधनदानुज:॥ स्मशानभूतादु:खार्त्ता
नेयंलंकापुरीभवेत्॥ कुंभकर्णंहतंश्रुत्वाराघवेणमहात्मना॥ प्रियंचेंद्रजितंपुत्रंरावणोह्यनुशोचति॥
ममपुत्रोममभ्राताममभर्त्ताहतोरणे॥ इत्येवंश्रूयतेशब्दोराक्षसानांगृहेगृहे॥ रथनागास्तथाश्वाश्चह
ता:शतसहस्रश:॥ रणेरामेणशूरेणराक्षसाश्चपदातय:॥ रुद्रोवायदिवाविष्णुर्महेंद्रोवाशतक्रतु:॥
हंतिनोरामरूपेणयदिवास्वयमंतक:॥ हतप्रवीराबहवोनिराशाजीवितेप्रिये॥ व्यसनान्यनुपश्यंत्यो
विनाथा: प्रविलपामहे॥ राघवोसाद्दशग्रीव: शूरोलघुपराक्रम:॥ इदंमहाभयंघोरंसमुत्पन्नंनबुध्यते॥
तंनदेवानगंधर्वापिशाचानचराक्षसा:॥ उपसृष्टंपरित्रातुंशक्तारामेणसंयुगे॥ निमित्तानीहदृश्यंते
रावणस्यरणेरणे॥ तानिरामेकथिष्यंति रावणोनिर्जितोयेषां॥ देवदानवयक्षेभ्योदत्तोब्रह्माभया

चित:॥ रावणस्याभयंयुधेमानुषेभ्योनयाचित:॥ तदिदंमानुषात्संख्येनैराश्यंसमुपागतं॥ जीवितांतकरंघोरंर
क्षसांरावणस्यच॥ पीड्यमानास्तुबलिनावरदत्तेनरक्षसा॥ देवास्तुपर्वभिर्नियमै: पितामहमतोषयन्॥ देवतानांमहातेजा: परितु
ष्टोबृहद्वच:॥ अद्यप्रभृतिलोकेषुयभूताभयवर्जिता:॥ भयार्त्तास्तुपुनरिहभविष्यंतीहराक्षसा:॥ अथदेवै: समागम्यसर्वै: सेंद्रपुरोग
मै:॥ वृषकेतुस्त्रिपुरहादेवदेवप्रसादित:॥ प्रसन्नस्तुमहातेजा: रुद्रोदेवानुवाचह॥ उत्पत्स्यतिमहाभयार्थंवोनारीरक्ष:क्षया
वहा॥ सैषादेवप्रयुक्तातुदानवानांयथाक्षुधा॥ भक्षयिष्यतिन: सर्वान्नैर्ऋतान्सहरावणान्॥ रावणस्यापनीतेनदुर्विनीतस्यदु
र्मते:॥ अयमभिष्टंगकोघोर: शोकेन: समुपागत:॥ नतंपश्यामहेलोके योन: शरणदोभवेत्॥ राघवेणोपसृष्टानांकालेनेवयुग
क्षये॥ इत्येवंसर्वरजनीचरास्तदापरस्परंसंपरिरभ्यबाहुभि:॥ भृशंविनेदुर्भयशोककर्शिता: जजल्पुरुच्चैश्चवच: सुदारुणं॥ इति
राक्षसविलापोनामसर्ग:॥ ॥आर्त्तानांरक्षसांतेषांव्यथितानांगृहेगृहे॥ रावण: करुणंसर्वंशुश्रावपरिदेवितं॥ स्वबलंक्षपि
तंदृष्ट्वासमग्रंससुतंरणे॥ सर्वान्भ्रातृन्विनिहतान्शक्रतुल्यपराक्रमान्॥ दीर्घमथाविनिश्वस्य मुहूर्त्तंध्यानमास्थित:॥
बभूवपरमक्रुद्धोराक्षसोभीमदर्शन:॥ संदष्टोष्ठसदशने: क्रोधसंरक्तलोचन:॥ राक्षसेंद्र: सुदुर्धर्ष: कालाग्निरिवलोच

ताः॥ उवाचाथ समीपस्थान् राक्षसान् राक्षसेश्वरः॥ तथा सत्त्वानि लोकानां निर्दहन्निव चक्षुषा॥ महोदरं महापार्श्वं
विरूपाक्षं च राक्षसं॥ शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया॥ तस्य तद्वचनं श्रुत्वा राक्षसास्ते भयार्दिताः॥
चोदयामासुरव्यग्राः राक्षसास्तान्नृपाज्ञया॥ ते तु सर्वे तथेत्युक्त्वा राक्षसा घोरदर्शनाः॥ कृतस्वस्त्ययनाः सर्वे रावणा
भिमुखा ययुः॥ प्रतिपूज्य यथान्यायं रावणं ते महारथाः॥ तस्थुः प्राञ्जलयः सर्वे भर्तुर्विजयकांक्षिणः॥ अथोवाच म
हातेजा रावणः क्रोधमूर्छितः॥ महोदरमहापार्श्वौ विरूपाक्षं च राक्षसं॥ वाद्यं नमार्गबाणा निनिर्गतिम माज्ञया॥ ७
रामलक्ष्मणसुग्रीवान् हत्वा प्रतिनिवर्त्तते॥ स्वबलं क्षपितं दृष्ट्वा समरस्थस्य संगरे॥ तथा वीरान् रवेर्निहतान्
राक्षसानं तकोपमान्॥ अद्य बाणैर्धनुर्मुक्तैर्युगांतादित्यसन्निभैः॥ रावणं लक्ष्मणं चोभौ नेष्यामि यमसादनं॥
खरस्य कुंभकर्णस्य प्रहस्तेंद्रजितस्तथा॥ उद्धरिष्ये क्षयकरं शल्यं शत्रुवधादहं॥ नैवांतरिक्षं न दिशो न नद्यो नापि
सागराः॥ प्रकाशतां गमिष्यंति बाणजालवृता मया॥ अद्य वानरसंघानां तानि यूथानि भागशः॥ धनुःसमुद्रा

२४८

गुणवंतं महौजसं॥ सुमुखं दुर्मुखं वीरमंसं कामयामास राक्षसी॥ जनस्थानस्यात्म भाग्यत्वात् मलिना रूक्षमूर्धजा॥
अकार्यमवहास्यं च सर्वलोकविगर्हितं॥ राक्षसानां विनाशाय दूषणस्य खरस्य च॥ चक्रे प्रतिम रूपस्य राघवस्य प्र ण
धर्षणं॥ तन्निमित्तं कृतं वैरं दशग्रीवेण रक्षसा॥ वधाया सीधृता सीता रावणेन दुरात्मना॥ मारीचो दंडकारण्ये शू ना
रो राक्षसपुंगवः॥ हतो रामेण विक्रम्य पर्याप्तं तन्निदर्शनं॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां॥ निहता
नि जनस्थाने शरैरग्निशिखोपमैः॥ खरश्च निहतः संख्ये दूषणः स्त्रिशिरास्तथा॥ शरैराशीविषाकारैः प
र्याप्तं तन्निदर्शनं॥ न च सीतां दशग्रीवः प्राप्स्यते जनकात्मजां॥ वध्यं वल्लवतां वैरं रक्षसां रावणेन
च॥ वैदेहीं प्रार्थयामास तु विराधं राधं प्रेक्ष्य राक्षसं॥ हतमेकेन बाणेन पर्याप्तं तन्निदर्शनं॥ हतो
योजनबाहुश्च कबंधं रुधिराशनं॥ हताश्च राघवाभ्यां च राक्षसा युधकोविदाः॥ वानरं वालिनं हत्वा
सहस्रनयनात्मजं॥ मलिनं मेघसंकाशं राघवेण महात्मना॥ ऋष्यमूके वसन् शैले दीनो भग्नमनो

दृढंतैर्वधाभिष्येरारोर्मिभिः॥ एकोऽहंपद्मवक्त्राणांपद्माकिंजल्कवाससां॥ अद्ययूथंतडागानिविगाहिष्ये
दुमैः
गजेंद्रवत्॥ अद्ययुधिप्रचंडानांहरीणांद्रुमयोधिनां॥ मुक्तेनेकेषुणासैन्यंनिर्भेत्स्याभिसंयुगे॥ हतो
भ्रा॥ हतोभर्ता यासांचित्तनयाहताः॥ वधेनाद्यरिपोस्तासांकरिष्येश्रुप्रमार्जनं॥ अद्यमद्बाणनि
भिन्नैर्विकीर्णइवपर्वतैः॥ करिष्येवानरैर्युद्धंअौद्यास्तीर्णतलांमहीं॥ अद्यगोमायवोगृध्रायेचान्येपिशिताशनाः॥
सर्वांस्तांस्तर्पयिष्यामिशत्रुमांसैःशरार्दितैः॥ कल्प्यतांसरथःश्रीमान्क्षिप्रमानायतांधनुः॥ अनुयातुचमां
युद्धेयेचशिष्टानिशाचराः॥ तस्यतद्वचनंश्रुत्वामहापार्श्वोऽब्रवीद्वचः॥ बलाध्यक्षंस्थितंतत्रबलंसंत्वर्यतां
मिति॥ बलाध्यक्षस्तुसंत्वरितोरक्षसःस्तान्गृहान्॥ नोदयन्परिययौलंकांलघुपराक्रमः॥ ततोमु
हूर्त्तान्निःपेतुर्निर्भ्रताभीमविक्रमाः॥ प्रहृष्टानिनदंतश्चनानाप्रहरणैर्भुजैः॥ प्रासासिपट्टिशैःशूलै
र्गदाभिर्मुशलैस्तथा॥ शक्तिभिस्तीक्ष्णधाराभिःमहद्भिःकूटमुद्गरैः॥ यष्टिभिर्विविधैश्चक्रैर्निशितैश्चपर

श्चधैः॥ भिंडिमालैश्शतघ्नीभिरन्यैश्चापि तथायुधैः॥ आनयच्चबलाध्यक्षश्चतुरो रावणाज्ञया॥ द्रुतं सूतस
मायुक्तं युक्ताष्टतुरगं रथं॥ आरुरोहाथ तं दीप्तं दीप्यमानः स्वतेजसा॥ रावणः सत्वगांभीर्यात् नादयन्निव
मेदिनीं॥ रावणेनाभ्यनुज्ञातौ महापार्श्वमहोदरौ॥ विरूपाक्षश्च दुर्धर्षो रथमारुरुहुस्तदा॥ ते तु हृष्टा वि
नर्दंतो भिंदंत इव मेदिनीं॥ नादान् घोरान् विमुंचंतो निर्ययुर्जयकांक्षिणः॥ ततो युधाय तेजस्वी रक्षोग
णसमाकुलः॥ आदाय निर्ययौ चापं कालांतकयमोपमः॥ ततः प्रचलिताश्वेन रथेन स महारथः॥ द्वारेण
निर्ययौ तेन यत्र तौ रामलक्ष्मणौ॥ ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः॥ भीमं विनेदुर्दुर्मेधाः संच
चाल च मेदिनी॥ ववर्ष रुधिरं देवश्च स्खलंतश्च रथवाजिनः॥ ध्वजेऽस्य न्यपतत् गृध्रः विनेदुः श्वाशि
वाश्शिवाः॥ नयनं चास्फुरत् सव्यं सव्यो बाहुरकंपत॥ विवर्णवदनश्चासीत् किंचिद्भ्रष्टमनोरथः॥
तस्यानिष्क्रमतो युधे दशग्रीवस्य रक्षसः॥ रणे निर्ययतो भीमा उत्पाता जज्ञिरे॥ अंतरिक्षात्पपा

सपातोल्कानिर्घातसभूकंपस्वना ॥ भीमाश्चाभोनिनग्घंतः वायसैरनुमिश्रिताः ॥ अथारात्रिः पपा गोच्चैः ध्वजस्या
लननादश्च ॥ निपेतुः सहसाचास्यसर्वगात्रेष्वजायत ॥ सतानूतानूचिंतयनूघोरानूउत्पातानूअतिदारु
णानू ॥ रावणोनिर्ययौभीमास्त्रवधार्थंकालचोदितः ॥ तेषांतुरथशब्देनरक्षसांयुद्धकांक्षिणां ॥ वानराणा
मपिचमूर्यूथपायोभ्यवर्त्तत ॥ तदासुतुमुलंयुद्धंबभूवकपिरक्षसां ॥ अन्योन्यमाह्वयानानां क्रुद्धानांयुध
कांक्षिणां ॥ ततस्तेवानराघोराराक्षसास्तानूरणाजिरे ॥ अघ्नुः शैलैर्द्रुमैश्चैवरावणस्यैवपश्यतः ॥ रावणस्तुततः
क्रुद्धोतानाहसन्निशाचरानू ॥ हृष्टाभवंतोयुध्यंतांवानराणांजिघांसया ॥ ततस्तेराक्षसाः सर्वे नंदंतोजयकांक्षि
णः ॥ अभ्यवर्त्तंततानूघोरानूवानरानूशरवृष्टिभिः ॥ मुद्गरैःशक्तिभिःशूलैः गदामुसलतोमरैः ॥ परिघैरंकुशैर्बा
णैःवानराजघ्नुराहवे ॥ रावणश्चापिनाराचैर्वत्सदंतैरयोमुखैः ॥ विकर्णिभिःक्षुरप्रैश्चवानरानभ्यवर्धत ॥ तेव
ध्यमानासमरेवानराःपादपायुधाः ॥ अभ्यद्रवनूवैरतहिताः रावणंघोरदर्शनं ॥ रावणस्तुततोक्रुद्धोमहाब

उपराक्रमः॥ वानराणां शरीराणि व्यधमच्छरवृष्टिभिः॥ शरेणैकेन च हरीन्नव पंच च सप्त च॥ विव्याध समरे वी
रो राक्षसान्संप्रहर्षयन्॥ ते शरैरग्निसंकाशैः शातकुंभपरिष्कृतैः॥ वानरान्समरे वीरः प्रममाथ सुदुर्जयः॥
ते भिन्नगात्राः समरे वानराः शरपीडिताः॥ पेतुर्मथितसर्वांगाः सुरैरेव महासुराः॥ सतपनयथादित्यो मेघैर्बाण
गभस्तिभिः॥ अभ्यधावत संक्रुद्धः संयुगे वानरर्षभान्॥ ततः प्लवानमः सर्वे भिन्नदेहा विचेतसः॥ व्यथिताश्च द्र
वंतिस्म रुधिरेण समुक्षिताः॥ रामस्यार्थे पराक्रांताः वानरास्त्यक्तजीविताः॥ नदंतश्चानिवृत्तास्ते समरे स्वशिला
युधाः॥ ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवंगमाः॥ अभ्यर्दयंतः समरे रावणं पर्य्यवस्थितं॥ ते द्रुमाणां शिलानां च
वर्षं प्राणहरं तदा॥ व्यपोहत महातेजा रावणः पर्य्यवस्थितः॥ ततः पावकसंकाशैर्बाणै राज्ञौ विषोपमैः॥ वा
नराणामनीकानि बिभेद समरे प्रभुः॥ अष्टभिर्दशभिश्चैव राविध्या गंधमादनं॥ विव्याध दशभिश्चैव नीलं दूरा
द्व्यवस्थितं॥ सप्तभिश्च महाकायं मैंदं भित्वा सुदारुणैः॥ पंचभिर्निशितैश्चैकोजं विव्याध संयुगे॥ विंशत्या च
हनूमंतं नीलं च दशभिः शरैः॥ गवाक्षं पंचविंशत्या शक्रजानुं च पंचभिः॥ द्विविदं षड्भिराहत्य पनसंत्रा

गतं॥ दीप्तं न शेकुः संसोढुं पतंगा इव पावकं॥ तैर्दिताः सचिवैर्बाणैः क्रोशंतो विप्रदुद्रुवुः॥ पावकार्चिसमावि
ष्टा दह्यमाना वने यथा॥ प्लवगानामनीकानि महाभ्राणीव मारुतः॥ उवाह समरे तस्मिन् विधुन्वन् निशितैः
शरैः॥ कदनं सहसा चक्रे राक्षसेंद्रो वनौकसां॥ आससादयिषूरामं त्वरितं रावणोत्ययो॥ सुग्रीवस्तान् कपी
न् दृष्ट्वा भग्नान् विद्रवतो रणात्॥ ग्रस्तां स सेनामालोक्य चिकीर्षुः कर्म दुष्करं॥ गुल्मे सुषेणं निक्षिप्य यु
धे चक्रे ततो मनः॥ आत्मनः सदृशं वीरं सतां निक्षिप्य वानरः॥ सुग्रीवोभिमुखः शत्रुं प्रतस्थे पादपा
युधः॥ पार्श्वतः पृष्ठतश्चास्य सर्वे ते यूथपा भवन्॥ संप्रगृह्य महाशैलान् विविधांश्च महाद्रुमान्॥ वि
वदन् युधि सुग्रीवः स्वरेण महता महान्॥ पातयन् पर्वताग्राणि जघानोत्तमराक्षसान्॥ क्रोधसंरक्तनयनः
कालांतकयमोपमः॥ प्रममाथ महाकायो राक्षसान् वानरेश्वरः॥ राक्षसानामनीकेषु शिलावर्षं ववर्ष ह॥
अश्मवर्षं यथा मेघः पक्षिसंघेषु कानने॥ कपिराजप्रमुक्तैस्तु शिलावर्षैश्च राक्षसाः॥ विभिन्नशिरसः

पेतुः क्षितौ कीर्णा इवाचलाः॥ तेषु संक्षीयमाणेषु राक्षसेषु समंततः॥ सुग्रीवेण प्रभग्नेषु पतत्सु विनदत्सु च॥ विरू
पाक्षः स्वकं नाम वीरो विश्राव्य राक्षसः॥ रथेनाशु अथ सुग्रीवं ववर्ष शरवृष्टिभिः॥ तस्य तानशनिप्रख्यान्
शरान् दृढधनुश्च्युतान्॥ अचिंतयित्वा सुग्रीवः ससाराभिमुखो ययौ॥ आक्रामन् स्यंदनं तस्य धुर्यान् पादेन
वाहतः॥ वानरेंद्रपदाक्रांता अश्वाः पेतुर्हता भुवि॥ विभिन्नः पतितनेत्रास्तु भग्नग्रीवास्तुरंगमाः॥ आक्रम्य त
रथं वीरो वृक्षखंडेन वानरः॥ सारथिं निजघानाशु विरूपाक्षस्त्वपाक्रमत्॥ अपक्रांते विरूपाक्षे सुग्री
वः सचिवारथं॥ भग्ने जुत्तरसा वीराः हरयो वातरंहसः॥ विरूपाक्षो हतरथो धन्वी तूणी तलत्रवान्॥ बहु धनुर्मुष्टि स्थाने
रः स्ताडयामास नाराचैः प्लवगेश्वरं॥ रावणेन प्रयुक्तं तु विरूपाक्षो महागजं॥ आरुरोह रणे वीरो बहु
शस्त्रोपकल्पितं॥ स तं द्विरदमारुह्य विरूपाक्षो महाबलः॥ निनदन् भीमनिर्ह्रादो वानरांश्चाभ्यधाव
त॥ सुग्रीवे च शरान् घोरान् विससर्ज महाबलः॥ स्थापयामास चोद्विग्नान् राक्षसान् संप्रहर्षयन्॥

सुग्रीवं तं विरूपाक्षः शरैराशीविषोपमैः॥ बहुशस्ताडयामास सर्वांगेष्वरिसूदनः॥ सोतिविद्धः शरैर्घोरैः क
वीन्द्रस्तेन रक्षसा॥ चुक्रोध च महातेजा वधे चास्य मनो दधे॥ ततः पादपमुत्पाट्य शूरः संक्रंदनो हरिः॥ उत्पत्य
च जघानास्य प्रमुखे तं महागजं॥ स तु प्रहाराभिहतः सुग्रीवेण महात्मना॥ अपसृत्य धनुर्मात्रं निषपात नो
नदन्स्वनं॥ गजात्तु पतितात्तस्मादपक्रम्य स वीर्यवान्॥ राक्षसोभिमुखः क्रुद्धः प्रत्युद्गच्छत तं कपिं॥ आ
कर्षन्चर्म खड्गं च प्रगृह्य लघुविक्रमः॥ भर्त्सयन्निव सुग्रीवं आससाद व्यवस्थितं॥ स हि तस्याथ सं
क्रुद्धः प्रगृह्य विपुलां शिलां॥ विरूपाक्षस्य चिक्षेप सुग्रीवो जलदोपमः॥ स तां शिलामापतन्तीं दृष्ट्वा राक्ष
सपुंगवः॥ अपक्रम्य महाविक्रांतः खड्गेन प्राहरत्तदा॥ तेन मोक्षेण संभ्रांतं सुग्रीवं तं चमूमुखे॥ विकृ
ष्टं पातयामास पदा चैनमताडयत्॥ पतितश्च समुत्थाय कपिः स्तस्य व्यसर्जयत्॥ तलप्रहारमशनिसदृ
शं भीमविक्रमं॥ तलप्रहारं तद्रक्षः सुग्रीवेण समुद्यतं॥ नैपुण्यान्मोक्षयित्वा तु मुष्टिनोरस्यताडयत्॥ २५२

मिः शरैः॥ कुमुदं पंचभिर्बाणैः जांबुवंतं च सप्तभिः॥ तारं चैव त्रिभिर्बाणैर्विनतं चाष्टभिस्तथा॥ अरींसावाधि
दे नः पुत्रमंगदं त्रिभिः शरैः॥ शरभं च महातेजाः शरेणोरस्यताडयत्॥ क्रथनं च त्रिभिर्भल्लैर्ललाटे प्रत्यविध्य
त॥ स पुनः सूर्यसंकाशैरिषुभिर्मर्मभेदिभिः॥ वानराणामनीकानि ममंथ परमाहवे॥ विभिन्नहृदयाः सर्वा
न्यपतंत महीतले॥ निरुच्छ्वासाः कृताः केचित्केचित्पार्श्वेषु ताडिताः॥ विबाहवः कृताः केचित्केचिच्च चक्षु
र्विवर्जिताः॥ भिन्नगात्राः शरैः केचिद्रावणेन बलीयसा॥ आकुलां वानरीं सेनां शरजालेन मोहितां॥
रावणः परमप्रीतो ददर्श रुधिरोक्षितां॥ ततस्ते वानराः सर्वे वानरा रावणार्दिताः॥ रावणं शरणं जग्मुः प्र
जापतिमिवामराः॥ विद्राव्य वानरान्सर्वान् हत्वा चैव सहस्रशः॥ कपिशोणितविस्पंदं चक्रे भूमिं विक
र्दमं॥ तथा विकृतगात्रेषु दुराग्रीवेण संयुगे॥ वसुधा संवृता तत्र प्रकीर्णैर्हरिभिर्हतैः॥ ममंथ च महाका
यान् वानरान् राक्षसेश्वरः॥ युगांतवासितः सहसा प्रवृद्धान्स्क्षितिजानिव॥ रावणास्त्रमसह्यं ते शरं पातमा सं

पतितश्च समुत्थाय कपिस्तस्य व्यसर्जयत् ॥ तलप्रहारमशनिसदृशं भीमविक्रमं ॥ तलप्रहारं तं रक्षः सुग्रीवेण समुद्यतं ॥ नै
पुण्यान्मोक्षयित्वा सु प्रहारं तेन रक्षसा ॥ राक्षसस्याप्यतिमुक्तो प्रहारं घोरमुद्यतं ॥ असिनाभ्यवधीत् क्रुद्धो वानरान् पार्श्व
तः स्थितान् ॥ सत्युद्धष्टा नरतस्य विरूपाक्षस्य वानराः ॥ तलं तपातयामास शंखदेशे महाबलः ॥ महेंद्राशनिकल्पेन तले
नाभिहतः क्षितौ ॥ पपात रुधिरं वेगात् श्रोतोभिः सविनिर्वमन् ॥ विवृत्तनयनं मोहात् सफेन रुधिराप्लुतं ॥ ददृशु
स्तं विरूपाक्षं वानराश्च वधाद्दिसु ॥ स्फुरंतं परिवर्त्तंतं पार्श्वेषु रुधिरोक्षितं ॥ करुणं तं निष्ठनंतं च ददृशुर्हरयोऽमरं ॥ त
थातितौ संयतौ संप्रयुक्तौ नरस्विनौ वानरराक्षसानां ॥ बलार्णवौ सस्वनतुः सुभीमं यथार्णवौ द्वाविव भिन्नवेलौ ॥
निपातितं प्रेक्ष्य विरूपनेत्रं समाप तत्र हरिपुंगवेन ॥ बलं समस्तं कपिराक्षसानां उन्मत्तगंगाप्रतिमं बभूव ॥ इ
ति युद्धे विरूपाक्षवधः ॥ धात्यमाने बलेऽत्यर्थं अन्योन्येन पृथक्पृथक् ॥ सरसीव महाघर्मे क्षीणं गाये बभूवतुः ॥
स्वबलस्याभिघातेन विरूपाक्षवधेन तु ॥ बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः ॥ स तदा स्वबलं दृष्ट्वा

 मानं वज्ञीमुखैः ॥ बभूव व्यथयाविष्टो वीक्ष्य चैवं विपर्ययं ॥ स उवाच समीपे तु राक्षसं च महोदरं ॥ अस्मिन् का
 लेमहावाहो जयाशा मे व्यवस्थिता ॥ जहि शत्रुं महावीर दर्शयस्व पराक्रमं ॥ भर्तृपिंडस्य कालोयं निर्देष्टुं सा
धु बुधिमान् ॥ तथेत्युक्त्वाचलजस्वी राक्षसेंद्रं महोदरः ॥ प्रविवेशारिसेनां सनामकरः सागरं यथा ॥ ततः स कदनं चक्रे वान
राणां महाबलः ॥ भर्तुर्वाक्येश्च तेजस्वी तेजसाच प्रनोदितः ॥ प्रभग्नां समरे दृष्ट्वा वानराणां महाचमूं ॥ अभिदुद्राव
सुग्रीवो महोदरमनंतरं ॥ प्रगृह्य विपुलां घोरां महीधरनिभां शिलां ॥ विनिक्षेप महातेजास्तद्वधाय महाकपिः ॥ ता
मापतंतीं सहसा शिलां दृष्ट्वा महोदरः ॥ असंभ्रांतस्ततो बाणैः निर्बिभेद दुरासदां ॥ रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्र
धा ॥ निपपात तदा भूमौ गृध्रचक्रं तदा बभौ ॥ तां च दृष्ट्वा शिलां मोघां सुग्रीवः क्रोधमूर्छितः ॥ सालमुत्पाट्य चिक्षे
प सोच्छिन्नस्तमनेकधा ॥ तं वंचयित्वा सुग्रीवः शरयामास पत्रिभिः ॥ ततो ददर्श सुग्रीवः परिघं पतितं भुवि ॥ तं प्रगृह्य
ततः शीघ्रं व्यधमत्तस्य मार्गणान् ॥ जघान स्वेप्स वेगेन ततोस्य रथवाजिनः ॥ तस्माद्धतहयाद्वीरः समाक्रम्य महा

दारुणं ॥ क्रुद्धोयमिति विज्ञाय रावणो भ्रु क्षणमुवाच ह ॥ अतीव हि समालक्ष्य भ्रातरं कुपितेंद्रियं ॥ कुंभकर्णः शनैर्वाक्यं ब
भाषे परिसांत्वयन् ॥ अलं राक्षसशार्दूल संतापमुपगम्य हि ॥ रोषायासोपरि सज्य स्वस्थो भवितुमर्हसि ॥ नैवं म
र्हसि वक्तुं त्वं मयि जीवति पार्थिव ॥ तमहं शातयिष्यामि यत्कृते परितप्यसे ॥ अवश्यं हि हितं वाच्यं सर्वावस्थाम
हीपतिः ॥ बंधुभावादभिहितं भ्रातृस्नेहाच्च पार्थिव ॥ शत्रूणां कदनं पश्य क्रियमाणं मयानघ ॥ अद्य पश्य महा
बाहो मया समरमूर्धनि ॥ हते रामे सह भ्रात्रा द्रवंतीं कपिवाहिनीं ॥ अद्य रामस्य दृष्ट्वा त्वं मयानीतं रणाच्छिरः ॥
सुखी भव महाराज सीता भवतु दुःखिता ॥ अद्य रामेण निधनं पश्यंतु सुमहत्प्रियं ॥ लंकायां राक्षसाः स
र्वे ये ते निहतबांधवाः ॥ अद्य तस्य विनाशेन मारुते मारुते भौ कृतान्ताश्रयं ॥ शोकार्धनिर्वापयिष्यामि ते लंका
येन प्रधर्षिता ॥ अद्य शोकपरीतानां स्वबंधुवधशार्ङ्गिणां ॥ शत्रोर्युधि विनाशेन करोम्यश्रुप्रमार्जनं ॥ अद्य पर्वतकूटाभं
अद्य पर्वतकूटाभं सस्यं मिव तोयदं ॥ निर्गाणि पश्य समरे सुग्रीवं वानरेश्वरं ॥ अहमेकोद्य यास्यामि रणं रणविशारद ॥ अ
साधारणमिच्छामि तव दातुमहं जयं ॥ नापरः प्रेषणीयस्ते युद्धायातुलविक्रम ॥ अहमुत्सादयिष्यामि शत्रूंस्तव विशुंपत

यदि शक्रो यदि यमो यदि पावकमारुतो ॥ तानहं योधयिष्यामि कुबेरवरुणावपि ॥ गिरिमात्रशरीरस्य शितधारस्य मे स्तल
नर्दतस्तीक्ष्णदंष्ट्रस्य बिभियादपि वासवः ॥ अथवा त्यक्तशस्त्रस्य गृध्नतस्तरसा रिपून् ॥ पवनस्येव वेगेन रुजत
मा स्तरसा द्विषन् ॥ न मे प्रतिमुखः कश्चिन् शक्तः स्थातुं जिजीविषुः ॥ नैव शक्त्या न गदया नासिना च शितैः शरैः ॥
मारयन्मां हि संरब्धः साक्षादपि पुरंदरः ॥ हस्ताभ्यामेव संरब्धो हन्यामपि हि वज्रिणं ॥ यदि मे मुष्टिवेगं स राघवोऽविषहि
ष्यते ॥ ततः पास्यंति बाणौघा रुधिरं राघवस्य हि ॥ चिंतया बाध्यसे राजन् किमर्थं मयि तिष्ठति ॥ सोहं शत्रु
विनाशाय तव निर्यातुमुद्यतः ॥ अद्य पश्यंतु मे लोका भ्रमरामस्य संयुगं ॥ अद्य रामं ससुग्रीवं ससौमित्रिं समाहृतिं ॥
सर्वानेकायनेहं अम्मि प्रभिजानेतवाचरतः ॥ बधेन ते दाशरथेः सुखार्हं सुखं समाहर्तुमहं प्रयामि ॥ निहत्य रामं सहलक्ष्म
णेन खादामि सर्वान् युधि योधमुख्यान् ॥ रमस्व कामं पिब चाग्र्यवारुणीं कुरुष्व कृत्यानि विनीयतां ज्वरः ॥ मयाद्य
रामे गमिते यमक्षयं चिराय सीता वशगा भविष्यति ॥ इत्यार्षे श्रीरामायणे कुंभकर्णविकत्थनो नाम सर्गः ॥ ॥ तदुक्त

Ramayan

भतिकायेनधन्विनाबलशालिना॥ कुंभकर्णेनवचनं श्रुत्वोवाचमहोदरः॥ कुंभकर्णकुलेजातः धृष्टः प्राकृतदर्शि
नः॥ अवलिप्तेनशक्तोनजयं प्राकृतवेदितुं॥ नहिराजानजानजानीतेकुंभकर्णनयानयो॥ त्वंकेशोरवाउको
नूघुष्टंकेवलंवक्तुमर्हसि॥ स्थानंवृध्दिंचहानिंचदेशकालविभागवत्॥ आत्मनश्चपरेषांचबुध्यतेरक्षसाधिप॥ य
त्तुराक्यंबलवता वक्तुंप्राकृतबुध्दिना॥ अनुपासितवृध्देन वैवलाघ्दराबचः॥ यत्तुधर्मार्थकामानांच
ब्रवीषिपृथगाश्रयान्॥ अनुपश्यतिभेभावानहिलक्षणमस्तिते॥ कर्मएवहिसर्वेषांकारणानांप्रयोजनं॥ श्रे
यःपापीयसांचात्रफलंभवतिकर्मणां॥ निश्रेयसफलेचैवधर्मार्थावितरावपि॥ अथधर्मार्थयोःप्राप्तिःफलं
वैश्रेयसभाषितं॥ इहालौकिकपारत्र्यंकर्मपुंभिर्निषेव्यते॥ कर्मणाचलुकल्याणंलभतेकाममास्थितः॥
नत्रशांतमिदंराज्ञोहृदिकार्यंकदाचन॥ शत्रौहिसमरेहिंसा किमिवात्रापनीयते॥ सीतावत्रोपनयनेहनुर्य ८७
॥१॥ शत्रूणांसमरेहिंसा किमिवापनीयतेनकिमपि॥१॥

यःकथंमया॥ यदिवाराघवोविष्णुर्व्यक्तंतेशत्रुमागतः॥ देवतानांहितार्थंतुप्रविष्टोमानुषींतनुं॥ सवानराणांराजानं
सुग्रीवंशरणंगतः॥ अहोस्यसदृशंसख्यंतिर्यग्योनिगतैःसह॥ अथवावीर्यहीनोसोयेनपूर्वंमहासुरः॥ वामनरूपमास्था
यर्याचतस्त्रिपदंक्रमं॥ बलिस्तुदीक्षितोयज्ञेतेनत्वंसख्यमिच्छसि॥ येनदग्धामहीसर्वासैसागरवनांतरा॥ उपकारकृता
पूर्वंसवध्योयज्ञदीक्षितः॥ उपकारीकृतस्तेनसोस्मान्नरक्षतिवैरिणः॥ यद्रामेनिर्जितादेवास्वर्गंगत्वात्वयासह॥ तदा
किंनास्तिविष्णुत्वंतस्यदेवस्याराक्षस॥ भ्रातरेवंभुवेवमुक्तासौरावणंकालनोदितः॥ सावलेपंसगर्वंचपुनर्वचनम
ब्रवीत्॥ जानामिसीतांधरणिप्रसूतांजानामिरामंमधुसूदनाय॥ अहंहिजानेवहमस्यवध्यस्तेनाहृतामेजनका
त्मजैषा॥ नकामान्नैवचक्रोधाधराभिजनकात्मजां॥ निहतोगंतुमिच्छामितद्विष्णोःपरमंपदं॥ विभ्रमाद्रहितमोहाद्वाव
लवीर्योक्षयेणवा॥ नाभिपन्नंमिदानीमेव्यथातस्यपुनःकथं॥ अस्मिन्कालेतुयत्कर्तुंतदिहानींविधीयतां॥ म
मापनयजंदुःखंविक्रमेणसमीकुरु॥ यदिखल्वस्तिमेस्नेहोभ्रातृत्वंवाधिगच्छसि॥ यदिवाकार्यमेतत्तेहृदिकार्यतमं
मम॥ ससुहृद्योविपन्नार्थंदीनमभ्यवपद्यते॥ सबंधुर्योपनीतेषुसाहाय्यायोपकल्पते॥ तमथ्यैवंब्रुवाणंतुवचनंदीन

2000